आ रीते बीजो परिच्छेद प्रायः प्राकृत प्रद्यमां आवे छे. तेमां पूर्वे कह्या प्रमाणे चंद्रानना नगरीमां महासेन राजाने त्यां लक्ष्मणा राणीनी कुखे अवतरवानुं तथा पछी जन्म लेवानुं वृत्तांत कही ते वखते दिक्कुमारीओ आवी सूतिकर्म तथा जन्मकर्म करे छे तेनुं ने त्यारपछी इंद्रो आदिए करेला जन्ममहोत्सवनुं वर्णन कवि करे छे. पछी गर्भमां ते हता त्यारे माताने चंद्रनुं पान करवानो दोहलो थयो हतो तेथी चंद्रप्रभ ए नाम पिताए आप्युं. पछी कवि तेना अंगमां मांगलिक लक्षणो आपे छे; कुमारावस्थामांथी यौवनमां आवतां कवि जणावे छे केः—

विसएसुं निरीहो वि, विरत्तो विभवे पहू ।
ओहिनाणेण जाणंतो, भोग्गं कम्मं नियं तओ ॥१९७॥

सड्ढे पुव्वलक्खजुगे, अब्भत्थिओ पिऊहिं सो ।
रूवलावण्णसंपुण्णा, परिणेइ सुकण्णया ॥१९८॥

कीलोज्जाणसरोवावीसेलाइसु जहासुहं ।
ता हि सद्धिं स कीलेइ, ताराहिं पिव चंदमा ॥१९९॥

—प्रभु विषयोमां इच्छा वगरना होवा छतां अने विभवमां विरक्त होवा छतां अवधिज्ञानथी पोतानुं भोग कर्म जाणीने अढी लाख पूर्व गया पछी पिता-माताए अभ्यर्थना करता रूपलावण्यथी संपूर्ण एवी सुकन्याओने परणे छे. क्रीडाना उद्यान सरोवर वाव पर्वत आदिमां तेमनी साथे चंद्रमा जेम तारा साथे क्रीडा करे तेम क्रीडा करे छे.

अम्हाणमेस सामि त्ति पमोयभरसुंदरा ।
रज्जाभिसेयं सामिस्स निवा सव्वे करंति य ॥२००॥

सड्ढाछपुव्वलक्खाउ चउवीसंगसंजूआ ।
धम्मत्थकाममलिओ रज्जं पालेइ सामिओ ॥२०१॥

—'अमारो आ स्वामी' एम कही प्रमोदना भरावाथी सुंदर एवा सर्वे नृपो स्वामीनो राज्याभिषेक करे छे. २४ पूर्वसहित साडा छ लाख पूर्व सुधी २४ अंगथी युक्त अने धर्म अर्थ काममां ललित एवा स्वामी राज्य पाळे छे-करे छे.

आटलुं गृहस्थाश्रमनुं वर्णन कर्या पछी दीक्षानो समय आवे छे. लोकांतिक देवो आवी हाथ जोडी जणावे छेः—

जगबंधव ! सव्वण्णू ! सव्वदंसण ! सामिय ! ।
समओ एस ते तित्थं भयवं ! तं पयट्टय ॥२०३॥

—हे जगबांधव ! सर्वज्ञ ! सर्वदर्शन ! स्वामी ! आ समय छे के जे वखते भगवन् ! आपना तीर्थनुं प्रवर्त्तन करो !

त्यार पछी प्रभु सांवत्सरिक दान करे छे तेनुं वर्णन करी पोष कृष्ण तेरसने दिने अनुराधा नक्षत्रमां चंद्र आवतां सहस्राम्रवनमां पंचमुष्ठि केशलोच करी छट्ठना तप सहित सिद्धने नमस्कार करी सर्वनुं पच्चक्खाण करी—

सावज्जं सयलं जोगं पच्चक्खामि त्ति भासए ।
मोक्खमग्गमहाजाणं चारित्तं पडिवज्जए ॥२०७॥

—सर्व सावद्य योगने पच्चक्खुं छुं-तजुं छुं एम कहे छे अने मोक्षमार्गना महायानरूपी चारित्रने स्वीकारे छे-दीक्षा ले छे.

आ वखते प्रभुने मनःपर्यवज्ञान उत्पन्न थयुं. हजार राजानी साथे व्रत लीधुं ने पछी पोमपुर-पद्मपुरना स्वामी सोमदत्त राजाने त्यां बीजे दिने परमान्नथी पारणुं कर्युं. पंच वसुधारा थई. त्रण मास विहार करी पुनः सहस्राम्रवनमां आवतां त्यां छट्ठना तपे सहित फागुण कृष्ण सातमीए अनुराधा नक्षत्रमां चंद्र हतो त्यारे केवलज्ञान उत्पन्न थयुं. पछी इंद्रो-देवताओए समवसरण रच्युं. स्वामी सिंहासने विराजे छे. सौधर्मेन्द्र (संस्कृत श्लोक २८८ थी २९५मां) प्रभुनी स्तुति करी तेमने देशना आपवा प्रार्थना करे छे. प्रभु कर्मविचार पर देशना आपे छे. आ कर्मविचार जोतां ग्रंथकारनुं जैन कर्म-फिलसुफीनुं अच्छुं ज्ञान जणाय छे. देशना पुरी थतां गणधर दत्त के जे अजापुत्रनो जीव हतो तेणे स्वामीना पूर्वभव केवा हता के जेथी तीर्थंकरत्व प्राप्त थयुं एम पूछतां स्वामी पोताना पूर्व भव जणावे छे. रत्नसंचया नगरीमां पद्म नामनो राजा थयो. काले जुगंधर नामना आचार्य आवतां तेमनी पासे जतां ते राजा तेमनो उपदेश सांभळे छे. ते आचार्य देशनामां पुण्यथी सर्व वांछित मळे छे एम कही पुण्यपर मदनसुंदरनी कथा कहे छे (पा.नं. ३४२-३५९) अने अपुण्यपर मंगलनी कथा कहे छे (पा.नं. ३६०-३६६), पछी संस्कृत भाषामां विनयनुं माहात्म्य कही ते पर विनीतनी कथा (पा.नं. ३६७-३७२) अने दुर्विनयपर भोगराजनी कथा (पा.नं. ३७३-३७९), दाननुं माहात्म्य कही ते पर कामकेतुनी कथा (पा.नं. ३८०-३८९), के जे कथामां अभयदानपर सोमनी आडकथा (पा.नं. ३९०-३९४), उपरोधदानपर सुंदरनी

आडकथा (पा.नं. ३९५-३९९), भावनादानपर वणिक्सुतनी आडकथा (पा.नं. ४००-४०४) आवे छे. अदानपर कुरंगनी कथा (पा.नं. ४०८-४१३), शीलपर मंत्रिपुत्रीनी कथा (पा.नं. ४१४-४२०), दुःशीलपर श्रीकान्तानी कथा (पा.नं. ४२१-४२८), तपपर नागकेतुनी कथा (पा.नं. ४२९-४३४), अतपपर मानपुंजनी कथा (पा.नं. ४३५-४४०), भावनापर असंमतनी कथा (पा.नं. ४४१-४४६), अभावनापार वरुणनी कथा (पा.नं. ४४७-४५३), अभिग्रहपर सिद्धनी कथा (पा.नं. ४५६-४५८) कहे छे. आ कथामय देशना युगंधरसूरि पासेथी पद्मराजाए सांभळी तेमनी पासे प्रव्रज्या-दीक्षा लीधी अने २० स्थानकथी तीर्थंकरनुं नाम गोत्र कर्म उपार्जन कर्युं. पछी आयुष्य पुरुं करी वैजयन्तमां जई त्यां आयुष्य पुरुं करी आ तीर्थंकर थया. आम ए पूर्वभवो आठमा तीर्थंकरे पोते ज कही बताव्या अने चंद्रप्रभास नामना समुद्रतीरे ते तीर्थंकर समोसर्या.

सर्व देवोए समवसरण कर्युं ने तेमां सिंहासनपर बेसी चंद्रप्रभ स्वामीए देशना आपी के 'धर्मोमां प्रथम धर्म प्राणरक्षा छे ने अहिंसाव्रतपर मंत्रिदासीनी कथा (पा.नं. ४६१-४६७), पछी सत्यव्रतपर स्मरनंदननी (पा.नं. ४६८-४७३), अदत्तादानव्रतपर दानप्रियनी (पा.नं. ४७४-४८०), ब्रह्मचर्यव्रतपर मदनमंजरीनी (पा.नं. ४८१-४८९) अने परिग्रह प्रमाणव्रतपर धर्ममतिनी (पा.नं. ४९०-४९८) कथाओ कही, पछी टुंकमां दिग्विरति, भोगोपभोगपरिमाण, अनर्थ दंडत्याग ए त्रण गुणव्रत अने सामायिकादि चार शिक्षाव्रतनुं स्वरूप तथा सात तत्त्वोनुं स्वरूप कही बताव्युं. (पा.नं. ४९९-५०६)

पछी तीर्थंकर विहार करे छे. तेमनो परिवार अगाउ श्रीहेमाचार्य जणावे छे ते प्रमाणे अत्र जणावेल छे. तीर्थंकर सम्मेत पर्वत पर आव्या त्यां मोक्षकाल जाणी हजार मुनिसहित एक मासनुं अनशन आदर्युं. आसनकंपथी इंद्रे त्या आवी वंदन कर्युं.

नभस्यकृष्णसप्तम्यां श्रवणस्थे निशाकरे ।
चन्द्रप्रभः प्रभुस्तस्थौ ध्याननिष्कम्पमानसः ॥

—भादरवा मासनी कृष्ण सप्तमीने दिने चंद्र श्रवण नक्षत्रमां आवतां ध्यानमां निष्कंप मनवाळा रहेला चंद्रप्रभ सर्व योगोनुं रुंधन करी चतुर्थ ध्यान धरी क्षीणकर्म थई परमपदने पाम्या.

आ रीते श्री चंद्रप्रभ स्वामीनुं चरित टुंकमां छे तेनो विस्तार जुदे जुदे समये देशनादि द्वारा अनेक कथाओ गोठवी करवामां आव्यो छे.

ग्रंथकारनी सामे श्रीहेमचंद्रसूरिनुं त्रिषष्टिशलाका पुरुषचरितमां आपेलुं चंद्रप्रभचरित हतुं एम स्पष्ट जणाय छे. तेना प्रमाणमां जोइशुं तो ज्यारे पूर्वभवना पद्म राजा दीक्षा ले छे ते माटे नीचेनुं हेमाचार्य जणावे छेः–

भवस्य छेदनायाऽथ गिरेरिव पविं हरिः ।
अग्रहीत्स परिव्रज्यां युगन्धरगुरोः पुनः (रः) ॥९॥

विविधाऽभिग्रहो दान्तो विहितेन्द्रियनिग्रहः ।
स्वविग्रहेऽप्यनाकाङ्क्षश्चिरं सोऽपालयद् व्रतम् ॥१०॥

आनी साथे सरखावो ग्रंथकार जे श्लोको मूके छे तेः–

श्रुत्वेति देशनां पद्मः संसारोत्तारणक्षमाम् ।
अग्रहीत् स परिव्रज्यां युगन्धरगुरोः पुरः ॥१॥

विहिताऽभिग्रहो दान्तो विहितेन्द्रियनिग्रहः ।
स्वविग्रहेऽप्यनाकाङ्क्षश्चिरं सोऽपालयद् व्रतम् ॥२॥ पान १४७

६

अन्य चरितकारो

श्री हेमचंद्राचार्यना समयमां ज, उपकेश गच्छना देवगुप्तसूरि-कक्क-सिद्ध-देवगुप्तसूरिना शिष्य यशोदेवसूरिए आशावल्लीपुरिमां आरंभी अणहिलवाड पाटणमां सं. ११७८मां चंद्रप्रभचरित्र प्राकृतमां रची पूर्ण कर्युं हतुं. (जेसलमेर भंडारसूचि ३३) अने कुमारपाल राज्ये हरिभद्रसूरि थया के जेओ बृहद्गच्छना जिनचंद्रसूरिना बे शिष्यो नामे आम्रदेवसूरि अने श्रीचंद्रसूरि पैकी श्रीचंद्रसूरिना शिष्य हता, तेओ गूर्जर राजधानी पाटणमां घणो काल रह्या छे अने राजमंत्रीओ साथे विशेष परिचय तेमनो हतो, ए पण स्पष्ट छे. सिद्धराज अने कुमारपाल ए बंने राजवीना महामात्य मंत्री पृथ्वीपालनी प्रार्थनाथी आ आचार्ये चोवीसे जैनतीर्थंकरोनां चरित्रो प्राकृत अपभ्रंशादि भाषामां रच्यां हतां - तेमांना चंद्रप्रभचरित्र, मल्लिनाथचरित्र अने नेमिनाथ चरित्र ए त्रण हजु सुधी पाटणमां उपलब्ध थयां छे, के जेटलानुं श्लोकप्रमाण २४००० छे. बृहत् टिप्पनिका प्रमाणे चंद्रप्रभ चरित्रनुं प्रमाण ८०३२ श्लोक छे. नेमिनाथ चरितनी रचना

साल सं० १२१६ छे तो चंद्रप्रभचरितनो पण ते लगभग रचना समय छे. [जुओ मारो 'जैनसाहित्यनो इतिहास' पारा ३९७) सं. १३०२ मां सर्वानन्दे ६१४१ श्लोकमां संस्कृतमां चंद्रप्रभचरित रच्युं (बृ.टि. तथा पाटण भंडार) अने ए उपरान्त कोई आंचलिक गच्छनाए ते चरित रच्युं छे के जेनी ९९ पत्रनी प्रत जामनगरमां छे; अने चंद्रप्रभचरितपर विषमपदवृत्ति खरतरगच्छना जिनपतिसूरि शिष्य जिनचंद्रसूरिए रचेल छे (पाटण भं.) अने साधुसोमे प्राकृत चंद्रप्रभचरितपर वृत्ति १३१६ श्लोकप्रमाण रची एम जैन ग्रंथावली पृ. २३९मां जणाव्युं छे.

आ चरितनुं गूजराती भाषांतर भावनगरनी श्रीजैन आत्मानंद सभा तरफथी (श्री जैन आत्मानंद ग्रंथमाला नं. ६१ अने शेठ दीपचंद गांडाभाई ग्रंथमाला नं.१ तरीके) हमणां ज बहार पड्युं छे.

लोहार चाल,
मुंबई, ता. २९-३-३०.

मोहनलाल दलीचंद देशाई
B.A., LL.B., एडवोकेट

[आलेखमां वापरेल टूंकाक्षरीनी समज: जि०=जिनविजय संपादित प्राचीनलेखसंग्रह; ना०=पूरनचंद नाहरकृत जैनलेखसंग्रह; बु०=बुद्धिसागरसूरिना जैनधातुप्रतिमालेखसंग्रह, वि०=विजयधर्मसूरिनो प्राचीनलेखसंग्रह; आंकडामां पहेलो आंकडो पुस्तकनो भाग अने बीजो आंकडो लेखनो नंबर सूचवे छे.]

चरित्रस्याऽस्य संक्षेपतो विषयाऽनुक्रमणिका

प्रथमः परिच्छेदः ।

	विषयः	पत्राऽङ्कः
	પુનઃ પ્રકાશકની પ્રસ્તાવના	९
	પૂર્વ આવૃત્તિની પ્રસ્તાવના	१०
	विषयानुक्रम	४०
१	मङ्गलाऽऽचरणम् पीठिका च	१
२	सत्त्वेऽजापुत्रकथा	५
३	अजापुत्रकथाऽन्तर्गता आरामनन्दनकथा	५१
४	०हरिषेण-श्रीषेणकथा	१०२
५	०जीमूतवाहनकथा	१४०
६	०सत्यहरिश्चन्द्रकथा	१५०
७	०श्रीवज्रायुधकथा	१८९
८	अजापुत्रस्य गुरुसमीपे व्रतग्रहणम्, पूर्वभवपृच्छा, जयराजकथा च	२०५-२०७
९	रत्नमालाकथा	२३३
१०	दुष्यन्त-शकुन्तलाकथा	२५१
११	व्रतानि प्रपाल्य अजापुत्रस्य स्वर्गप्राप्तिः, प्रथमपरिच्छेदसमाप्तिश्च	२७१

॥ श्रीचन्द्रप्रभवे नमः ॥

नागेन्द्रगच्छनभोनभोमणि-श्रीमद्देवेन्द्रसूरिसन्दब्धं

चन्द्रप्रभचरित्रम् ।

दृष्टोऽपि हृष्टजनलोचनचन्द्रकान्त-मश्रान्तमान्तरजलाऽऽविलमादधानः ।
चन्द्रप्रभो जयति चन्द्र इवेशमित्रं, चित्रं पुनः शुभशताय यदष्टमोऽपि ॥१॥

क्षेत्रेऽखिले भरतनामनि बोधिबीजं, वापाय यः किल पुराऽऽदिधुरामुवाह ।
अंसस्थलस्थितिरसौ किणकालिमेव[१], केशाऽऽवलिर्विजयतां वृषभस्य तस्य ॥२॥

आसन्नोऽपि[२] चरन् भवेद्द्विरसनोऽन्येषां भिये किं पुनः,
प्रारूढः शिरसीत्यवेत्य सभयं कर्माणि यस्मादगुः ।
विश्वव्याधिवितानतानवपटुर्[३]विघ्नौघमेघाऽनिलः,
श्रीमोक्षाऽम्बुजभृङ्गपुङ्गवगतिः पायात्स पार्श्वप्रभुः ॥३॥

जेतव्यं पवनं स कौशिकफणी दंशच्छलेनाऽपिबत्,
तद्दुःखेन किल व्यलीयत मनो नाऽभून्मनोभूस्ततः ।
छाद्मस्थ्येऽप्यमनस्कता सुरवधूसन्धाऽनुबन्धो[४]ऽथ सः,
व्यर्थोऽभूत् सुखमेव यस्य स महावीरोऽस्तु नः श्रेयसे ॥४॥

---

१. रूढव्रणपदं-किणः ।
२. 'पि वरं भ' हं० सं० उ० । 'पि विभोर्भ' क० ।
३. तनोः-सूक्ष्मस्य भावस्तानवम् ।
४. अनुबन्धः मेलापकः ।

अन्ये दिशन्तु सुदशां द्विदशा[१] जिनेन्द्राः,
तन्द्रामपास्यतु मम श्रुतदेवता च ।
दृष्टोऽस्मि यैर्धवलया स्वदृशा गुरूंस्तान्,
वन्देऽथ गौतममुखान् गणधारिणश्च ॥५॥

इत्थं त्रिधा प्रणतवानिह विघ्नघात-निघ्नान[२]मूनथ निजाऽभिमते यतिष्ये ।
तच्चाऽर्हतश्चरितकीर्त्तनमष्टमस्य, तच्छ्रूयतां स्थिरसुखाय शिवाय भव्याः ! ॥६॥

धर्मं चतूरूपमुपैति यस्तं, त्यजन्त्यपास्या गतयश्चतस्रः ।
ततत्पारिशेष्याद्गतिरस्य शस्या, स्यात्पञ्चमी हन्त ! यतध्वमत्र ॥७॥

इह तावत्किलाऽऽत्मानः, कर्मभिर्जातिवैरिभिः ।
अनन्तकायकारायां, बद्ध्वा क्षिप्ता वसन्ति भोः ? ॥८॥

सम्मर्दादिव चाऽन्योन्यं, तदन्तःस्थातुमक्षमाः ।
कथञ्चिद् यान्ति प्रत्येकवनस्पत्यङ्गणेऽथ ते ॥९॥

कुर्वन्तोऽपि ततो नंष्टुं, कर्मभ्यो बिभ्यतः किल ।
मेध्या गाव इवाऽत्रैव, भ्राम्यन्तः सन्ति ते चिरम् ॥१०॥

यथाप्रवृत्तिकरणाद्, मुक्तास्तद्बन्धनादमी ।
पृथ्वीकायाऽऽदिगर्त्तासु, पतन्ति यदचेतना[३]ः ॥११॥

तत्राऽपि स्वस्वकायेषु, घाततादनपीडनैः ।
अविश्रान्तामनिर्वाच्यां, कष्टकाष्ठां भजन्ति ते ॥१२॥

कथञ्चित्कर्मकल्लोलैरेकाऽक्ष[४]त्वमहोदधेः ।
विकलेन्द्रियकूलेषु, क्षिप्यन्ते ते क्षणादपि ॥१३॥

यथा कृष्णतिलश्रेणौ, स्यादेको ह्युज्ज्वलस्तिलः ।
दुष्कर्मराशौ सहजस्तद्वत्कर्मलवः शुभः ॥१४॥

---

१. विंशतिः ।
२. शत्रून् ।
३. मन्दचेतना इत्यर्थः ।
४. एकाक्षत्वं-एकेन्द्रियत्वम् ।

कथञ्चिद्दैवयोगात्ते(त्तैः), तेनैकेन सुकर्मणा ।
दुष्कर्मराशेरुद्वेल्य, प्राप्यन्ते जन्म पञ्चखम्[१] ॥१५॥

पञ्चेन्द्रियत्वसारण्यां, वहन्तो वारिवत्त्वमी ।
स्थानेषु नीचनीचेषु, यान्ति दुष्कर्मणेरिताः ॥१६॥

विना धर्माऽम्बुयन्त्रेण, प्रोच्चैरारोढुमक्षमाः ।
अधोऽधो जलवद्यान्तो, व्रियन्ते रजसैव ते ॥१७॥

अपि पञ्चेन्द्रियत्वाऽऽदौ, न्यस्ताः सत्कर्मवारिदैः ।
दुष्कर्मदर्शिताऽध्वानो, रजःपुञ्जे पतन्त्यधः ॥१८॥

चेत्सुवर्णैकविस्तारे, पञ्चाऽक्षत्वसुराऽचले[२] ।
ते मनुष्यत्वकल्पद्रुस्थानके यान्ति वारिवत् ॥१९॥

ततो मर्त्यत्वकल्पद्रुः, सच्छायः फलतीह यत् ।
स्वाऽभिप्रेतफलं सोऽयं, तत्रैषां जायते गुणः ॥२०॥

गुणेन प्रावृता जीवाः, साधुवृत्ता भवन्ति च ।
क्रीडाकन्दुकवद्दैवात्, पतित्वाऽप्युत्पतन्त्यमी ॥२१॥

क्रोधमानमायालोभाः, स्वैरं क्रीडनकाम्यया ।
दधत्याशु रजःपुञ्जे, तानुच्चैर्जीवकन्दुकान् ॥२२॥

तत्प्राप्तिस्थानं स्वदले, कुर्वते नरकानमी ।
तानाहन्तुं दधत्येते, कुविद्यां[३]ऽनृजुयष्टिकाम् ॥२३॥

तान् व्यावर्त्तयितुं पश्चात्, दलेऽभूवन् द्वितीयके ।
दानशीलतपोभावाः, कषायप्रतिपक्षिणः ॥२४॥

तत्प्राप्तिस्थानमेतेषां, निर्वाणपदभूमिका ।
श्रद्धैव सरला तेषां, तानुत्क्षेतुं तु यष्टिका ॥२५॥

---

१. पञ्च खानि-इन्द्रियाणि यस्मिन्, पञ्चेन्द्रियमित्यर्थः ।
२. पञ्चेन्द्रियत्वम् ।
३. कुविद्या एवाऽनृजु-वक्रयष्टिका ताम् ।

मिलित्वा ते द्वये[1] पक्षा, वामतोऽसव्यतः स्थिताः ।
आहन्यन्ते कषायैः प्राक्कन्दुकास्ते कुविद्यया ॥२६॥

तैरेकेनैव घातेन, प्राप्यन्ते श्वभ्रभूमिकाम् ।
तिष्ठन्त्यप्रगुणी[2]भूता, दानाऽऽद्यास्तु तथैव हि ॥२७॥

एकशस्तान्पराभूय, दानाऽऽदीनपरिक्रमान् ।
कषाया दधते भूयो, रजस्यैवाऽऽत्मकन्दुकान् ॥२८॥

कथञ्चित्सज्जैर्दानाऽऽद्यैः, प्रेर्यन्ते श्रद्धयोर्ध्वकाः ।
गच्छन्तोऽर्धपथादूर्ध्वात्पात्यन्ते क्रुद्दलेन ते ॥२९॥

नीयन्ते स्वप्रतिज्ञातां, सुखेन श्वभ्रभूमिकाम् ।
प्रत्याहर्त्तुं तदग्राऽऽत्तान्, दानाऽऽद्याः पङ्गवः स्थिताः ॥३०॥

एवं च नित्यशोऽप्युद्यत्कषायैर्जितकासिभिः ।
दानाऽऽदेरग्रतोऽप्येते, नीयन्ते तां स्वभूमिकाम् ॥३१॥

कषायैर्बलिभिर्ज्ञात्वा, पराभूतं स्वमुच्चकैः ।
दानशीलतपोभावास्ताम्यन्त्यप्रभविष्णवः ॥३२॥

प्राप्तनैःस्व्यकुटुम्बस्य, मानुषाणीव ते मिथः ।
अशक्ताः कलहायन्ते, तद्व्यावृत्तिविधौ ततः ॥३३॥

दानमाह किमत्राऽहं, कुर्वे यत्क्लीबमस्मि भोः ! [भो !] ।
मया हि पोषितेनैव, कार्यमाचर्यतेऽखिलम् ॥३४॥

स्वमेव पोषयद्भिश्च, कषायैस्ते वशीकृताः ।
आत्मानो मां न पुष्णन्ति, तत्क्रमात्क्षीणमस्मि भोः ! ॥३५॥

एवं शीलाऽऽदयोऽप्याख्यन्, स्वां स्वां क्षैण्यदशां मिथः ।
ततः स्वयमशक्तास्ते, सत्त्वाऽपेक्षां प्रकुर्वते ॥३६॥

---

१. क्रोधादयो दानादयश्च ।
२. असमर्थीभूताः ।

तत्सत्त्वं दुर्लभञ्चाऽत्र, क्वचिदेव हि दृश्यते ।
यस्याऽस्ति सत्त्वं दानाऽऽद्या, आश्रयन्ति तमेव हि ॥३७॥

सात्त्विकाऽऽश्रयणाद्भूत्वा, पुष्टा दानाऽऽदयः स्वयम् ।
पराभूय कषायांश्च, जीवान्मोक्षं नयन्त्यमी ॥३८॥

ततश्चतुर्विधो धर्मः, सत्त्वेनौजायते खलु ।
अन्यत्राऽपि यशोऽर्थाऽऽदौ, सत्त्वं तत्त्वं प्रगल्भते ॥३९॥

येन तत्सत्त्वमाश्रित्य, दानाऽऽदीनुपचित्य च ।
सर्वेषामात्मनां स्वेन, मोक्षमार्गः प्रदर्शितः ॥४०॥

त्रिजगत्स्वामिनस्तस्य, निर्निमित्तोपकारिणः ।
चन्द्रप्रभजिनेन्द्रस्य, चरितं कीर्त्तयिष्यते ॥४१॥

भवेऽभूदादिमे स्वामिजीवः पद्माऽभिधो नृपः ।
वैजयन्तेऽपरे देवश्चन्द्रप्रभजिनस्ततः ॥४२॥

उत्पन्ने केवलज्ञाने, स्वामी पूर्वभवौ निजौ ।
दत्तगणभृता पृष्टः, स्वेनैव कथयिष्यति ॥४३॥

स्वामिराज्याऽऽदिराजस्य, स्वाम्याद्यगणधारिणः ।
अजापुत्रनरेन्द्रस्य, सत्त्वे प्राक्कथ्यते कथा ॥४४॥

तथाहि- जम्बूवृक्षः समस्तीह, शाश्वतोऽथ सदाफलः ।
वार्धिद्वीपा इतीवाऽस्थुर्यं वृत्तीभूय सर्वतः ॥४५॥

शेषकीलकमूर्धस्थे, मेरुमृत्पिण्डमण्डिते ।
ज्योतिष्का भाण्डवज्जाता, यस्मिन् कुलालचक्रवत् ॥४६॥

ग्रहाणामिव तिग्मांशुर्धर्मोऽर्थानामिव ध्रुवम् ।[1]
द्वीपानामादिमो द्वीपो, जम्बूद्वीपोऽस्ति सोऽद्भुतः ॥४७॥ [त्रिभिःविशेषकम्]

१. चतुर्णां पुरुषार्थानाम् ।

तत्त्वानीव[१] मते जैने नभसीव महर्षयः ।
धातवो वपुषीवाऽत्र, सन्ति क्षेत्राणि सप्त वै ॥४८॥

षट्कलायुतषड्विंशत्यधिकैः पञ्चभिः शतैः ।
योजनानां मितं क्षेत्रं, तत्राऽस्ति भरताऽभिधम् ॥४९॥

हैमचैत्यस्थतीर्थेशबिम्बस्नात्रोत्सवाऽऽदिभिः ।
तत्राऽतिमेरुचूलाऽस्ति, श्रीमच्चन्द्राऽनना पुरी ॥५०॥

यस्यां नद्यामिवाऽर्णोभिः, पूर्णायां रत्नरश्मिभिः ।
मज्जन्त्यर्ककराश्चित्रं, व्योमाऽब्धितरणक्षमाः ॥५१॥

वासोर्ध्वकुट्टिमाऽऽरूढतरुण्याऽऽस्येन्दुसंहतौ ।
लाञ्छनादङ्गुलीदर्श्यो, यस्यां विज्ञायते शशी ॥५२॥

पृष्ठोपवननीलाऽश्मवेश्मान्याभान्ति यत्र च ।
लुलितकलापा भूमावासीना इव केकिनः ॥५३॥

सरित्कूपसरोवापीशालिन्यामपि यत्र न ।
महच्चित्रं विलोक्यन्ते, कूपदेशा[१] जलाशयाः[२] ॥५४॥

चन्द्रापीडो नृपस्तस्यामभूदिन्दुरिवाऽम्बरे ।
रिपुस्त्रीनेत्रकुमुदकोशाऽऽकृष्टाऽश्रुषट्पदः ॥५५॥

यत्खड्गः प्रतिराजमूर्धसु पतंस्तद्धालराज्याक्षराण्या-
दायाऽन्तरधारणापटुतयाऽभूत् पुष्करैः साक्षरः ।
क्षत्रच्छात्रजनाय नायकतया भूयो ददत्तान्युपाध्यायत्वं
तनुते स्म विस्मयकरं विद्वज्जनानां हृदि ॥५६॥

अपि च- येषामुद्धतयुद्धशुद्धवपुषामुत्खातकीर्त्यब्जिनी-
कन्दच्छेदविनोदमेदुरमुदा येनाऽत्र विक्रीडितम् ।

---

१. "जीवाजीवाश्रवसंवरबन्धनिर्जरामोक्षास्तत्त्वम्" तत्त्वार्थ० अ०१ सू०४ ।
२. कुत्सितोपदेशो येषाम् ।
३. जड आशयो येषाम् ।

त्यक्त्वा तद्दयिताऽश्रुमिश्रणकवोष्णाऽम्भोभुवो यद्यशो-
हंसोऽगाद् द्युधुनीं स तैर्दिविषदीभूतैर्वृतः शत्रुभिः ॥५७॥

तत्राऽभूद्धर्मनिष्णातो, धर्मोपाध्यायसञ्ज्ञकः ।
द्विजः शान्तो दयागेहं, ज्योतिःशास्त्रविशारदः ॥५८॥

गङ्गानाम्नी च तस्याऽभूद् गृहिणी पतिदेवता ।
षट्पुत्राऽनन्तरं तस्याः, सप्तमस्तनयोऽजनि ॥५९॥

निरैक्षिष्ट द्विजः सूनोर्जन्मग्रहफलं स्वयम् ।
अज्ञासीच्च यदेषोऽत्र, पुरे भावी नृपोत्तमः ॥६०॥

अथाऽसौ चिन्तयामास, विषादाऽऽपन्नमानसः ।
द्विजवंशप्रतीपोऽयं, हहा ! जातः सुतो मम ॥६१॥

यद्याश्रमगुरू राजा, विष्णुमूर्तिः स यद्यपि ।
तथाऽप्यस्मिन् न मे प्रीतिर्यद्राज्यं नरकप्रदम् ॥६२॥

पूर्वे जन्मन्ययं सूनुस्तत्पुण्यं समुपार्जयत् ।
येनाऽवश्यं विधातव्यं, राज्यमत्र पुरेऽमुना ॥६३॥

यद्येष मद्गृहे तिष्ठन्, राज्यं प्राप्स्यति दैवतः ।
तदा द्विजकुलाऽऽचारं, तद्व्यग्रो न करिष्यति ॥६४॥

एनं राजानमाश्रित्य, मद्वंश्याः सुखलम्पटाः ।
न ब्राह्मण्यक्रियाः कुर्युस्ततोऽप्यस्मत्कुलक्षतिः ॥६५॥

यो यस्यां समभूज्जातौ, स तदाचारवर्जितः ।
ऋद्धोऽपि निन्द्यते मर्त्योऽनधीयान इव व्रती ॥६६॥

धिग्मामहह ! येनैष, पुत्रो जातः क्रमाऽपहः ।
धिग्धिगेषोऽपि राज्याऽर्हो, मद्गेहे यदवातरत् ॥६७॥

तदेनं स्वकुलोत्तीर्णं, न दोषस्त्यजतो मम ।
न चाऽप्येष मया त्यक्तः, पुष्टपुण्यो विनङ्क्ष्यति ॥६८॥

विचिन्त्यैवं गृहिण्यै चाऽऽचख्यौ यत्तनयस्तव ।
अस्मत्कुलसमुच्छेदी, तदेनं त्यज कुत्रचित् ॥६९॥

यतः-समयः कदाऽपि स स्यादिष्टत्यागोऽपि यत्र निर्वृत्तये ।
स्नेहाल्लालितमूर्धजकर्त्तनमिव रोगखिन्नस्य ॥७०॥

साऽऽकर्ण्य तद्वचः पत्युर्दुःखाऽद्वैतमुपेयुषी ।
सस्वजे मूर्च्छया पुत्रत्यागाऽऽज्ञाविस्मृताविव ॥७१॥

पूर्वप्रविष्टभर्त्राऽऽज्ञा, मनोदुर्गाद् बलादपि ।
मूर्च्छामनाशयत्तस्याः, सपत्नीमिव दूरतः ॥७२॥

स्वीचक्रे सा ततः शोकं, परिदेवनरोदनैः ।
आश्लिष्टव्यसनः कष्टं, न कैः कैरभिभूयते ? ॥७३॥

यतः-इष्टमदृष्टमनिष्टं, दृष्टं कष्टं न कष्टमिह नष्टम् ।
कथय कथं कथयामः, संसाराऽसारतां वचनैः ? ॥७४॥

तादृक्पुत्रपरित्यागदुःखभल्लीनिराकृतौ ।
भर्त्राज्ञां कवचीकृत्य, निस्ससार बहिर्गृहात् ॥७५॥

धिक्कुर्वती किलाऽऽत्मानं, पुत्रत्यजनकर्मणा ।
अत्याक्षीदर्भकं गङ्गा, जातमात्रं प्रगेऽध्वनि ॥७६॥

वारं वारं निवृत्यैनं, चुम्बं चुम्बं शिरस्यसौ ।
रुदती कथमप्याऽऽगाद्भर्त्रादेशवशाद् गृहम् ॥७७॥

तदा च तेन मार्गेण, गच्छतस्त्वरितं बहिः ।
अजावृन्दादजा काचिदद्राक्षीदर्भकं भुवि ॥७८॥

रटतश्च पुराजन्ममातेव स्नेहविह्वला ।
नीचैर्भूयः स्तनं तस्य, मुखे स्तन्याऽर्थमक्षिपत् ॥७९॥

तस्या एवंस्थितायाश्च, प्रेरणाऽर्थं समापतन् ।
पशुपालः समालोक्य, तमादाय गृहं ययौ ॥८०॥

तनयाऽभावदुःखिन्यै, भार्यायै तं समर्प्य सः ।
तनयो देवताभिस्ते, दत्तोऽसावित्युवाच ताम् ॥८१॥

तयाऽपि पुत्रवत्स्नेहात् पाल्यमानस्तु बालकः ।
द्वादशाऽब्दप्रमाणाऽङ्गः, सञ्जातः पुष्टिभागसौ ॥८२॥

अजापुत्र इति नाम्ना, ताभ्यामाकार्यते स तु ।
पशुपालेन पित्रेव, सार्धं याति पशुव्रजे ॥८३॥

पशुपालेऽन्यदा तस्मिन्, ज्वरबाधामुपेयुषि ।
अजावृन्दं समादाय, ययौ बालो बहिः पुरात् ॥८४॥

इतश्चाऽऽखेटकाद्राजा, निवृत्तः स्वपुरं प्रति ।
अजापुत्रश्रितां शीतां, तरुच्छायामशिश्रियत् ॥८५॥

अथाऽकस्मात्प्रादुर्भूता, सर्वाऽङ्गीणविभूषणा ।
उवाच युवतिः काचिद्वाचमेनां नृपं प्रति ॥८६॥

चन्द्रापीड ! महीश ! त्वामेषोऽजापालबालकः ।
अन्ते द्वादशवर्षाणां, लक्षसैन्यो हनिष्यति ॥८७॥

उक्त्वैवं सा तिरोभूता, यावत्तावन्महीपतिः ।
भयविस्मयव्याप्ताऽऽस्यः, किमेतदित्यचिन्तयत् ॥८८॥

निश्चितं काचिदप्येषा, पुराऽधिष्ठातृदेवता ।
ततो मयि कृतप्रीतिर्भाव्यमर्थमचीकथत् ॥८९॥

अथाऽसौ वीक्ष्य तं बालं, रक्षन्तं चरतः पशून् ।
निश्चिकायेति दृप्ताऽऽत्मा, न किञ्चिद्देवतावचः ॥९०॥

अथाऽऽह सुमतिर्मन्त्री, राजानं प्रति वत्सलः ।
नाथ ! देव्यो गिरः किं स्युः, प्रलयेऽप्यनृतस्पृशः ? ॥९१॥

चित्ते चेत्तव गर्वोऽयं, यन्ममाऽस्मान्न मृत्युभीः ।
अयं तथाऽपि निर्वास्यः, पुरात्किमत्र दुष्करम् ? ॥९२॥

ओमित्युक्त्वा गते भूपे, मन्त्री भृत्यान् समादिशत् ।
मोच्यः सैष शिशुस्तत्र, यतोऽत्राऽभ्येति नो पुनः ॥९३॥

अजापुत्रं गृहीत्वा ते, प्रान्तरप्रान्तकानने ।
एकाकिनं रुदन्तं तं, मुक्त्वा स्वं पुरमाययुः[1] ॥९४॥

ततोऽजापुत्रकः काञ्चिद्दिशमुद्दिश्य जग्मिवान् ।
न प्राप काननप्रान्तं, भवाऽन्तमिव मूढधीः ॥९५॥

भ्रान्त्वा बहुदिनान्येष, वनपर्यन्तमीयिवान् ।
व्यवसायसहायो हि, कार्याऽन्तं याति मानवः ॥९६॥

गर्भवासादिवाऽरण्याद् बहिर्भूतः प्रमोदभाक् ।
दवीयसीं पुरीं काञ्चित्, सोऽपश्यज्जननीमिव ॥९७॥

ऋणं यद्वद्दरिद्रस्य, स्तोकं स्तोकं प्रयच्छतः ।
गच्छतः शनकैस्तस्य, न पन्थाः पर्यवस्यति[2] ॥९८॥

बुभुक्षाक्षामकुक्षित्वान्नाऽग्रतश्चलतः क्रमौ ।
पिपासातमसाऽऽक्रान्ते, न दूरं पश्यतो दृशौ ॥९९॥

एवं कष्टादसौ गच्छन्नवृक्षे तत्र वर्त्मनि ।
अपश्यद्यक्षवेश्मैकं, रम्यं तन्मूर्त्यलङ्कृतम् ॥१००॥

तस्य दक्षिणतश्चैकां, ज्वालालीढदिगन्तराम् ।
सुदुःसहधगद्वह्निपूर्णां गर्त्तां ददर्श सः ॥१०१॥

गर्त्तायाश्च चतुर्दिक्षूपविष्टांश्चतुरो नरान् ।
कौपीनवाससो वह्निज्वालां पातुमिवोद्यतान् ॥१०२॥

उपेत्य तानजापुत्रोऽपृच्छद्यूयं किमत्र भोः !? ।
आसीना वह्निगर्त्ताऽन्ते, चिन्ताऽऽपन्नाश्च किञ्चन ॥१०३॥

---

१. इत ऊर्ध्वम्-सं० तिरोभूताथ मातेव, देवता सा तमन्वगात् । स्थाने स्थानेऽस्य आश्चर्यं, दुर्घटं घटयिष्यति ॥ इत्यधिकमुपलभ्यते ।
२. पारं गच्छति ।

तेनेत्थमनुयुक्तास्ते, कथामकथयन्निजाम् ।
चम्पायां पुरि वास्तव्याश्चत्वारो भ्रातरो वयम् ॥१०४॥

कनीयसोऽस्य नो भ्रातुरेक एव सुतोऽभवत् ।
पूर्वजन्ममममत्वेन, सर्वेषां जीवितं स हि ॥१०५॥

अथाऽस्माकमपुण्येन, तस्य दुष्कर्मनिर्मितः ।
अभूद्रोगः स येनैष, भुङ्क्ते शेतेऽपि नाऽर्त्तिमान् ॥१०६॥

मन्त्रतन्त्रौषधैर्नैव, देवोपयाचनैर्न च ।
निवृत्तस्तस्य रोगस्तद्दुःखिताः स्मस्ततः परम् ॥१०७॥

अथैकेनोपदिष्टं नः, पुंसा वैदेशिकेन यत् ।
फलैर्वैश्वानरतरोर्यास्यत्यस्य शिशो रुजा ॥१०८॥

पृष्टोऽस्माभिः स आचख्यौ, वैश्वानरमहाद्रुमम् ।
अभिज्ञानप्रदानेन, गर्त्तायामत्र मध्यगम् ॥१०९॥

तदादेशाऽनुसारेण, वयं यावदिहाऽऽगताः ।
पश्यामस्तावदेतस्यां गर्त्तायां वह्निमुच्छिखम् ॥११०॥

दृश्यतेऽन्तःस्थितश्चैको वृक्षोऽसौ फलितः परम् ।
ज्वलदग्नौ हि गर्त्तेऽस्मिन्, प्रवेष्टुं कातरा वयम् ॥१११॥

आयाताः कष्टमाश्रित्य, नाऽऽदातुं फलमीश्महे ।
आसीनाः स्मस्ततश्चिन्ताराक्षसीस्तम्भिता इव ॥११२॥

अजासूश्चिन्तयामास, परोपकृतिकौतुकी ।
अहं तावद्विनङ्क्ष्यामि, क्षुधयाऽपि हि निश्चितम् ॥११३॥

अमीषां साधयाम्यर्थं, वपुषा गत्वरेण चेत् ।
तदा मे जन्मसाफल्यं, पुण्यायोपकृतिर्यतः ॥११४॥

यतः- स्वच्छप्रकृतीनन्योपकृतिकृतः स्वाऽऽत्मनाऽपि सत्कुर्य्यात् ।
स्वीचक्रे खननाऽऽर्त्तिं पयसः स्थित्यै सरोभूमिः ॥११५॥

सधैर्यं तानुवाचैष, मा यूयं भवताऽऽतुराः ।
मया कार्योऽयमर्थो वा, इत्युक्त्वा ऽऽर्त्तमाविशत् ॥११६॥

हहा ! प्लुष्टो विनष्टोऽयमिति यावद्वदन्ति ते ।
आत्तफलद्वयस्तावदजासूर्निरगाद् बहिः ॥११७॥

जय त्वं सात्त्विकाऽधीश !, जयाऽकारणवत्सल ! ।
अस्मत्कुटुम्बपुण्येन, जीव शाश्वतिकीः समाः ॥११८॥

परार्थाऽऽधानेच्छा रमयति मनो यस्य स पुमान्,
प्रिया यद्वागुच्चैः प्रथयति परार्थं स हि कृती ।
क्रियाभिर्यश्चैनं घटयति स पन्थाः स्तुतिगिरां,
प्रपन्नं यः कुर्यात्सततमपि वन्द्यः स तु सताम् ॥११९॥

एवमाशीर्जुषां तेषामार्पयत्स फलद्वयीम् ।
आत्तफलद्वयास्ते चाऽजापुत्रमभितुष्टुवुः ॥१२०॥

पप्रच्छुस्तममी गर्त्तादप्लुष्टो निरगाः कथम् ? ।
स ऊचे देवताऽन्तःस्था, मम सान्निध्यमादधौ ॥१२१॥

तुष्टा मत्साहसादेतत्, फलद्वयमदान्मम ।
स्वयं चाऽऽनीय मुक्तोऽस्मि ज्वलद्गर्त्ताद् बहिस्तया ॥१२२॥

निशम्यैवं तमूचुस्ते, त्वमेको भुवि सात्त्विकः ।
त्वं परार्थेऽत्यजः प्राणान्, स्मः स्वाऽर्थेऽपि कातराः ॥१२३॥

फलमेकं गृहाण त्वं, कार्यं स्यादमुना क्वचित् ।
एकेनाऽस्मच्छिशो रोगो, महाभाग ! गमिष्यति ॥१२४॥

एवमुक्त्वाऽर्पयित्वा तदजापुत्राय ते फलम् ।
इष्टाऽर्थप्राप्तिसन्तुष्टाश्चलिताः स्वपुरं प्रति ॥१२५॥

अजापुत्रोऽपि तत्कार्यसम्पादनप्रमोदितः ।
पुरीं प्रति चचालैकं, फलमादाय सत्वरम् ॥१२६॥

पितेव तनयैर्वृक्षैः, सफलैः सुभगं सरः ।
पथि दृष्ट्वा जहर्षाऽयं, दातारमिव याचकः ॥१२७॥

अथाऽसौ पालिमारुह्याऽसह्यमार्गश्रमाऽऽकुलः ।
ग्रन्थिबद्धफलां मुक्त्वा, पटीमधिजलं ययौ ॥१२८॥

दुःखाऽऽर्त्त इव धर्मोपदेशं प्राक् स जलं पपौ ।
पश्चाद् व्रतमिव स्नानं, विधातुमुपचक्रमे ॥१२९॥

इतश्च मर्कटः कश्चित्परिभ्राम्यन्नितस्ततः ।
कण्ठपीठलुठन्मुक्ताहारोऽगात्तां पटीं प्रति ॥१३०॥

सफलग्रन्थिमाघ्राय, फलमत्तुं कृतस्पृहः ।
पादाग्रैर्ग्रन्थिमुद्ग्रन्थ्य, फलमादाय नष्टवान् ॥१३१॥

अजापुत्रः कृतस्नानो, यावद् याति पटीं प्रति ।
फलशून्यामपश्यत्तां, पुत्रशून्यामिव स्त्रियम् ॥१३२॥

पटीं निभृतमालोक्य, फलं यावन्न पश्यति ।
भयविस्मयमूढात्मा, तावदेतदचिन्तयत् ॥१३३॥

अरण्यस्थे सरस्यस्मिन्नसत्यन्यजनेऽधुना ।
अकस्मात्केन मत्पुण्यमिव हाऽपहृतं फलम् ॥१३४॥

निक्षिप्य चक्षुषी दिक्षु, यावदास्ते स विस्मितः ।
तावदागात्पुमानेको, मूर्त्तिमानिव मन्मथः ॥१३५॥

तूर्णमभ्यर्णमभ्येत्य, सोऽजापुत्रं कृताऽञ्जलिः ।
नत्वाऽवोचदिमां वाचं, सुधासब्रह्मचारिणीम् ॥१३६॥

शाखामृगचरः[१] सोऽहमादां फलमिदं तव ।
तद्वृन्ताऽग्ररसाऽऽस्वादाज्जातोऽस्मि पुरुषः क्षणात् ॥१३७॥

---

१. पूर्वं शाखामृगः, इति शाखामृगचरः 'भूतपूर्वे चरट्' ५।३।५३।

तत्प्रसीद गृहाण त्वमक्षतं फलमात्मनः ।
एनां मुक्तास्रजं चाऽपि, गृहाणाऽनुगृहाण माम् ॥१३८॥

अतःप्रभृति दासोऽस्मि, भृत्योऽस्मि किङ्करोऽस्मि ते ।
दत्तो नाथ ! त्वया यन्मे, दुष्प्रापो मानुषो भवः ॥१३९॥

त्वया सह समेष्यामि, छायावद्यत्र यास्यसि ।
इत्युदीर्य ततः सोऽस्मै, सहारं फलमार्पयत् ॥१४०॥

अजापुत्रः स तां वाचमाकर्ण्येति व्यचिन्तयत् ।
ममैतद्देवतादत्तफलस्य प्रथमं फलम् ॥१४१॥

गतं तैरश्च्यमेतस्य, रम्यं मर्त्यत्वमागतम् ।
एकाकिना न गन्तव्यमित्यर्थेऽभूत्सखा च मे ॥१४२॥

देवताऽधिष्ठितैर्मन्त्रफलचूर्णौषधाऽम्बुभिः ।
जन्तो रूपपरावर्तः श्रूयते नाऽत्र संशयः ॥१४३॥

इत्यालोच्य समादाय, तदर्पितफलस्रजौ ।
चचाल सार्धमेतेन, शाखामृगनरेण सः ॥१४४॥

वीक्ष्याऽस्ताऽचलचूलस्थमजापुत्रस्त्वहर्पतिम् ।
शाखामृगनरं प्रोचे, मुग्धवैदग्ध्यवागिति ॥१४५॥

हासोच्छ्वासितकैरवोद्यदलिनीध्वानध्रुवाऽगीतिभिः,
संसूच्याऽर्कनटस्तमोयवनिकां यत्प्राप्य निष्क्रामति ।
तन्नक्षत्रविचित्रपात्रसुभगव्योमैकरङ्गाऽङ्गणे,
तामुत्क्षिप्य वयस्य ! पश्य भविता राज्ञः प्रवेशोऽधुना ॥१४६॥

प्रदोषसमये देवकुलिकां तावपश्यताम् ।
भीषणाऽत्राऽहमेवेति, भुवोत्क्षिप्ताऽङ्गुलीमिव ॥१४७॥

अथ तौ खिन्नसर्वाऽङ्गौ, वासाऽर्थं तत्र जग्मतुः ।
शाखामृगनरः सुप्तो, जागर्त्यजासुतः पुनः ॥१४८॥

तदा च यक्षवेश्माऽन्तरकस्मादतिनिर्भरः ।
समुद्योतोऽभवद् ध्वान्तकान्तारदावपावकः ॥१४९॥

अजापुत्रस्तमुद्योतं, वीक्ष्य दक्षजनाऽग्रणीः ।
उत्थाय शनकैस्तत्र, जगाम भ्रमसम्भृतः ॥१५०॥

अजापुत्रे समायाते, ज्योतिः किञ्चिदगादधः ।
सोऽपि तन्मार्गगो निर्भीर्विवराऽन्तः समाविशत् ॥१५१॥

यथा यथैत्यजापुत्रो ज्योतिर्याति तथा तथा ।
अधोऽधो यावदायाता, सर्वतः पृथिवी समा ॥१५२॥

ततो ज्योतिस्तिरोभूतमाविर्भूता च काऽपि पूः ।
किमेतदिति सम्भ्रान्तस्तस्थौ ध्यायन्नजासुतः ॥१५३॥

क्व ? गतं तच्चलं ज्योतिर्येनाऽऽनीतोऽस्म्यधस्तथा ।
पूः कैषा ? विवरं तत्क्व ?, यस्मादहमिहाऽऽगमम् ॥१५४॥

शाखामृगनरश्चैष, हा ! पश्चादेककः स्थितः ।
विना मां स कथं भावी ?, मदेकशरणो हि सः ॥१५५॥

किङ्करोमि ? क्व वा यामि ?, दुस्स्थाऽवस्थाविडम्बितः ।
इत्येवं चिन्तयित्वाऽसौ, चचाल नगरीं प्रति ॥१५६॥

चूर्णीकृत्य फलं पट्यां, बद्ध्वा हारस्रजं कटौ ।
प्रभाते प्रविशन् पुर्याः, पद्रेऽद्राक्षीदिमां दशाम् ॥१५७॥

उन्नदन्त्युन्मुखीभूय, शृगालाः शोकशंसिनः ।
फेत्कुर्वन्ति शिवा घूका, निःशङ्कं वासयन्ति च ॥१५८॥

काककोलाहलो व्योम्नि, कर्बरीकलहो भुवि ।
रटन्ति सारमेयाश्च, युध्यन्ते भृशमोतवः ॥१५९॥

पश्यन्नेवं स्मयाऽऽपन्नः, प्राविशत्पुरगोपुरम् ।
यथा बहिस्तथैवाऽन्तरपश्यद्दुर्दशां पुरः ॥१६०॥

तन्मार्गेऽङ्गारभाजीव, न सञ्चरति पूर्जनः ।
सिद्धौ सिद्धवद् यो यत्राऽऽसीनः स तत्र निष्क्रियः ॥१६१॥

नाऽऽपणे वणिजः सज्जा, न पूजा देववेश्मसु ।
न पाठः पाठशालासु, क्रीडन्ति शिशवोऽपि न ॥१६२॥

इति पश्यंश्चतुर्दिक्षु, स शून्यामिव तां पुरीम् ।
इतस्ततः परिभ्राम्यन्, राजप्रासादमागमत् ॥१६३॥

समीक्ष्याऽऽरक्षकं द्वारे, नियुक्तमन्वयुङ्क्त सः ।
किमत्र दृश्यते लोकः, शोकशङ्कुसमाकुलः ? ॥१६४॥

क्षामाऽक्षरमथोवाच, सोऽयमारक्षकः पुमान् ।
किं मां पृच्छसि भोः पान्थ !, पृच्छ दैवमवत्सलम् ॥१६५॥

तथाऽपि कथयेत्युक्तो ह्यजापुत्रेण सोऽवदत् ।
शृणु तर्हि निबन्धश्चेद्दुःखसम्भागभाग् भव ॥१६६॥

एकदा दुर्जयाऽऽख्यस्य, राज्ञोऽस्माकमुपेयुषः ।
आखेटकायाऽऽरण्येऽभूत्त्रियामसमयं दिनम् ॥१६७॥

पिपासाबाधितश्चैष, बभ्राम परितो वनम् ।
महाद्रुगहने क्वाऽपि, प्रैक्षिष्ट विपुलं सरः ॥१६८॥

यावदभ्येति कोऽप्यन्यस्तावदुत्तीर्य वाजिनः ।
तृषाऽऽक्रान्तः स्वयं तत्र, गत्वाऽपात्सलिलं नृपः ॥१६९॥

पीतं च तत्पयो राजा, द्वीपीभूतश्च तत्क्षणात् ।
अनुधावन्नरैर्दृष्टः पिबन् पाथस्तथाऽभवन् ॥१७०॥

यथाश्चर्याय साध्वीनां, विद्याशक्त्या स्वयं किल ।
व्याघ्रोऽभूत्स्थूलभद्रो द्राक्, तथाऽयं पाथसा नृपः ॥१७१॥

अत्याहितमत्याहितमिति वाचश्च सैनिकाः ।
दधावुः सर्वतो रोद्धुं, गच्छन्तं तं वनं प्रति ॥१७२॥

अवशोऽयं नृपव्याघ्रो दधावे सैनिकान् प्रति ।
व्यदारयच्च पुत्रं स्वं, नरसिंहं पुरस्स्थितम् ॥१७३॥

जातेऽथ तुमुले तत्र, सैनिकेषु रुदत्सु च ।
कोऽपि पत्तिर्महाप्राणो, दध्रे पुच्छे तमेककः ॥१७४॥

धृते तस्मिन् नृपव्याघ्रो मेढीबद्धोक्षवत्ततः[1] ।
भ्राम्यत्यागत्य ते सैन्याः कण्ठे पाशमथाऽक्षिपन् ॥१७५॥

गाढं नियम्य च व्याघ्रं, सर्वेऽपि परितः स्थिताः ।
आनीयाऽत्र ततो वज्रपुञ्जरे तं न्यधुर्बलात् ॥१७६॥

व्याघ्रीभूते नृपे तस्य, पुत्रे स्वर्गमुपेयुषि ।
अनाथो नगरीलोकस्तेन शोकवशङ्गतः ॥१७७॥

निशम्यैवमजापुत्रस्तमपृच्छदतुच्छधीः ।
ददौ किं भो ! न कोऽप्यस्मै, मन्त्रचूर्णौषधाऽऽदिकम् ? ॥१७८॥

खेदात्स प्राह चूर्णाऽऽदि दत्तं दत्तं घनैर्घनैः ।
नाऽभूत्किमपि केनाऽपि, सर्वं पुण्ये हि सस्फुरम् ॥१७९॥

यतः— जानात्येव जनो ह्युपार्जितुमलं लक्ष्मीं प्रभुं सेवितुं,
मित्रं स्नेहयितुं गदं शमयितुं वक्तुं सदस्यद्भुतम् ।
न्यक्कर्तुं रिपुमुत्तरीतुमुदधिं किं किं विधातुं न वा,
किन्तु स्वैरविजृम्भिणो यदि मतं स्यात्कर्मणोऽमर्षिणः ॥१८०॥

अजापुत्रो विहस्याऽऽह, द्वीपिनं मे प्रदर्शय ।
यदि पुण्यं पुनस्तस्य, स्यात्कीर्त्तिश्च भवेन्मम ॥१८१॥

आरक्षकनरः श्रुत्वा, तस्य तन्मुद्रितं वचः ।
दधौ सम्भावनां चित्ते, स्यादार्त्तो हि न नास्तिकः ॥१८२॥

---

१. प्राकृताऽनुकरणमेतत्, इतरथा संस्कृते तु मेधि-मेथिशब्दावुपलभ्येते, तथाहि— मेधिर्मेथिः खलेवाली खले गोबन्धदारु यत्' इत्यभिधानचिन्तामणौ ।

प्रसादं कुरु तत्राऽर्थे, चलताच्च नृपौकसि ।
ऊचे कृताऽञ्जलिः सोऽमुं, कार्याऽर्थी स्यान्मृदुः खलु ॥१८३॥

गृहीत्वा तमजापुत्रमारक्षकनरो ययौ ।
यत्राऽऽस्ते स नृपद्वीपी, पुच्छमाच्छोटयन् भुवि ॥१८४॥

बहिर्विमुच्य तं तत्र, गत्वाऽमात्यं व्यजिज्ञपत् ।
मन्त्र्यादिष्टः पुनः सोऽमुं, गृहीत्वाऽन्तःसमाविशत् ॥१८५॥

वीक्ष्याऽऽयान्तमजापुत्रमभ्युत्तस्थौ कृताऽञ्जलिः ।
ससभः सचिवो येन, बालोऽपि कार्यकृद्गुरुः ॥१८६॥

सिंहासने निवेश्यैनमुपविश्याऽग्रतः स्वयम् ।
मन्त्री विनयवांस्तस्मै, प्राग्वृत्तान्तमचीकथत् ॥१८७॥

किञ्च ममोपदिष्टस्त्वं, वैश्वानरतरुस्थया ।
स्वप्नेऽद्याऽऽगत्य मे राजकुलदेवतया तया ॥१८८॥

अजापुत्रो नृपस्यैतत्तैरश्च्यमपनेष्यति ।
ततो ज्योतिःप्रपञ्चेन, सा क्षणात्त्वामिहाऽऽनयत् ॥१८९॥

तत्प्रसीद कृपालुः स्याः, भव त्वं राजकार्यकृत् ।
स्वयं कृपालवः सन्तः, किं पुनः प्रार्थिताः परैः ? ॥१९०॥

एवमभ्यर्थितस्तेन, स्वयं च स कृपापरः ।
कृत्वैकान्तं नृपव्याघ्रायाऽदात्तच्चूर्णमद्भुतम् ॥१९१॥

तेनाऽशितं च तच्चूर्णं, जातश्च स्वाऽकृतिर्नृपः ।
औषधप्रभावोऽचिन्त्य, इति सत्यमभूत्तदा ॥१९२॥

पूर्वरूपधरं भूपमालोक्य सचिवाऽऽदयः ।
हर्षरोमोद्गमा नेमुरानन्दाऽश्रुपयोमुचः ॥१९३॥

जय जय प्रजापाल !, कालः प्रत्यर्थिभूभुजाम् ।
एतावन्ति दिनानि त्वं, नाथ ! प्राप्तोऽसि कां दशाम् ? ॥१९४॥

द्वीपीभूतेऽपि त्वय्यत्र, स्वराज्यमधितिष्ठति ।
प्रत्यर्थिहरिणेभ्योऽपि, क्लीबाः स्मो बिभ्यतः स्थिताः ॥१९५॥

दशामेनां त्वयि प्राप्तेऽभ्युदितेऽपि हि भास्वति ।
लोकानामस्तमेवाऽभूद्, भवज्जीवितजीविनाम् ॥१९६॥

इत्युक्त्वा मन्त्रिमुख्येषु, विरतेषु महीपतिः ।
पुनर्जात इवाऽपृच्छत्, स्वप्रजाराज्यकौशलम् ॥१९७॥

अजापुत्रमपूर्वं च, दृष्ट्वा भ्रूसञ्ज्ञया नृपः ।
अप्राक्षीत्सचिवं सोऽपि, नृपायैवं व्यजिज्ञपत् ॥१९८॥

नाथैष तव तैरश्च्यदुर्दिनस्य प्रभञ्जनः ।
मन्दिरेऽत्र यथाऽवस्थामकार्षीत् त्वद्वपुस्तरीम् ॥१९९॥

अथाऽऽत्मस्वरूपज्ञानादजापुत्राय साऽञ्जसम् ।
प्रवृत्तो दातुं हस्त्यश्वस्वर्णाऽऽदिपारितोषिकम् ॥२००॥

अथाऽसाववदद्भूपं, ममैभिः पूर्यते विभो ! ।
प्रीतिरेव सतां याच्या, किमन्यैः काञ्चनाऽऽदिभिः ? ॥२०१॥

यतः-स्नेहो न कार्यः किल यत्र तत्र, स्थानत्रये[1] बध्यत एव मन्थाः ।
किन्तूत्तमैः सङ्गतिरप्यभीष्टा, तैलं करुण्याः[2] कति[3] नाऽभ्यनन्दन् ? ॥२०२॥

ततो विशेषतस्तुष्टः, स्वमात्मानमिवाऽपरम् ।
पश्यन्नजासुतं राजा, तत्रोत्सवमकारयत् ॥२०३॥

वर्षाभू[4] इव काले स्वे, पौरास्ते मृतजीविताः ।
जय जयेत्युद्घोषन्तोऽकार्षुः पुर्यां महोत्सवम् ॥२०४॥

---

१. यथा दधिमटक्यां स्नेहं कुर्वन् मन्था अधोमध्योर्ध्वस्थानत्रये दवरकेण बध्यते ।
२. मल्लिकापुष्पस्य ।
३. पुरुषान् ।
४. मण्डूकः ।

अन्यदा भूभुजा सार्धं, सोदर्यवदजासुतः ।
धुन्वन्नाश्चर्यतः शीर्षं, तत्सरो द्रष्टुमाययौ ॥२०५॥

अथाऽसौ सनृपो यावत्, पश्यंस्तीरेऽस्ति तत्सरः ।
तावज्जलचरो हस्ती, प्रादुरासीत् समीपगः ॥२०६॥

उत्फुल्लाऽक्षमजापुत्रं, भूभुजो निकटे स्थितम् ।
करेणाऽऽच्छिद्य तत्रैव, सोऽमज्जत् सरसि क्षणात् ॥२०७॥

राजा ससम्भ्रमं क्वाऽमुं, हत्वा त्वं यासि रे द्विप ! ।
वदन्नेवाऽसिमाकृष्य, ददौ झम्पामनुद्विपम् ॥२०८॥

अग्रे हस्ती स्वयं पश्चादिति गच्छन् महीपतिः ।
नाऽपश्यद्द्विपमद्राक्षीत्, किन्त्वेष चण्डिकां पुरः ॥२०९॥

अहो ! क्वाऽगाद्द्विपः सैष, स येनाऽपहृतः सुहृत् ।
कैषा भट्टारिका ? यस्याः, प्रासादो हेमनिर्मितः ॥२१०॥

किञ्चाऽनुपकृतः सोऽभूत्प्राणदानोपकारकः ।
अहमुपकृतः प्राणैस्तस्य स्यामनृणो यदि ॥२११॥

निश्चित्यैवं द्विपं हन्तुं, यमाकर्षन्महीपतिः ।
छेत्तुं तेनाऽसिनाऽऽरब्धं, स्वशीर्षं देवतापुरः ॥२१२॥

मा साहसं मा साहसमिति सम्भ्रमवागसौ ।
प्रत्यक्षीभूय सा तस्य, हस्तमाधत्त देवता ॥२१३॥

किमेतद्भवताऽऽरब्धं ?, त्वं किन्न श्रुतवानसि ? ।
परस्यैवाऽऽत्मनोऽपि स्याद्वधः पापाय भूयसे ॥२१४॥

अथोवाच नृपः सर्वं, जानाम्येतच्छृणोमि च ।
किन्त्वस्मि प्राणितुं[1] नाऽलं, विना तेनोपकारिणा ॥२१५॥

---

१. जीवितुं ।

तथाऽपि साहसं मैवं, कार्षीस्त्वं शूरकुञ्जर ! ।
षण्मासाऽनन्तरं सोऽयं, सुहृद् घटयिता तव ॥२१६॥

इत्युदित्वा कर्णे किञ्चित्, कथयित्वा च देवता ।
औषधीमार्पयत्तस्मै, सप्रभावां प्रसादतः ॥२१७॥

एवमस्त्वित्युदित्वाऽसौ, यावदास्ते कृताऽञ्जलिः ।
सखीभिः सार्धमायासीत्, काऽप्येका युवतिस्ततः ॥२१८॥

रूपसम्पूर्णसर्वाऽङ्गा, दिव्यवस्त्रविभूषणा ।
सखीहस्तस्थिताऽनल्पपूजोपकरणाऽऽदिका ॥२१९॥

प्रविश्याऽन्तर्महाभक्त्या, पूजयित्वा च देवताम् ।
किञ्चित्साचीकृतेनाऽक्ष्णा, भूपमालोक्य सा ययौ ॥२२०॥ युग्मम् ॥

देवतां तां नमस्कृत्य, समादायौषधीं च ताम् ।
बहिरेत्योपविष्टोऽसौ, स्त्रियां तत्राऽनुरागवान् ॥२२१॥

न केवलं हि रूपेण, नाम्नाऽपि कुब्जिका ततः ।
तस्या दासी समेत्यैनं, कृताऽञ्जलिर्व्यजिज्ञपत् ॥२२२॥

यतःप्रभृतिदृष्टोऽसि तयाऽस्माकं वयस्यया ।
ततः प्रारभ्य तां कामो, निहन्ति निशितैः शरैः ॥२२३॥

त्वद्दर्शनसमुद्भूताऽनुरागग्रहिला हि सा ।
स्वप्राणहरणाऽऽशङ्कां, बिभ्रती वक्ति कातरा ॥२२४॥

उद्गच्छन्तमपि ग्रसस्व शशिनं राहो ! कृतस्तेऽञ्जलिः,
यूयं दक्षिणमारुतं फणिकुलान्याचामतामूलतः ।
वह्ने ! निर्दह कोकिलध्वनिपुषं चूतं यदेते तदायत्तान्
सम्प्रति मत्त एव मदसूनाच्छेत्तुमिच्छन्ति हि ॥२२५॥

सर्वाङ्गसुन्दरीनाम्न्या, तयाऽहं प्रेषिता ततः ।
त्वामाह्वातुं महाभाग !, प्रसीदाऽऽगमनेन तत् ॥२२६॥

तयैवं प्रार्थितो राजा, स्वयं तत्राऽनुरागवान् ।
दास्या पुरःस्थया सार्धं, तस्याः सौधं जगाम सः ॥२२७॥

सर्वाऽङ्गसुन्दरी साऽथ, समायान्तं विलोक्य तम् ।
सद्य उल्लाघफुल्लाऽक्षी, समुत्तस्थौ नृपं प्रति ॥२२८॥

स्वयं चाऽऽकारयत् स्नानभोजनाऽऽदिक्रियां नृपम् ।
अतिप्रौढाऽनुरागोत्थप्रेम्णो हि किमु दुष्करम् ? ॥२२९॥

तया प्रेमजुषा सार्धं, भुङ्क्ते भोगान् महीपतिः ।
अत्यासक्तश्च नाऽस्मार्षीत्, स्वराज्यसुहृदाऽऽदिकम् ॥२३०॥

इतश्चाऽजासुतः सोऽपि, हस्तिनाऽपहृतस्तदा ।
आनीय मुक्तश्चाऽधस्ताद्, व्यन्तराऽऽवासभूमिषु ॥२३१॥

वराकं मानुषं त्वेतत्को जहार भुवस्तलात् ।
इत्युक्त्वा तं निनायैको व्यन्तरो व्यन्तराऽधिपम् ॥२३२॥

अजापुत्रो नमस्कृत्य, व्यन्तरेशं महर्द्धिकम् ।
अकथयत् स्ववृत्तान्तं, स तस्मै विहिताऽञ्जलिः ॥२३३॥

मा भैषीस्त्वां यथास्थानं, मोक्ष्यामो वयमेव हि ।
तिष्ठ त्वं रोचते यावदत्र स्ववेश्मनीव भोः ! ॥२३४॥

इत्युक्तोऽस्थादजापुत्रस्तत्र तद्दद्धिनन्दितः ।
व्यन्तरेशमथाऽपृच्छत्, किञ्चिदप्यस्त्यतोऽप्यधः ? ॥२३५॥

व्यन्तरेशस्ततोऽवोचदितोऽधः सन्ति सप्त भोः ! ।
नरका ये हि पापस्य, व्ययकारणतां ययुः ॥२३६॥

गाढोत्कण्ठावतो दृग्भ्यां, द्रष्टुं तां नरकस्थितिम् ।
व्यन्तरेशः प्रभावाऽऽढ्यस्तस्य मूर्ध्नि करं न्यधात् ॥२३७॥

तत्प्रभावेन्द्रजालेन, तस्य तां पश्यतः स्फुटम् ।
व्यन्तरेशः स्वयं चख्यौ, पृथग्नारकयातनाम् ॥२३८॥

रागद्वेषमदैश्वर्याद्यायत्तैः प्राणिभिः सदा ।
मर्त्यलोककृतं पापमिहाऽऽगत्याऽनुभूयते ॥२३९॥

स्मारयित्वा स्मारयित्वा, कर्म पूर्वभवाऽर्जितम् ।
पश्याऽयं जीवहिंसाकृत्, छिद्यते तीक्ष्णहेतिभिः ॥२४०॥

अयमसत्यवादित्वादत्युष्णं पाय्यते त्रपु ।
अदत्ताऽऽत्तपरद्रव्यः, शूलमारोप्यते ह्यसौ ॥२४१॥

परस्त्रीलम्पटश्चाऽयमतिध्मातां कृशानुना ।
ताम्रपञ्चालिकामेतां, बलादालिङ्ग्यते रटन् ॥२४२॥

अतिलोभाऽभिभूतोऽयमयन्त्रितपरिग्रहः ।
आरूढपापे शीर्षे तु, क्रकचेन विदार्यते ॥२४३॥

भक्षितोपेक्षितत्वाभ्यां, देवद्रव्यविनाशकः ।
नानाविधामयं दीनो, नीयते नरकव्यथाम् ॥२४४॥

अयं परोपतापी च, कुम्भीपाकेन पच्यते ।
परमर्मप्रवादी च, भिद्यते खण्डशस्त्वसौ ॥२४५॥

आहन्यमानकीलोऽयं, मुखे मिथ्याऽपवाददः ।
भञ्जकः परकार्यस्य, खण्डितोऽपि मिलत्ययम् ॥२४६॥

दुर्वाक्यभाषकश्चाऽयं, तृषार्त्तः पाय्यते ह्यसृक् ।
परमाधार्मिकैर्देवैर्यथोपार्जितदायिभिः ॥२४७॥

शस्त्राशस्त्रि च युध्येते, अन्योऽन्यं वैरिणाविमौ ।
उग्रपापः स्वयं शेते, शाल्मलीकण्टकेष्वयम् ॥२४८॥

इत्यादियातनां पश्यन्न[ा]रकाणां सुदुस्सहाम् ।
अन्तरुत्कम्पितोऽत्यर्थं, भेजे मूर्च्छामजासुतः ॥२४९॥

ततश्च व्यन्तरेशेन, जलाऽऽर्द्रवायुभिः कृतः ।
स्वस्थोऽजातनयः कम्पमानश्चित्ते त्वधारयत् ॥२५०॥

आः संसारस्त्याज्यो यस्मिन्नुत्पन्नाः प्राणिनः खलु ।
तदर्जयन्ति येनेह, कीदृग्दुःखस्य भाजनम् ॥२५१॥

इत्यादिशोचन्नुत्कम्पी, कृतस्वस्थानगामिधीः ।
अवोचद् व्यन्तरं यन्मां, मुञ्चाऽशु तत्सरस्तटे ॥२५२॥

व्यन्तरेशस्ततो रूपपरावर्त्तनकारिकाम् ।
प्रसादाद् गुटिकां दत्त्वा, तमानैषीत्सरस्तटम् ॥२५३॥

अजापुत्रोऽपि वीक्ष्य स्वं, तीरे तत्सरसः क्षणात् ।
गत्वा पश्यामि तं भूपमिति हर्षाच्चचाल सः ॥२५४॥

आरुरोह सरःपालीं, यावत्तावन्नराः कति ।
स्वागतं स्वागतमिति, वाचोऽधावन्नमुं प्रति ॥२५५॥

उपेत्य तं नमस्कृत्य, पप्रच्छुस्ते क्व भूपतिः ? ।
अजासूः प्राह सम्भ्रान्तो, नाऽहं जानामि भूपतिम् ॥२५६॥

अथाऽऽकुलतराः प्रोचुस्ते यत्त्वां हस्तिना हृतम् ।
ददौ मोचयितुं झम्पां, सरस्यनुपदं नृपः ॥२५७॥

ततःप्रभृति शोकाऽऽर्त्तः, पौरलोकोऽस्ति भीतिमान् ।
विना नासां मुखमिवाऽश्रीका पूश्च नृपं विना ॥२५८॥

इति प्राणच्छिदो वाचः श्रुत्वा तेषामजासुतः ।
वज्राहत इवाऽत्यर्थमिति चेतस्यधारयत् ॥२५९॥

निश्चितं व्यन्तरः कोऽपि, तं जहार महीपतिम् ।
मम प्राणकृते भूपो, हहाऽगात्कीदृशीं दशाम् ? ॥२६०॥

तद्गत्वा व्यन्तरेशं तमालोक्य क्वाऽपि भूपतिम् ।
अत्राऽऽनयामीत्यालोच्य, पुनर्झम्पां सरस्यदात् ॥२६१॥

विना व्यन्तरसान्निध्यान्मज्जन्तं तत्र वारिणि ।
अगिलन्मकरः कोऽपि, कटीं यावदजासुतम् ॥२६२॥

ततस्तज्जलमाहात्म्यादजापुत्रः क्षणादपि ।
व्याघ्रीभूतो मकरेण, न ग्रस्तः सकलोऽप्यतः ॥२६३॥

अथाऽम्बुस्विन्नग्रन्थिस्थचूर्णस्याऽन्तःप्रवेशनात् ।
भावितस्तद्रसेनाऽऽशु, बभूव मकरो नरः ॥२६४॥

ग्रसितुं न नवा मोक्तुं, शक्तस्तं मकरो नरः ।
निश्चेष्टः स तथाभूतो, लग्नस्तीरे क्रमात्ततः ॥२६५॥

इतश्च क्रीडयित्वैका, निवृत्ताऽथ भुवस्तलात् ।
सर्वाङ्गसुन्दरी दासी, तमद्राक्षीत् तथास्थितम् ॥२६६॥

कौतुकाद्वीक्ष्य तं व्याघ्रं, नरग्रस्तं ततश्च सा ।
स्वामिन्यै दर्शयाम्येतदिति तं द्रागुदक्षिपत् ॥२६७॥

स्वशक्त्याऽऽनीय मुक्त्वा तं, सर्वाङ्गसुन्दरीपुरः ।
देवि ! पश्येदमाश्चर्यं, हृष्टाऽवादीच्च तामियम् ॥२६८॥

अथाऽसौ दुर्जयो राजा, पूर्वं तत्र कृतस्थितिः ।
सर्वाङ्गसुन्दरीप्राणनाथोऽपश्यत्तदद्भुतम् ॥२६९॥

ततोऽसावुन्मनीभूय, भूयो भूयो विलोक्य तम् ।
सस्मार कथितं कर्णे, तदा तद्देवतावचः ॥२७०॥

षण्मासाऽनन्तरं मित्रमेवंरूपव्यवस्थितम् ।
द्रक्ष्यसि त्वमित्यद्याऽहमस्मार्षमस्य दर्शनात् ॥२७१॥

स्मृत्वा दिव्यौषधीं तां च, घृष्ट्वाऽभ्यषिञ्चदात्मना ।
व्याघ्ररूपधरं मित्रं, ततश्च तत्प्रभावतः ॥२७२॥

निःससार नरीभूय, पुरुषाऽऽस्यादजासुतः ।
मकरोऽभूत् पुमानेव, द्वावप्येतौ च जीवितौ ॥२७३॥

वीज्यमानः स्वयं राज्ञा, स्वस्थीभूतश्च किञ्चन ।
अजासूः प्रेक्ष्य राजानमुत्तस्थौ विगतश्रमः ॥२७४॥

प्रमोदाऽश्रूणि मुञ्चन्तावजासूदुर्जयौ मिथः ।
आलिङ्ग्य गाढमेकस्मिन्नाऽऽसनेऽथ न्यषीदताम् ॥२७५॥

हृष्टो राजा स्ववृत्तान्तमजासूनोरचीकथत् ।
हर्षविस्मयवान् सोऽपि, स्ववृत्तं भूभुजे पुनः ॥२७६॥

अजासूरात्मभूपालदुःखाऽग्निभ्यां ज्वलद्वपुः ।
निर्वाप्याऽमृतकुल्याभिर्नृपवाग्भिस्ततोऽवदत् ॥२७७॥

मित्र ! त्वं मत्कृते प्राणानत्याक्षीस्तत्र वच्मि किम् ? ।
परोपकारकारित्वे, यतस्त्वमसि लम्पटः ॥२७८॥

पुरीं प्रति चल क्ष्माप !, गत्वा तत्र स्वदर्शनात् ।
निर्वापय निजं लोकं, प्रजाः स्वा देव ! पालय ॥२७९॥

त्वया विना मया दृष्टो, लोकस्ते शोकवान् रुदन् ।
विना हि पितरं स्वामिन् !, बालकानां कियत्सुखम् ? ॥२८०॥

ततश्चलत राज्ये स्वे, स्त्रीसङ्गं मुञ्चत द्रुतम् ।
एकान्तस्त्रीसमासक्तिर्नृपाणां व्यसनं महत् ॥२८१॥

इत्युक्तस्तेन राजाऽसौ, प्रबुद्धः स्वकुलं स्मरन् ।
सर्वाङ्गसुन्दरीं प्राह, यास्यामः स्थानमात्मनः ॥२८२॥

समायातो यतो भ्राता, ममाऽयं प्राणवल्लभः ।
हस्तिनामिव राज्ञां च, वृद्धाऽऽज्ञा ह्यङ्कुशायते ॥२८३॥

ज्ञात्वेति निश्चयं राज्ञः, प्राह सर्वाङ्गसुन्दरी ।
पराऽऽयत्ताः स्त्रियो नैव, नरास्तत्किमहं ब्रुवे ? ॥२८४॥

यदि यास्यथ तद् यात, न चैवं काऽपि मे क्षतिः ।
ममेदं हि मनो येन, युष्माभिः सममेष्यति ॥२८५॥

किञ्चाऽऽत्मीयाऽपराधं ते, कथयाम्यधुना विभो ! ।
मयैव हस्तिरूपेण, कृतमेतन्महीपते ! ॥२८६॥

त्वदनुरागिणी हर्त्तुं, त्वामनीशा ततश्च ते ।
अहार्षं भ्रातरं त्वं तु, दुःखेनाऽस्य हृतः खलु ॥२८७॥

अपराधेनाऽप्येतेन, स्मरणीया पुनस्त्वया ।
व्यन्तराऽन्वयसम्भूताऽस्म्यहं सर्वाङ्गसुन्दरी ॥२८८॥

सप्रश्रयमुदित्वैतत्ततः सर्वाङ्गसुन्दरी ।
ताभ्यां सह नृपं नीत्वाऽमुञ्चत्तत्सरसो बहिः ॥२८९॥

अकस्माच्च समायान्तं, समित्रं वीक्ष्य भूपतिम् ।
सम्मुखं सैनिकाः सर्वे, दधावुर्विहिताऽऽशिषः ॥२९०॥

कृतप्रणामानेतांश्च, सम्भाष्य वचनाऽमृतैः ।
तापसानामिवैतेषां, तत्राऽऽवासेषु जग्मिवान् ॥२९१॥

विश्रान्तं च नृपं प्रोचुस्ते यत्त्वद्रहिता वयम् ।
अस्थामाऽत्रैव पूर्लोकस्याऽशक्ता आस्यदर्शने ॥२९२॥

अथाऽऽयातं नृपं ज्ञात्वा, सुमतिः सचिवस्ततः ।
सनाथः पौरलोकेन, राज्ञः सम्मुखमाययौ ॥२९३॥

कृताऽष्टाङ्गनमस्कारान्, सचिवानात्मवल्लभान् ।
राजकं पूर्जनं राजा, यथौचित्यमभाषत ॥२९४॥

ततश्च वाद्यमानेषु, पञ्चशब्देषु निर्भरम् ।
पठत्सु द्विजवृन्देषूच्चार्यमाणे जयध्वनौ ॥२९५॥

दत्ताऽऽशीर्वादपौरस्त्रीवस्त्राऽन्तैः कृतवीजनः ।
कृतशोभां पुरीं पश्यन्, स्वसौधं प्राविशन् नृपः ॥२९६॥ [युग्मम्]

महोत्सवविधानेन, कृतमङ्गलकौतुकः ।
पूर्ववन्नृपतिश्चक्रे, स्वसाम्राज्यमखण्डितम् ॥२९७॥

मकरनरयुक्तोऽयमजापुत्रश्च तत्र सः ।
आत्मवद्भूभुजा दृष्टो, दिनान्यस्थात् कियन्त्यपि ॥२९८॥

अजासूनुस्ततो मुक्तं, तत्रैकाकिनमेव तम् ।
शाखामृगनरं स्मृत्वा, यास्यामीत्याह भूपतिम् ॥२९९॥

राज्ञश्च प्राणदानेन, प्राणेभ्योऽपि स वल्लभः ।
निशम्य तद्वचो राजा, नाऽस्मै प्रत्युत्तरं ददौ ॥३००॥

अजापुत्रस्तु भूयोऽपि, प्राह सप्रश्रयं नृपम् ।
इयत्कालं स्थितोऽस्म्यत्र, तन्मां विसर्जयाऽधुना ॥३०१॥

आग्रहादेवमुक्तस्तु, स राजा तं व्यसर्जयत् ।
ददतो भूपतेस्त्वेष, नाऽगृह्णाद्वसु किञ्चन ॥३०२॥

गृहीततत्सरो नीरो, मकरनरसंयुतः ।
तेनैव विवरेणैष, समागाद्यक्षवेश्म तत् ॥३०३॥

गतेऽजातनये दध्यौ, विनिद्रो मर्कटः पुमान् ।
क्वाऽगात्स्वामीति भुक्त्वाऽत्र, मुहुः फलान्यशेत सः ॥३०४॥

ततोऽजासूस्तमैक्षिष्ट, तथैव किल शायिनम् ।
शाखामृगनरं निद्रावशेनाऽज्ञाततद्गतिम् ॥३०५॥

हसन्नुत्थाप्य तं गाढनिद्रारसवशाऽऽकुलम् ।
तदा सुप्तोत्थित इव, स प्रोवाच ससम्भ्रम् ॥३०६॥

उत्तिष्ठोत्तिष्ठ यामो हि, पुरीमतिदवीयसीम् ।
तृतीयश्च सहायोऽयं, बभूव सहगामुकः ॥३०७॥

क्षणमात्रं सुप्त इव, विजृम्भिकाभृताऽऽननः ।
उत्थाय सोऽभवन्मार्गे, चलतेति वचोऽवदन् ॥३०८॥

शाखामृगमकराभ्यां, पुम्भ्यां सममजासुतः ।
पुरीं प्रति व्रजन्नेष, वापीमेकां ददर्श च ॥३०९॥

तस्याश्च परितः स्वर्णविमानानि बहून्यथ ।
कुर्वतीर्जलकेलिं च, तत्राऽन्तर्युवतीः कति ॥३१०॥

परस्परं च व्याहारमेतासामशृणोदिति ।
उत्सूरो नो भवत्येष, गन्तुमष्टापदे गिरौ ॥३११॥

इन्द्रोऽपि हि सहेन्द्राण्याऽथाऽऽयातो भविताऽधुना ।
इत्युक्त्वा ता विमानान्याजग्मुर्हस्तधृताऽम्बुजाः ॥३१२॥

अजापुत्रस्तरोर्मूले, तिरोभूयाऽतिनिश्चलः ।
अपरौ च तथा कृत्वा, स्वचेतस्यकरोदिति ॥३१३॥

मर्त्यलोको मया दृष्टो, दृष्टास्ते नरका अपि ।
वैमानिकसुरान् द्रष्टुं, गाढमुत्कण्ठते मनः ॥३१४॥

एतावत्रैव मुक्त्वा तत्, समं हारजलाऽऽदिभिः ।
व्यन्तराऽर्पितगुटिकाप्रभावाद् भृङ्गरूपकृत् ॥३१५॥

व्रजाम्यष्टापदेऽप्याभिर्धृताऽम्बुजकृतस्थितिः ।
इत्यालोच्य तयोः पुंसोस्तत्स्वरूपं समादिशत् ॥३१६॥ [युग्मम्]

अनुज्ञातस्ततस्ताभ्यां, भ्रमरीभूय सत्वरम् ।
इतस्ततः परिभ्राम्यन्, युवत्यात्ताऽम्बुजेष्वगात् ॥३१७॥

विद्याधर्यश्च ता वीक्ष्य, गुञ्जन्तं भ्रमरं कलम् ।
अत्रैह्यत्रैहि कमले, तमित्याह्वानयन्ति च ॥३१८॥

शीघ्रमारुह्य ताः सर्वा, विमानं हि निजं निजम् ।
क्षणादष्टापदं जग्मुर्लालयन्त्यः शिलीमुखम् ॥३१९॥

उत्तीर्य ता विमानेभ्यः, पाणी प्रक्षाल्य पाथसा ।
त्रिश्च प्रदक्षिणीकृत्योच्चार्य नैषेधिकीः स्फुटम् ॥३२०॥

प्रविश्याऽन्तर्नताऽङ्ग्यस्ताः, कियद्भिः कमलैस्ततः ।
तत्राऽऽगमनतो धन्यंमन्या निर्मलचेतसः ॥३२१॥

यथामानान् यथावर्णान्, सिंहनिषद्यया स्थितान् ।
कान्तकान्तीनथाऽऽनर्चु, ऋषभाऽऽदीन् जिनानिमाः ॥३२२॥ [त्रिभिर्विशेषकम्]

रागद्वेषकषायांश्च, विमुच्य विकथा अपि ।
जिनानां वामभागस्थाः, षष्टिहस्ताऽन्तरस्थिताः ॥३२३॥

रोमाञ्चोपचिताऽङ्ग्यस्ताः, प्रमोदाऽश्रुमुचो जिनान् ।
अवन्दन्तोत्तरीयाऽन्तःसनाथकरसम्पुटाः ॥३२४॥ [युग्मम्]

ता देववन्दनाप्रान्ते, बभणुः स्तोत्रमप्यदः ।
उन्मीलत्कण्ठसौभाग्यात्, स्वयं रक्ताऽऽत्ममानसाः ॥३२५॥

"जयाऽऽदिनाथ ! प्रथिताऽर्थसार्थ !, जयाऽजित ! स्वैरजिताऽरिवर्ग ! ।
जयाऽपुनःसम्भव सम्भव ! त्वं, जयाऽभिनन्दिन्नभिनन्दनेश ! ॥३२६॥

निधेहि धर्मे सुमते ! मतिं मे, त्वं सद्म पद्मप्रभ ! देहि मुक्तौ ।
सुपार्श्व ! पार्श्वे कुरु मे विवेकं, चन्द्रप्रभ ! छिन्धि तमोविमोहम् ॥३२७॥

पुण्ये विधौ मां सुविधे ! विधेहि, कर्माऽनलः शीतल ! शीतलोऽस्तु ।
श्रेयांस ! मे श्रेयसि धेहि चित्तम्, त्रिधाऽस्तु पूजा त्वयि वासुपूज्य ! ॥३२८॥

कुरुष्व जीवं विमलाऽमलं मे, कर्माण्यनन्तानि लुनीह्यनन्त ! ।
श्रीधर्म ! धर्मस्तव मां पुनातु, शान्ते ! भव त्वं दुरितोपशान्त्यै ॥३२९॥

दुष्कर्मकन्थामथनोऽस्तु कुन्थुररो हरत्वेनसि मे प्रवृत्तिम् ।
कल्याणवल्लीर्वितनोतु मल्लिः, सत्यव्रतं यच्छतु सुव्रतो मे ॥३३०॥

नमिर्भ्रमिं रक्षतु मे भवोत्थां, लुनातु नेमिस्तु कषायवृक्षान् ।
मथ्नातु पार्श्वो दुरिताऽऽधिवार्द्धिं, श्रीवीरनाथं शरणं प्रपद्ये ॥३३१॥

संसारमार्गभ्रमणेन तप्तं, सम्भूय भूयस्तरपुण्यवृष्ट्या ।
प्रीणन्तु तेऽष्टापदपर्वतस्था, जिनाऽम्बुदाः श्रीभरताऽर्चिता माम्" ॥३३२॥

इत्यन्तर्भावसम्भाराद्देवतासु स्तुवतीष्वथ ।
एत्य शक्रः सदेवीको, जिनान् स्तुत्वा ह्यपासरत् ॥३३३॥

आगत्य मण्डपे शक्रः, समुपाविशदासने ।
आरब्धश्च ततस्तत्र, देवैः प्रेक्षणकोत्सवः ॥३३४॥

वैक्रियं रूपमाधाय, दिव्यनेपथ्यविभ्रमाः ।
ननृतुश्चारुचारीभिः, पौलोम्युर्वशिकाऽऽदयः ॥३३५॥

विहाय भ्रामरं रूपं, तुम्बरूभूय सत्वरम् ।
नाऽऽयाति तुम्बरुर्यावत्तावदागादजासुतः ॥३३६॥

नमस्कृत्याऽर्हतः सर्वान्, रङ्गभूमिमुपेत्य च ।
अजापुत्रश्चित्रकृते, तुम्बरोः स्थानमासदत् ॥३३७॥

चकाराऽपूर्वगत्या हि, देवविस्मयकारिणीम् ।
स्वरग्राममूर्च्छनाऽऽढ्यामुच्चैरालप्तिमद्भुताम् ॥३३८॥

किमेतदिति सम्भ्रान्तस्तुम्बरुस्तु निशम्य ताम् ।
अस्थान्निलीन एवाऽयं, किलैषोऽस्म्यहमेव हि ॥३३९॥

जिनानां पुरतः सोऽहं, गायन्नस्मीह पुण्यभाग् ।
आनन्दाद्गातुमारेभेऽजापुत्रः स्थानकैर्नवैः ॥३४०॥

कटरे तुम्बरोरद्याऽन्या, काऽपि गीतिनिर्मितिः ।
येनाऽऽस्ते चित्रवच्चक्र, इति प्रोचुर्मिथः सुराः ॥३४१॥

आलप्तिलहरीपूर्णकर्णो देवप्रभुः स्वयम् ।
आजुहाव प्रसादाय, तं तुम्बरुविडम्बिनम् ॥३४२॥

यतः— गम्भीराः पश्य गुणैर्ग्राह्या बाह्याः किलैवमेवाऽपि ।
सगुणः कूपे कुम्भः, पूर्णः सरसि तु विनाऽप्येतान् ॥३४३॥

इन्द्राऽऽहूतः स चोपेत्य, क्षणात्स्वं रूपमादधौ ।
विस्मितः ससुरः शक्रो, मर्त्योऽयमित्यचिन्तयत् ॥३४४॥

हृष्टो विशेषतः शक्रो, ददौ स्वे दिव्यवाससी ।
स कथमागतोऽसीति, पृष्टश्चाऽऽख्यद् यथातथम् ॥३४५॥

देवानामृद्धिसम्भारमजापुत्रेण प्रेक्ष्य तम् ।
जाता यूयं कथमिति, पृष्टः शक्रोऽब्रवीदिति ॥३४६॥

सप्तक्षेत्र्यां धनं ह्युप्त्वा, कृत्वा हिंसादिवर्जनम् ।
कृततीव्रपरिव्रज्याप्रभावेनाऽस्मि वासवः ॥३४७॥

इन्द्रसामानिकाऽऽद्याश्च, स्वल्पाऽल्पशुभकर्मणा ।
क्रमाद्धीनर्द्धयश्चैते, देवत्वं लेभिरे सुराः ॥३४८॥

अथाऽऽरात्रिकमुत्तार्य, जिनानां स हरिः स्वयम् ।
शक्रस्तवं भणित्वा च, दिवं यातुं प्रचक्रमे ॥३४९॥

गच्छन् शक्रः समादिक्षद्देवं कमपि यत्त्वया ।
मोक्तव्योऽयं यथास्थानं, तेनाऽपि तत्तथा कृतम् ॥३५०॥

अजापुत्रस्ततस्तत्राऽऽगत्य ते दिव्यवाससी ।
पादाऽङ्गुष्ठनखाऽग्राऽन्तः क्षिप्त्वा सुप्तोऽन्तिके तयोः ॥३५१॥

जागरित्वा ततः स्फीताऽम्भोजश्रिसरसां जलम् ।
सुधांऽशुमुज्ज्वलं पश्यन्, शरदमित्यवर्णयत् ॥३५२॥

निर्मृष्टः शरदा शशी विमलता तल्लेषु लेभे जलैर्वित्ताय,
व्यवसायिभिः प्रववृते वव्रे श्रियाऽम्भोरुहम् ।
आशां प्राप्य चिरादगस्तिरुदितः सस्येषु जातं फलं,
गोपीभिः किल गीयतेऽत्र जगृहे दानं पुनः शालिभिः ॥३५३॥

प्रातरुत्थाय ताभ्यां स, पुरीं यामीत्यचिन्तयत् ।
लब्धं जन्मफलं दृग्भ्यां, दृष्टं त्रिभुवनं मया ॥३५४॥

लब्धं चूर्णं च येन स्युस्तिर्यञ्चो मानवाः खलु ।
मानवाः स्युश्च तिर्यञ्चो, येन तज्जलमस्ति मे ॥३५५॥

तिर्यञ्चश्च नरीभूताश्चूर्णान् मे स्युर्वशंवदाः ।
सरोऽम्भसा नरो व्याघ्रः, स्यात्तिर्यक् तादृगेव हि ॥३५६॥

प्राप्तश्च नगरीं सोऽगाद्बहुबुद्धिवणिग्गृहम् ।
ततश्च भव्यमूर्त्तित्वात्तस्य स्थानमदाद्वणिक् ॥३५७॥

स आत्मना तृतीयोऽस्थाच्छ्रेष्ठिगेहे स्ववेश्मवत् ।
अजासूः श्रेष्ठिने हारं, यत्नरक्षाऽर्थमार्पयत् ॥३५८॥

चूर्णग्रन्थि पयश्चाऽपि, शाखामृगनराय सः ।
समर्प्य नखशुद्ध्यर्थं, दिवाकीर्त्तिकुटीं ययौ ॥३५९॥

तेनोद्वृत्तनखो दत्त्वाऽर्थमजासूरगाद्गृहम् ।
वाससी पतिते ते तु, भूमौ प्रैक्षिष्ट नापितः ॥३६०॥

कणावेतौ तु कीदृक्षावित्यादात् पाणिनाऽथ ते ।
कथं दिव्यांऽशुकयुगमिति स्पर्शाद्विवेद सः ॥३६१॥

गृहीत्वा ते च मूल्येन, कस्याऽपि वणिजो ददौ ।
सोऽपि चोपायनीचक्रे, विक्रमस्य महीपतेः ॥३६२॥

वसन्तसमये प्राप्ते, वाससी ते समुज्ज्वले ।
परिधायेभमारुह्य, क्रीडोद्यानं ययौ नृपः ॥३६३॥

दक्षिणाऽनिलसंस्पर्शोन्मीलद्रोमोद्गमाः स्त्रियः ।
प्रदोषे वीक्ष्य राजाऽत्र, हर्षोत्कर्षादुवाच सः ॥३६४॥

माल्याऽञ्चिताऽभिमुखसिद्धवधूकुचाऽभिघातात् सुधांऽशुजलयन्त्रकृताऽभिषेकः ।
पीत्वाऽङ्गनावपुषि घर्मपयोऽत्रतापो, नाऽदात्पदं तदुदकं नटयन्नभस्वान् ॥३६५॥

इतश्च बहुबुद्धेस्तु, पुत्रोऽपि मतिसागरः ।
कण्ठे निधाय तं हारं, क्रीडोद्यानं जगाम सः ॥३६६॥

तत्राऽऽयान्तं ललत्कण्ठहारं तं वीक्ष्य भूपतिः ।
हारो मदीयोऽयमिति, तमाह्वत् पत्तिभिर्द्रुतम् ॥३६७॥

पृष्टः स आगतो राज्ञा, कुतो हारोऽयमद्य ते ? ।
अयच्छन्नुत्तरं बद्ध्वा, क्षिप्तो भूमौ वमन्नसृक् ॥३६८॥

बहुबुद्धिस्तु तच्छ्रुत्वा, गृहीत्वा तमजासुतम् ।
उपेत्य भूपमाचख्यौ, राजन् ! हारोऽयमस्य हि ॥३६९॥

मोचयित्वा श्रेष्ठिसुतं, राजाऽपृच्छदजासुतम् ।
त्वयाऽयं चोरितो हारः, स प्राह चोरितो मया ॥३७०॥

अरे ! मारयत स्तेनमेनमाश्विति भूभुजा ।
आदिष्टे प्राह स स्वामिन्नेकं शृणु वचो मम ॥३७१॥

परवस्तुग्रहीता यः, स मार्यो भवतां किल ।
एतल्लेखय कुत्राऽपि, यतोऽस्त्यन्यो हि तस्करः ॥३७२॥

अविज्ञाय वचस्तस्य, तत्क्रुद्धोऽलेखयन्नृपः ।
एतन्निर्वाह्यमित्युक्त्वाऽजापुत्रः प्राह भूपतिम् ॥३७३॥

ममैते वाससी तेन, स्तेनस्त्वमसि भूपते ! ।
यदि नो मन्यसे तत्त्वं, पारम्पर्यं विशोधय ॥३७४॥

पारम्पर्यं नृपो ज्ञात्वा, कोपताम्राऽऽननोऽब्रवीत् ।
अर्पितग्राहका न स्मस्तेन त्वमसि तस्करः ॥३७५॥

निर्भयत्वाद्वदन्नेवमजासूरवदन्नृपम् ।
अर्पितग्राहकत्वाच्च, नाऽहमप्यस्मि तस्करः ॥३७६॥

यतः— विपदादर्शनिमग्नः, समधिकसश्रीकतां भजेद्वीरः ।
पयसि प्रतिबिम्बधृतो, वह्निर्न किमुच्छिखः स्फुरति ? ॥३७७॥

कोशाऽध्यक्षं ततो राजा, समाहूयाऽन्वयुङ्क्त तम् ।
सोऽप्याख्यद्यन्मया हारः, कुमार्यै तु समर्पितः ॥३७८॥

तदैवोद्यानतो भूपो, गत्वा वेश्माऽऽजुहाव ताम् ।
अपृच्छच्च सुतां वत्से !, हारः पार्श्वेऽस्ति ते न वा ? ॥३७९॥

रुदती प्राह सा तात !, क्रीडावाप्यां पुरा मम ।
क्रीडन्त्यास्तत्क्षणाद्धृत्वा, क्वाऽप्यगात् केलिमर्कटः ॥३८०॥

तन्निशम्य स तां दृष्ट्वा, शाखामृगनरः स्मरन् ।
तत्पीत्वाऽम्भः कपीभूय, ययौ राजसुताऽन्तिकम् ॥३८१॥

यो यथा वर्तते कालस्तथा सेवस्व वानर ! ।
मा वञ्जुलपरिभ्रष्टो, दृष्ट्वा मां खेदमावह ॥३८२॥

इति कथावदेषोऽपि, फलेनाऽभूत् पुमान् पुरा ।
पाथसा मर्कटो भूय, इत्यजासूरचिन्तयत् ॥३८३॥

स एवाऽयं स एवाऽयं, समागात् केलिमर्कटः ।
सम्भ्रमेण कुमार्याऽसौ, गृहीतो वक्षसा स्वयम् ॥३८४॥

राजा च तं निजं हारमादाय तस्य वाससी ।
आर्पयद्येन स्तेनत्वं, नृपाऽजासुतयोः समम् ॥३८५॥

मर्कटस्तु कुमार्यास्तं, समीक्ष्य स्नेहमात्मनि ।
नाऽहमेष्यामीत्याचष्टाऽजापुत्राय स्वसञ्ज्ञया ॥३८६॥

अजापुत्रोऽपि ते पाथश्चूर्णे आदाय तत्पुरात् ।
बहुबुद्धिमनुज्ञाप्य, मकरेण युतोऽचलत् ॥३८७॥

एकदा गच्छतस्तस्य, द्वियामसमये सति ।
हस्तिनाऽपहृतः कोऽपि, पुरुषः सम्मुखोऽभवत् ॥३८८॥

अजासूस्तं तथा दृष्ट्वा, श्लथगात्रमचेतनम् ।
तच्चूर्णयुतमेकं हि, मोदकं हस्तिनेऽक्षिपत् ॥३८९॥

तेनाऽऽत्तेन गजः सोऽभूत्, पुरुषोऽथाऽपरो नरः ।
आश्वास्य पृष्टः कस्त्वमित्याख्यादजाभुवे ततः ॥३९०॥

अहं हि विजयपुरस्वामिनश्छिन्नवैरिणः ।
महासेनस्य राज्ञोऽस्मि, पुत्रो विमलवाहनः ॥३९१॥

प्रसराऽर्थं समारूढः, कुञ्जरेणाऽऽवशेन तु ।
कर्मणेव जीवः कायात्, पुरात्तस्मात्क्षणाद्धृतः ॥३९२॥

अतः परं न जानामि, हतसर्वेन्द्रियक्रियः ।
इदानीं त्वां तु पश्यामि, मां वीजयन्तमात्मना ॥३९३॥

अजापुत्रस्ततश्चाऽऽत्मपाथेयं तमभोजयत् ।
अथैतेऽवात्सुरेकस्मिन्, वनाऽन्तर्यक्षवेश्मनि ॥३९४॥

अन्ये ते सुषुपुः सर्वे, कुमारस्त्वार्द्रदुःखवान् ।
जाग्रदेवाऽशृणोच्छब्दं, ज्ञातुं तं च बहिर्ययौ ॥३९५॥

जगत्यां भ्रमन् शुश्राव, शुकनाशान्तरस्थिताम् ।
शुकं प्रति कथमस्था ? इत्यालापपरां शुकीम् ॥३९६॥

कुमारश्चिन्तयामास शुकद्वन्द्वमिदं खलु ।
वियुक्तं मिलितं भूयोऽनुयुङ्क्ते कौशलं मिथः ॥३९७॥

भवतु श्रोष्यामि शुकः, किमुत्तरं ददात्यसौ ।
ध्यात्वेति निभृतं सोऽयमारूढो देवताऽऽलयम् ॥३९८॥

शुकः प्राह शुकीं तन्वि ! धृत्वा मां शबरस्तदा ।
व्यक्रीणीत विजयाऽऽख्ये, पुरेऽक्रीणाच्च चेटिका ॥३९९॥

तया चाऽहं शीलमत्यै, महासेनमहीपतेः ।
पत्न्यै समर्पितः क्षिप्तः, पश्चात् सौवर्णपञ्जरे ॥४००॥

साधुभाषीति सा भूयो, भूयः पाठयते च माम् ।
मुक्ताहारकटकाऽऽदि स्नेहान्मां पर्यधापयत् ॥४०१॥

एवं हि लाल्यमानोऽपि, नाऽहं प्रापं सुखं प्रिये ! ।
त्वद्वियोगाऽग्निरन्तर्मां, दहन्न विरराम यत् ॥४०२॥

ततश्च तस्य भूपस्य, पुत्रं विमलवाहनम् ।
मत्तो द्रागपहृत्याऽथ, क्वाऽप्यगात्पट्टकुञ्जरः ॥४०३॥

तं तथाऽपहृतं राजा, न ददर्शाऽनुपद्यपि ।
तच्छ्रुत्वा नृपतिर्व्यासो, राज्यचिन्तां चकार न ॥४०४॥

एतद्व्यसनमाकर्ण्याऽन्ये ते विपक्षभूभुजः ।
पुरं सर्वाऽभिसारेण, क्षणात् त्रिःपर्यवेष्टयन् ॥४०५॥

महासेनस्तथा ज्ञात्वा, निःसृत्य समरं व्यधात् ।
कुमारहस्तिसाहाय्याद्विना विनाशितः स तैः ॥४०६॥

ततो बुद्धिबलो मन्त्री, द्राक् प्रतोलीरदापयत् ।
राज्ञः शोकेन सर्वाणि, धरणकान्यमोचयत् ॥४०७॥

अस्माकं मृत्युरायातो, विना विमलवाहनम् ।
तद्गच्छ जीव त्वमिति, मुक्तो दास्याऽस्मि पञ्जरात् ॥४०८॥

अमात्योऽन्तर्बहिर्भूपा, लक्षसैन्यसमन्विताः ।
सन्तीति तत्पुरं मुक्त्वा, समागां प्रेयसि ! क्षणात् ॥४०९॥

शुकं विज्ञाय श्रुत्वा च, गताऽसुं पितरं निजम् ।
श्लथहस्तग्रहो भूमौ, कुमारौ मूर्च्छितोऽपतत् ॥४१०॥

तस्य पतननिर्घाताद्विनिद्रोऽभूदजासुतः ।
अपश्यंस्तत्र तं वेगादागाच्च तस्य सन्निधौ ॥४११॥

उक्तोऽपि न यदा वक्ति, तदाजासूरवीजयत् ।
असिञ्चच्चाऽम्भसा सोऽथ, स्वस्थीभूतस्ततोऽवदत् ॥४१२॥

खड्गं खड्गमरे ! पाणौ, देहि यत्पितृघातिनः ।
शत्रून् व्यापाद्य पित्रेऽहं, तदसृग्भिर्ददे पयः ॥४१३॥

भीतोऽवोचदजापुत्रः, कुमारः क्व नु ते ह्यसि ? ।
क्व शत्रवः ? क्व पिता ते ?, येनैवं भाषसे मुहुः ॥४१४॥

एवमुक्तः कुमारोऽसौ, क्षणमाधाय चेतनाम् ।
महासेनपतः ! क्वाऽसि ?, गतस्त्वमिति मूर्च्छति ॥४१५॥

वीजयत्येव भूयोऽस्मिन्नजापुत्रे शुकस्ततः ।
महासेनेति तद्वाचं, श्रुत्वाऽगाद्बहिराश्रयात् ॥४१६॥

ज्योत्स्न्यां रात्रौ च राज्ञोऽयं, पुत्रो विमलवाहनः ।
कथमत्राऽऽगादिति स, ज्ञात्वाऽपतत्तदन्तिकम् ॥४१७॥

कुमाराऽऽश्वसिहि त्वं तमित्याह शुकपुङ्गवः ।
बन्धोरिव वचस्तस्य, श्रुत्वोत्तस्थौ च सोऽप्यथ ॥४१८॥

वक्षसा शुकमादाय, सबाष्पं तमुवाच सः ।
कथमेतदरिष्टं मे, पितृराष्ट्रस्य चाऽभवत् ? ॥४१९॥

स प्राह त्वां विना सर्वमत्या[त्य]हितमभूदिदम् ।
तत्त्वं मुञ्च शुचं शत्रुविजयाय यतस्व च ॥४२०॥

कुमारः प्राह दूरेऽहं, कुर्वे ब्रूहि किमत्र भोः ? ।
शस्त्राशस्त्रिषु युद्धेन, जीयन्ते शत्रवो यतः ॥४२१॥

अथोऽवोचदजापुत्रो, मा भैषीर्मा भवाऽऽकुलः ? ।
एष हन्मि द्विषस्तेऽहमित्युक्त्वा शुकमादिशत् ॥४२२॥

हनूमानिव सीतायाः, शुद्धिमस्य शुक ! द्रुतम् ।
गत्वा विज्ञपयाऽमात्यं, सावष्टम्भो भवेद्यथा ॥४२३॥

कुमार ! त्वं स्वयं लेखं, लिखित्वा क्षेमशंसिनम् ।
शुकायाऽर्पयेत्युक्तोऽथ, तेन सोऽपि तथाऽकरोत् ॥४२४॥

शुकश्च तस्य वात्सल्याच्चिरस्थितिममत्वतः ।
लेखमादाय गत्वा च, मन्त्रिणेऽथ समार्पयत् ॥४२५॥

कुमारस्य सतः शुद्धौ, कथितायां शुकेन सः ।
सावष्टम्भः सभायां तं, सहर्षं मन्त्र्यवाचयत् ॥४२६॥

शुकाऽनुपदमेषोऽहमागत्याऽरीन्निहन्मि तत् ।
महामात्य ! त्वया भाव्यमकुतोभयचेतसा ॥४२७॥

वाचयित्वेति स प्रोच्चैर्विशेषाद्गतभीरभूत् ।
सावष्टम्भे प्रभौ पृष्टे, पत्तयः स्युरभीतयः ॥४२८॥

भारण्डपक्षिणो रूपं, विधाय गुटिकावशात् ।
पक्षाऽन्तस्तान्निधायाऽऽगात्, पुरे तस्मिन्नजासुतः ॥४२९॥

आगतो बहिरद्राक्षीत्, सैन्यं तत्परितः पुरम् ।
कुमारोऽरिवधोपायं, पप्रच्छाऽजासुतं ततः ॥४३०॥

आत्ताऽऽत्मरूपः स प्राह, सामसाध्यो न दण्ड्यते ।
तत् साम्नैव मया साध्यास्तवैते रिपवः खलु ॥४३१॥

विना रिपुवधं न स्यात्, पितृवधप्रतिक्रिया ।
इति चेन्मन्यसे तत् श्वः, कर्त्ताऽस्मि पश्यतस्तव ॥४३२॥

ओमिति प्रतिपद्याऽसौ, कुमारस्तद्युतस्तदा ।
समागाद्गोपुरद्वारे, तदध्यक्षमुवाच च ॥४३३॥

गत्वा ब्रूहि महामात्यं, यथा शुकनिवेदितः ।
स पुमान् द्वारमध्यास्ते, ततोऽसौ तत्तथाऽकरोत् ॥४३४॥

सहर्षसम्भ्रमो मन्त्री, स्वयमागत्य तत्र हि ।
नत्वा कुमारमादाय, सार्धं तैः सौधमागमत् ॥४३५॥

वृत्तान्तं कथयन् पृच्छन्, मन्त्री रात्रिं निनाय ताम् ।
प्रातरुत्साहपूर्वं च, स्वे राज्ये तं न्यवीविशत् ॥४३६॥

विपक्षग्रीष्मसन्तप्तं, तत्पुरं तेन भूभुजा ।
सहसाऽऽयाताऽब्देनेव, निर्वापितमभूत्तदा ॥४३७॥

विमलवाहनो राजा, पुरेऽस्मिन्निति डिण्डिमे ।
मन्त्रिणा वादितेऽस्माकं, भीरेषेत्यरयोऽहसन् ॥४३८॥

पूरोधपितृशोकाभ्यां, ज्वलन्नन्तरुवाच तम् ।
अजापुत्रं रिपूच्छेदे, राजा विमलवाहनः ॥४३९॥

प्रत्यवोचदसौ राजन् !, दूतेनाऽऽदिश शात्रवान् ।
यत् प्रातर्मङ्गले वारे, युधि सन्नह्यतामिति ॥४४०॥

प्रपद्य तद्वचो दूतात्तत्थैवाऽकरोन्नृपः ।
विना गजं क्व रोक्ष्यामीत्यूचे च बहुखेदभाक् ॥४४१॥

प्रतिपन्नस्य निर्वाहं, कुर्वन्नजासुतस्ततः ।
तत्सरःपाथसा हस्तिपुरुषं हस्तिनं व्यधात् ॥४४२॥

हस्तिनं वीक्ष्य तं राजा, पितरं स्वमिवोच्चकैः ।
इदानीं रिपुसैन्यं तद्भग्नमेवेत्यवोचत ॥४४३॥

गजं जयमिवाऽऽरुह्य, भूपः सर्वाऽभिसारतः ।
निस्ससार पुराद्योद्धुमिन्द्रो दैत्यैरिवाऽरिभिः ॥४४४॥

अजापुत्रस्तु शत्रूणां, यत्रेभाऽश्वं पयः पिबेत् ।
तस्मिन् सरसि तच्चूर्णं, क्षिप्त्वा पाल्यामुपाविशत् ॥४४५॥

पयः पातुं तदाऽरीणां, बह्वाश्वेभमगात् सरः ।
जातं च चूर्णमाहात्म्यात्पुंरूपेणैकहेलया ॥४४६॥

लक्षसङ्ख्यं तदाऽश्वेभं, पुरुषीभूय सत्वरम् ।
तच्चूर्णेन वशीभूतमजापुत्रमुपेयिवान् ॥४४७॥

विना चाऽश्वेभसैन्यं ते, दंष्ट्राहीना इवोरगाः ।
स्फटाऽऽटोपं विधायैव, खले योद्धुमुपाययुः ॥४४८॥

विज्ञाय तत्स्वरूपं स, राजा विमलवाहनः ।
दधावे सम्मुखस्तेषामुपायो बलवान् खलु ॥४४९॥

पृथिवीस्थं तमस्काण्डं, नभस्स्थेनेव भास्वता ।
तेनेभस्कन्धभाजा तद्विध्वस्तं शात्रवं बलम् ॥४५०॥

गजेन मन्दरेणेवाऽऽलोड्य शत्रुबलाऽम्बुधिम् ।
विमलवाहनस्याऽथ, दत्ता श्रीः श्रीपतेरिव ॥४५१॥

हस्तग्राहं गृहीतास्ते, केचिदापातमारिताः ।
विमुच्याऽस्त्रं गताः केचित्, द्विषोऽश्वेभविवर्जिताः ॥४५२॥

अजापुत्रकृतोपायाज्जयी विमलवाहनः ।
शोधयित्वा रणं हर्षाद्, ययौ सौधमथाऽऽत्मनः ॥४५३॥

गोपुराणि ततोऽक्षीणीवोद्घाटितानि सर्वतः ।
पुर्या व्यापादिताऽरातिनिध्यानकौतुकादिव ॥४५४॥

महासेननृपस्यौर्ध्वदेहिकं सोऽकरोन्नृपः ।
क्षत्रियाणां रिपूच्छेदे, प्रीयन्ते पितरः खलु ॥४५५॥

ततो नगरशोभाऽभूद्, वचनानामगोचरा ।
राज्यलाभजयप्राप्त्योर्मङ्गलानि च भूपतेः ॥४५६॥

अजापुत्रं च तैर्लक्षसङ्ख्यैरश्वेभपुरुषैः ।
सहाऽऽयातं समीक्ष्याऽथ, राजा सम्मुखमाययौ ॥४५७॥

आनीय सौधमात्मीयं, तं प्रत्येष कृताऽञ्जलिः ।
राजाऽवोचन्महासत्त्व !, दत्तं मे जीवितं त्वया ॥४५८॥

रिपुभिर्लुण्ट्यमानं च, राज्यं मे रक्षितं त्वया ।
अशक्यो मादृशां वैरप्रतीकारस्त्वया कृतः ॥४५९॥

इत्यनेकोपकारैस्तैस्त्वं ममाऽस्युपकारकः ।
तत् समादिश येन स्यामनृणी सुहृदस्तव ॥४६०॥

सोऽथ तद्वचसा प्रीतः, प्राह प्रीतिपरं नृपम् ।
त्वत्समीहितसिद्धयैव, सिद्धं मम समीहितम् ॥४६१॥

परोपकारादन्या मे, नाऽभीष्टा शक्रताऽपि हि ।
स चाऽभूत्त्वयि सम्पूर्णस्तदलं द्रविणाऽऽदिभिः ॥४६२॥

इत्याऽऽलप्य नृपं प्रीत्या, तस्थौ तत्रैव किञ्चन ।
अन्यदोत्कण्ठितः सोऽभूत्स्वकीयां नगरीं प्रति ॥४६३॥

अचिन्तयच्च यद्दृष्टं, दृग्भ्यां त्रिभुवनं मया ।
कृतः परोपकारश्च, तद्यामि स्थानमात्मनः ॥४६४॥

चिन्तयित्वेति राजानमनुज्ञाप्याऽचलत्पुरात् ।
तैरश्वेभनरैर्लक्षसङ्ख्यै समकरैर्युतः ॥४६५॥

इतश्च तत्पुरीराजा, चन्द्रापीडो निशाऽत्यये ।
सस्मार देवतावाचमात्मघातनिवेदिनीम् ॥४६६॥

विममर्श च यः पूर्वं, कालो मे कथितस्तया ।
तस्याऽवधेस्तु पर्यन्ते, पक्ष एकोऽवसीयते ॥४६७॥

तदधुना समायातं, दैवज्ञं सत्यनामकम् ।
पृच्छामीत्यवधार्याऽन्तः, प्रातर्भूपस्तथाऽकरोत् ॥४६८॥

सोऽपि ग्रहबलं वीक्ष्य, निश्चित्य च यथातथम् ।
समाख्यद् भूभुजे राजन् !, पक्षाऽन्ते मरणं तव ॥४६९॥

धीरोऽपि हि नृपो वाचमेतामाकर्ण्य सत्वरम् ।
मृत्युनेव तदाऽऽलीढो बभूव गतचेतनः ॥४७०॥

ततः स्वरक्षणोपायान्, विधाय स विशेषतः ।
अजापुत्रस्य शुद्ध्यर्थं, प्राहिणोत् सर्वतश्चरान् ॥४७१॥

न कोऽपि च चरः सैन्यं, लक्षसङ्ख्यं समापतत् ।
आख्यत्ततो नृपः किञ्चिच्चित्ते स्वास्थ्यमुपेयिवान् ॥४७२॥

नित्यं कारयतः शुद्धिं, चन्द्रापीडस्य भूपतेः ।
पक्षाऽन्तदिवसः साक्षान्मृत्युकाल इवाऽऽगमत् ॥४७३॥

इतश्चाऽपराधे कस्मिन्, सुबुद्धिः सचिवो निजः ।
चन्द्रापीडनृपेण प्राक्, पुरान्निर्वासतोऽभवत् ॥४७४॥

देशाद्देशं परिभ्राम्यन्, सुबुद्धिः सम्मुखोऽभवत् ।
अजापुत्रस्य स्वपुरीं, प्रति यातस्तदाऽध्वनि ॥४७५॥

सुबुद्धिर्वीक्ष्य तं लक्षपुरुषैः केवलैर्वृतम् ।
कलभैर्यूथेशमिव, हृष्टश्चेतस्यचिन्तयत् ॥४७६॥

यं किलाऽकथयत् पूर्वं, राज्ञे सा देवता तदा ।
तस्य मृत्युकरः सोऽयमभ्येति खलु पुरुषः ॥४७७॥

चन्द्रापीडो मयोच्छेद्यः, प्रतिज्ञेति ममाऽधुना ।
एनमाश्रित्य पूर्णा स्यादित्युपेत्य ननाम तम् ॥४७८॥

आख्याय पूर्ववृत्तान्तमात्मनस्तस्य चाऽथ सः ।
ऊचे मनोरथा नाथ ! पूर्णा मे तव दर्शनात् ॥४७९॥

राज्यं देवतया दत्तं, तवेदानीं सख्यान्वहम् ।
तत्प्रीणय प्रजा राज्यमादाय तेन पीडिताः ॥४८०॥

अथोपलक्ष्य तं श्रुत्वा, राज्यप्राप्तिं तथाऽऽत्मनः ।
हर्षोत्कर्षाज्जगादैवमजासूर्मन्त्रिपुङ्गवम् ॥४८१॥

यदि देवतया दत्तं, राज्यं मे पूर्वपुण्यतः ।
तथाऽपि तन्महामात्य ! त्वद्बुद्ध्यैव मयाऽऽप्स्यते ॥४८२॥

यतः— यः किल परोपघाती, सति तस्मिन्नभिभवेज्जनं नाऽन्यः ।
पश्यत लोकैः क्रियते, दोषभयाल्लोहरक्षा हि ॥४८३॥

कर्णे सोऽकथयत्तस्मै, यदेते पुरुषाः खलु ।
लक्षसङ्ख्यं तदश्वेभं, मया विद्धि नरीकृतम् ॥४८४॥

साश्चर्यं प्राह मन्त्री तमश्रद्धेयमिदं महत् ।
तिरश्चां मर्त्यरूपत्वं, पुनस्तैरश्च्यमेव तत् ॥४८५॥

परं मन्येऽन्यथा न स्याद्गूढा ते लक्षसैन्यता ।
विनेमां न वधो राज्ञो नैतद्राज्यं भवेच्च ते ॥४८६॥

ततोऽसम्भाव्यमप्येतत्, सुकरं तव कुर्वती ।
अधुना दास्यति प्राज्यं, राज्यं सा देवताऽनुगा ॥४८७॥

इत्यालप्य मिथस्तौ च, वेगादागत्य तां पुरीम् ।
सायं विविशतुः सार्धं, पुम्भिस्तैस्तु पृथक्कृतैः ॥४८८॥

निभृतं गत्वा स्वज्ञातिगृहांस्तेनाऽथ मन्त्रिणा ।
प्रागुद्विग्नो नृपे राजलोको द्रागात्मसात्कृतः ॥४८९॥

तदैव भूभुजा सैन्यं, सनाथं मण्डलेश्वरैः ।
पराऽवस्कन्दरक्षाऽर्थमादिष्टं निरगात्पुरात् ॥४९०॥

एतावत्यन्तरे मन्त्री, व्यजिज्ञपदजासुतम् ।
यदेते पुरुषाः स्वं स्वं, स्वरूपं प्राप्यतामिति ॥४९१॥

कृते तेन तथाऽऽत्मीयान्, वर्ग्यानारोह्य तेष्वथ ।
अजापुत्रं पुरस्कृत्य, सुबुद्धिसचिवोऽचलत् ॥४९२॥

स मार्गे मारयन् लोकं, कृतान्त इव निर्दयः ।
ससैन्यः प्राविशद्राजद्वारेऽघ्नन्नङ्गरक्षकान् ॥४९३॥

राजद्वारप्रतोल्यां स, मुक्त्वाऽऽत्मीयांस्तु पुरुषान् ।
मन्त्री साऽजासुतः सौधमारुरोह निमेषतः ॥४९४॥

चन्द्रापीडनृपो राजा, लोकैः सर्वैरुपेक्षितः ।
दधावे सम्मुखं तेषां, खड्गमाकृष्य धैर्यभाक् ॥४९५॥

जितकासी नृपो युद्ध्यमानस्तैः सचिवाऽऽदिभिः ।
अजापुत्रेण खड्गेन, प्रेषितो यममन्दिरम् ॥४९६॥

तदैव सचिवो राज्ये, न्यवीविशदजासुतम् ।
पूर्णप्रतिज्ञो हर्षाऽश्रुजलैः सिञ्चन्नमूं पुरीम् ॥४९७॥

यतः— बहुसमवायो यस्मिन्, स खलु महान् स महतोऽपि मान्यश्च ।
सकलेन्द्रियपरिकरणादुपरितनोरुत्तमाङ्गं यत् ॥४९८॥

द्विसहस्रप्रमाणैस्तैर्हस्तिभिर्वाजिनां पुनः ।
अष्टानवतिसहस्रै राजा तामनयन्निशाम् ॥४९९॥

अविज्ञातस्वरूपाणां, पौराणां भीर्बभूव सा ।
यया प्रौढसपत्न्येव, सङ्गन् निद्राऽपि नाऽपि तैः ॥५००॥

गूढदुष्करकार्याणां, सिद्धावाद्यसहायिका ।
कृत्वा साहाय्यमेतस्य, कृतकृत्या निशाऽगमत् ॥५०१॥

वीक्षितुं रात्रिवृत्तान्तं, सञ्जातभयकौतुकः ।
दूरे प्रोच्चैस्ततो भानुरारुरोहोदयाऽचलम् ॥५०२॥

तदा च सचिवः पुर्यां, डिण्डिमं द्रागवादयत् ।
न भेतव्यं जना ! यद् वो, बभूवाऽजासुतो नृपः ॥५०३॥

एतदाकर्ण्य पूर्लोकश्चन्द्रापीडेन पीडितः ।
हृष्टोऽकार्षीत् पुरीशोभामनादिष्टोऽपि भूभुजा ॥५०४॥

ततश्च राजलोकेषु, पूर्जनेषु नियोगिषु ।
राजन्येषु स्वस्वौचित्योपनीतोपायनेष्वथ ॥५०५॥

शङ्खध्वनौ प्रवृत्ते च, जयवादिषु बन्दिषु ।
वादिते पञ्चशब्दे च, स्त्रीगीतमङ्गलध्वनौ ॥५०६॥

पूर्वदिक्स्थापितस्वर्णसिंहासने निवेश्य तु ।
अजापुत्रस्य मन्त्र्याद्या, राज्याऽभिषेकमादधुः ॥५०७॥ [त्रिभिर्विशेषकम्]

राज्ञा च सचिवाऽऽलोचाद्व्यापाराः स्वनियोगिनाम् ।
आदीयन्त तथाऽन्योऽपि, सच्चक्रे सकलो जनः ॥५०८॥

चन्द्रापीडनृपाऽऽदेशान्मार्गरक्षामुपेयुषः ।
ससैन्यान्मण्डलेशान् स प्रावेशयत्प्रसादतः ॥५०९॥

सर्वमप्यात्मसात्कृत्वा, पूर्वं राज्यपरिग्रहम् ।
स राज्यं पालयामास, स्वराज्यमिव वासवः ॥५१०॥

रूपलावण्यसम्पूर्णा, भूभुजां बहुकन्यकाः ।
स्वयंवरतया याताः, पर्यणैषीदजासुतः ॥५११॥

अथ– कोकिलाकूजितैराशु, जाग्रत्पञ्चेषुभूभुजि ।
आपानगोष्ठीमिलितगुञ्जन्मधुपकेतके ॥५१२॥

द्राक्षामण्डपविस्ताराऽलब्धमध्याऽर्करोचिषि ।
पादावर्त्तपतत्पाथः, शीतशीकरशाद्वले ॥५१३॥

दक्षिणाऽनिलकल्लोललोलन्माकन्दमञ्जरौ ।
दोलाकेलिलुलद्धारपौरस्त्रीगीतशर्मणि ॥५१४॥

मानिनीमानसन्धानच्छेदमेदुरनर्मणि ।
हल्लीसकभ्रमिभ्राम्यत्तरुणीजनविभ्रमे ॥५१५॥

एवंविधवराऽऽरामे, रामाजनपरिष्कृतः ।
वसन्तसमये प्राप्ते, ययावजासुतो नृपः ॥५१६॥ [पञ्चभिः कुलकम्]

तस्मिन् सान्तःपुरे तत्र, क्रीडति स्वेच्छया नृपे ।
श्लोकमेकं पपाठैको दूरस्थः कोऽपि मानवः ॥५१७॥

यत्र तिष्ठसि नित्यं त्वं, वसन्तीं तत्र मातरम् ।
अदृष्ट्वाऽपि हि भुंक्षे चेत्तत्ते धिग् हंस ! हंसताम् ॥५१८॥

एतदाकर्ण्य राजाऽपि, चिन्तयामास चेतसि ।
श्लोकेनाऽनेन कोऽप्याख्यत्, पुरीस्थां मातरं मम ॥५१९॥

सुबुद्धिं चाऽऽह भो मन्त्रिन् !, वयं भोक्ष्यामहे तदा ।
यदात्ममातरं साक्षाद्, द्रक्ष्यामो निजचक्षुषा ॥५२०॥

तदैवाऽगान्नृपः सौधं, स्वराज्यं गणयन्मुधा ।
किं विना स्वजनान् स्वांस्तु, गरीयस्याऽपि सम्पदा ॥५२१॥

ततश्चाऽऽकार्य प्रच्छन्नं, चरं समाधिशन्नृपः ।
दक्षिणेन बहिर्वप्रात् पशुपालोऽस्ति वाग्भटः ॥५२२॥

ततस्त्वं पृच्छ गत्वा तं, कोऽप्यास्तेऽभूच्च ते सुतः ।
इत्युक्ते भूभुजा गत्वा, चरः पप्रच्छ तं तथा ॥५२३॥

सोऽप्याख्यन्नहि मे पुत्रो जातः किन्त्वध्वनि स्थितः ।
गृहीत्वा पोषितः सोऽपि, वृद्धो भूत्वाऽगमत्क्वचित् ॥५२४॥

इति स तद्वचः श्रुत्वा, राज्ञे व्यज्ञपयत्तथा ।
राजाऽपि गतसन्देहश्चरवाचाऽभवत्ततः ॥५२५॥

नृपतेर्मातरं पुर्यामत्र यः कथयेत्सतीम् ।
तस्याऽर्थितं नृपो दत्ते, स तत्रेत्युदघोषयत् ॥५२६॥

न कोऽप्यकथयद्राज्ञे, यावत्तावदुपेत्य तम् ।
भूपं विज्ञपयामास, रोगिणी काचिदङ्गना ॥५२७॥

कथयिष्यामि ते राजन् !, मातरङ्खलु सम्प्रति ।
इमं रोगं मदीयं चेत्, कथञ्चित्स्फेटयिष्यसि ॥५२८॥

सहर्षं प्राह तां राजा, दृष्टायां मातरि ध्रुवम् ।
चेन्नोपशमयाम्येनं, तत्पिबामि पयोऽपि न ॥५२९॥

इति नृपोदिते साऽपि, गत्वा क्वाऽपि क्षणात्ततः ।
गङ्गामानीय सैषा ते, मातेति प्राह सा नृपम् ॥५३०॥

गङ्गायाश्च नृपं वीक्ष्य, बिभ्रत्याः परमां मुदम् ।
स्तनाभ्यामक्षरत् स्तन्यं, दृग्भ्यां च सलिलं यथा ॥५३१॥

यतः– दग्धो दोस्थ्येन जनो मिलितः स्वजनस्य तापमपनयति ।
शीतलसलिले लुलिता, ह्यान्तरदाहं सुधा त्यजति ॥५३२॥

ततः प्रत्ययितो राजा, चक्रे तस्यै नमन्नमः ।
अपृच्छच्च पिता मे क्व ?, सा प्राह स्वर्ययौ स हि ॥५३३॥

पुनराह नृपः कोऽप्यन्योऽस्ति सा प्राहकोऽपि न ।
अहं धृताऽस्मि भाग्यैः स्वैः, राज्यं दर्शयितुं तव ॥५३४॥

त्वां च राज्यधरं ज्ञात्वा, पिता ते धार्मिको जडः ।
मत्तस्त्वां त्याजयामास, स्वपुण्यैस्त्वं तु वर्द्धसे ॥५३५॥

श्रुत्वेति नृपतिस्तादृग्, निजभाग्यप्रमोदितः ।
आनयत् सौधमात्मीयं, मातरं देवतामिव ॥५३६॥

अथाऽहूय नृपो वैद्यान्, रोगिणीं तामदर्शयत् ।
परीक्षापूर्वमेते च, वीक्ष्य व्यजिज्ञपयन्नृपम् ॥५३७॥

नाथाऽस्या अन्त्रसाडोऽभूदस्मादृशामगोचरः ।
औषधैरपरैर्वाऽप्यसाध्यः स्ववैद्ययोरपि ॥५३८॥

तदैव पश्यतां तेषां, दुर्गन्धीनि बहून्यपि ।
मुखेन मांसशकलान्योत्कुर्वती च साऽवमत् ॥५३९॥

समीक्ष्य तां तथा राजा, करुणाऽमृतसागरः ।
वैद्यान् यद्वित्थ तत्तावत्कुरुतेत्यादिशन्मृदुः ॥५४०॥

राजाऽऽदेशाद्दुर्वैद्यास्तस्यै योग्यमथौषधम् ।
तदुग्रतापतः शीघ्रमचैतन्यमवाप सा ॥५४१॥

राज्ञा च भोः ! पयः शीतं, व्यञ्जनं चाऽऽनय द्रुतम् ।
इत्युक्तः पुरुषः कोऽपि, तदाऽऽनीयाऽनिलं व्यधात् ॥५४२॥

नाथाऽस्माकमसाध्योऽयमित्यगुर्गदवेदिनः ।
रोगिण्याश्च पुनश्छर्दिर्जुगुप्स्याऽभूत्तदैव हि ॥५४३॥

तथाभूतामिमां पश्यन्नुत्तप्तनकुलीमिव ।
पुनर्वैद्यान् समाहूयाऽदापयच्चौषधाऽन्तरम् ॥५४४॥

अनिवृत्ते गदे तस्याः, स भूपो नाऽपिबत् पयः ।
सन्तो ह्यकृतसन्धाऽर्थाः, परित्यजन्त्यसूनपि ॥५४५॥

यान्ती मूर्च्छां क्षणादाश्वासितां तां श्वसतीं पुनः ।
प्रेक्ष्य राज्ञो मनोऽप्यासीत्तद्दशानुविधायकम् ॥५४६॥

अथाऽकस्मात्कुतोऽप्यागाद्, वैद्यो वैदेशिकस्तदा ।
किमेतदिति वाचा च, तेन प्रैक्ष्यत रोगिणी ॥५४७॥

विमृश्याऽन्तः किमप्याह, रोगोऽस्या मम गोचरः ।
राजा सहर्षमाहैनं, यद्येवं त्वं यतस्व तत् ॥५४८॥

सकारुण्यमिवाऽऽहैष, यदानयत सम्प्रति ।
केवलाऽजाक्षीरपुष्टनरजिह्वान्तजङ्गलम् ॥५४९॥

अचिन्तयत्ततो राजा, हहा ! कीदृगुपस्थितम् ।
यज्जिह्वान्तपलं ग्राह्यं, स म्रियतेऽन्यथा त्वियम् ॥५५०॥

पुनर्विमृश्य ज्ञात्वा चाऽऽत्मानमजास्तनन्धयम् ।
रोमाञ्चाऽञ्चितगात्रोऽभूद्राजा पुनरचिन्तयत् ॥५५१॥

प्रतिज्ञाता प्रतिज्ञा मे, जिह्वया ह्यनयैव तु ।
यद्यनयैव पूर्णा सा, तर्त्किं नाऽभूत् प्रियं मम ? ॥५५२॥

किञ्च– राज्येनाऽथ शरीरेण, सन्तोऽन्यमुपकुर्वते ।
म्रियमाणां स्त्रियं जिह्वाखण्डेन किमहं न हि ? ॥५५३॥

ततश्चाऽशोधयित्वाऽपि, पुरुषं तं तथाविधम् ।
आदाय शस्त्रिकां पाणौ, साऽवष्टम्भो नृपोऽवदत् ॥५५४॥

अहो ! वैद्याऽहमेवाऽस्मि, जातोऽजाक्षीर पोषितः ।
मज्जिह्वान्तपलेन त्वमुल्लाघां कुर्विमां स्त्रियम् ॥५५५॥

हस्तेनैकेन जिह्वाऽग्रं, धृत्वाऽन्येन च शस्त्रिकाम् ।
यावत्तां छेत्तुमारेभे, तावन्नभस्यभूद्वचः ॥५५६॥

अलममङ्गलाऽऽधानजिह्वाच्छेदेन भूपते ! ।
पीयूषवर्षिणी सैषा, चिरं प्रीणयतां प्रजाः ॥५५७॥

आविरासीत्ततो देवी, दिव्याऽलङ्कारशालिनी ।
स वैद्यो रोगिणी साऽपि, क्वाऽप्यगात्तत् क्षणादपि ॥५५८॥

सम्भ्रान्तश्चिन्तयामास, राजा किमिदमद्भुतम् ? ।
कैषा देवी ? क्व सा मन्दा स्त्री ? वैद्यश्च ययौ क्व सः ? ॥५५९॥

इति ससम्भ्रमं भूपं, देवी सा प्राह भूपते ! ।
श्रीमच्चन्द्राननापुर्या, अधिष्ठात्र्यस्मि देवता ॥५६०॥

मया ते दत्तराज्यस्य, परीक्षेयं कृता खलु ।
निर्व्यूढोऽसि च सत्त्वेन, चिरं राज्यं कुरुष्व तत् ॥५६१॥

इत्याशीर्वादमुखरा, प्रदायाऽऽभरणानि सा ।
ययौ स्वस्थानमेषोऽपि, राजा पालयति प्रजाः ॥५६२॥

रात्रावजासुतः शय्याविश्रान्तः श्रान्तमानसः ।
अनागच्छन्त्यां निद्रायां, पप्रच्छ सुहृदं कथाम् ॥५६३॥

सोप्याऽऽक्षेपकथामर्हद्धर्माऽऽश्रितां मृदूक्तिभिः ।
शृणुतेति हि भाषित्वा, स्पष्टमाचष्ट सत्कथाम् ॥५६४॥

ग्रन्थाग्रम् ॥६०७॥ तथाहि–

आरामनन्दनकथानकम् ।

पुरं लक्ष्मीपुरं नाम, धाम धर्मनयश्रियाम् ।
अस्ति तीर्थकृतां हर्म्यैर्धर्म्यैः साधुभिरावृतम् ॥१॥

समुद्रश्लाघितैः कामं, केशवैरिव जिष्णुभिः ।
लब्धगोत्रप्रतिष्ठैश्च, शङ्करैरिव चेश्वरैः ॥२॥

तत्त्वार्थबोधिभिर्बौद्धैरिव च क्षणलालसैः ।
विन्ध्याचलैरिवाऽत्युच्चैः, सदा नर्मदयाऽऽवृतैः ॥३॥

सुवर्णैर्मेरुभिरिव, सर्वदा सुरमोदितैः ।
कामैरिव सुशृङ्गारैर्जनचित्तनिवासिभिः ॥४॥

वैताढ्यैरिव सकलधौतकूटैः सदोज्ज्वलैः ।
पुरुषपुङ्गवैर्यत्तु, सर्वदैवोपशोभितम् ॥५॥ [चतुर्भिः कलापकम्]

भानुर्व्योम्नीव सत्तेजा, राजा तत्राऽस्ति विक्रमः ।
यस्योदये द्विषद्भूका, जग्मुर्भूधरकन्दराः ॥६॥

शश्वन्महाजयः शूराः, प्रतापश्च महीपतेः ।
प्रेङ्खन्महाऽरयो वाजिसार्थः पदातयोऽपि च ॥७॥

दत्तनानापदो राज्यक्रमोऽपि शत्रवोऽपि च ।
सर्वदा चापशोभा भ्रूवल्लरी रिपवोऽपि च ॥८॥

प्रतापसहिताः सर्वेप्यारामाः पत्तयोऽपि च ।
प्रासादराजिता शश्वत्पूः सेना जनताऽपि च ॥९॥

महेभ्यास्तत्र चत्वारो वणिजः सन्ति सोदराः ।
समवायादेकधनाः, पुरुषार्था इवाऽङ्गिनः ॥१०॥

त्रयाणां ज्यायसामस्ति, पुत्रपुत्र्यादिसन्ततिः ।
विशालबुद्धिनाम्नस्तु, तुरीयस्य न विद्यते ॥११॥

सर्वेषामन्यबन्धूनां, बहुशस्तनुजन्मनाम् ।
प्रतिवर्षं विधीयन्ते, विवाहाऽऽदिमहोत्सवाः ॥१२॥

पत्नी विशालबुद्धेस्तु, पद्मश्रीर्नाम साऽन्यदा ।
समीक्ष्य ज्येष्ठजायानां, विवाहे परमां श्रियम् ॥१३॥

स्वाऽन्ते दध्यावधन्याऽहं, यस्या मे नाऽस्ति पुत्रकः ।
सति तस्मिन् ममाऽप्येवं, पूर्णीभवति कौतुकम् ॥१४॥ युग्मम् ॥

पत्यौ सत्यपि नारीणां, सर्वोत्सवनिबन्धने ।
अनिर्वाच्या मुदस्तासां, न भवेयुः सुतं विना ॥१५॥

पितृश्वशुरवर्गोऽपि, सति पुत्रे हि योषितः ।
विवाहाऽऽदिमहव्याजात्, सत्करोति विशेषतः ॥१६॥

इत्यलब्धरतिः पुत्राऽनुत्पत्तिदुःखपूरिता ।
पद्मश्रीर्नित्यशो गत्वा, गृहाऽऽरामे रुरोद सा ॥१७॥

रुदतीमेकदा तां हि, रोदयन्तीं तरूनपि ।
आगत्य वानरी काचिदूचे किं सखि ! रोदिषि ? ॥१८॥

पद्मश्रीः प्राह किं तुभ्यं, मन्दभाग्योद्विराम्यहम् ? ।
येन मां बाधते वन्ध्याकलङ्कः सखि ! वानरि ! ॥१९॥

ततः सा वानरी किञ्चिद्विचिन्त्याऽन्तः कुतोऽप्यथ ।
औषधीं काञ्चिदानीय, पद्मश्रियमवोचत ॥२०॥

इमां दिव्यौषधीं पिष्ट्वा, पिबेस्त्वं स्नानवासरे ।
अचिरादेव गर्भस्ते, भावी सखि ! न संशयः ॥२१॥

भावी भगिनि ! पुत्रश्चेत्, त्वदौषध्याऽनया मम ।
तदा सप्तसरं हारं, तुभ्यं दास्यामि निश्चितम् ॥२२॥

कथं मर्त्यगिरा ब्रूषे ?, तयेत्युक्ताऽऽह वानरी ।
वानरविद्ययेत्येतच्छ्रुत्वाऽगादपर गृहम् ॥२३॥

तथा तामौषधीं चक्रे, पद्मश्रीः स्नानवासरे ।
मेने सा देवतानां चोपयाचितशतान्यथ ॥२४॥

ततोऽभूद्गर्भसम्भूतिस्तस्याः पद्मश्रियः क्रमात् ।
पूर्णेषु दिवसेष्वेषा, दुःखेनाऽसूत वानरम् ॥२५॥

चित्रं चित्रमहो !!! जातो, वानरोऽस्याः स्तनन्धयः ।
इत्युक्ते सूतिदायिन्या, पद्मश्रीस्तु मुमूर्च्छ सा ॥२६॥

मूर्च्छाव्यपगमादुच्चैर्हा ! दैवेति ब्रुवाणया ।
तया तत्र गृहाऽऽरामे, त्याजितो वानराऽर्भकः ॥२७॥

दिवसान् गणयन्त्या च, वानर्या तत्र सोऽर्भकः ।
त्यक्तमात्रोऽपि जगृहे, गृहे नीतो निजे मुदा ॥२८॥

गूढगर्भवशादेषोऽज्ञात एव सुतोऽजनि ।
स्तन्यं मेऽल्पं चेति व्याजात्, सा सखीस्तमदीधपत् ॥२९॥

पद्मश्रीश्च पटुर्जाता, पुनस्तत्रैव कानने ।
रुदती वीक्ष्य वानर्या, तयाऽऽगत्य न्यवार्यत ॥३०॥

मा रोदीः शृणु मे वार्त्तामयमग्रेतनः सुतः ।
मयैव वन्ध्ययाऽऽत्मार्थमुदपादि सखि ! त्वयि ॥३१॥

इदानीं तु गृहाण त्वमन्यन्मर्त्यसुतावहम् ।
औषधं नाऽत्र कर्तव्यः, सन्देहः सुतजन्मनि ॥३२॥

शपथपूर्वं तद्वाचि, साऽपि प्रत्ययिता पुनः ।
यथावदौषधं चक्रे, बभूव च सुतः क्रमात् ॥३३॥

आरामे हि रुदत्या मे, पुत्रोपायस्त्वभूदिति ।
चक्रे सा बालकस्याऽस्य, नामेत्यारामनन्दनः ॥३४॥

प्राप्तश्च पाल्यमानोऽसौ, कलाभिः सह यौवनम् ।
ततः पद्मावतीं नामोपयेमे श्रेष्ठिकन्यकाम् ॥३५॥

लब्धाऽधिकारौ ग्रीष्मर्तुः, कुस्वामीवोपतापयन् ।
अन्यदाऽभूत्ततः शूरो व्यापारयन् करान् खरान् ॥३६॥

व्यजनमरुतां सापत्न्येनाऽनिलः किल तापभृद्र-
जनिवनितासाम्याऽऽधिक्यात् क्रुधा ववृधे दिनैः ।
प्रहरति कृतच्छायाऽऽसेवान् रविः कुहनः करैः,
शयितुमनलं श्वासोऽप्यन्तर्बहिश्च गतान्यधात् ॥३७॥

आरामनन्दनः पत्न्या, समानगुणरूपया ।
रममाणोऽन्यदाऽयासीन्नर्मदां जलकेलये ॥३८॥

क्रीडत्यस्मिंस्तया सार्धं ग्रीष्मर्तौ नर्मदाजले ।
स्रोतःप्रतीपमभ्यागात्, पुष्पग्रथितकञ्चुकः ॥३९॥

यान्तं चित्रकवद्वीक्ष्य, पद्मावत्याह कौतुकात् ।
प्राणेश ! पश्य पश्याऽयं, कथमायाति कञ्चुकः ? ॥४०॥

कल्पद्रुकुसुमाऽऽमोदवासाऽऽढ्यनर्मदाजलः ।
स पुष्पकञ्चुको मध्यस्रोतमायाति दूरतः ॥४१॥

तं तथा वीक्ष्य सा प्राह, कौतुकोत्फुल्लमानसा ।
स्वामिन् ! कथञ्चिदानीय, ममैनं देहि कञ्चुकम् ॥४२॥

कथमभ्येत्ययं तन्वि !, शरवद्यान् महाजले ।
पत्येत्युक्ते जगादैषा, नर्मदा तर्हि मे गतिः ॥४३॥

इत्याऽऽग्रहग्रहग्रस्ता, सा नोज्झत्यात्मनो वचः ।
आरामसूस्तदाऽऽरुह्य, नावं कञ्चुकमन्वगात् ॥४४॥

आरामनन्दनोऽन्वेति, यथा यथा तथा तथा ।
शीघ्रशीघ्रतराऽऽवेगः, कञ्चुको याति हंसवत् ॥४५॥

बभूव रजनी नद्यामित्थं हि गच्छतोस्तयोः ।
दवीयोदेशतीरेऽथ, किञ्चिदस्थात् स कञ्चुकः ॥४६॥

आरामसूस्तमादातुं, किल व्यापारयत्करम् ।
तत्कञ्चुकशिराः काचित्, स्त्री नीरान्निरगाद्बहिः ॥४७॥

आरामनन्दनो दध्यावहो ! किमिदमद्भुतम् ? ।
यददृष्टचरी नद्यां, मग्नेयं कियदागमत् ॥४८॥

भवतु तावत् पश्यामि, क्वैषा यातीति चेतसा ? ।
मुक्त्वा च नाविकं नावि, स तामन्वलगत्स्वयम् ॥४९॥

नर्मदातीरमध्यास्ते, कालिका नाम देवता ।
तस्या आयतने स्त्री सा, जगामाऽऽरामसूश्च सः ॥५०॥

सा तं कुसुमनिर्मोकं, कालिकां पर्यधापयत् ।
ऊचे कृताऽञ्जलिर्देवि !, मम क्षेमङ्करा भवेः ॥५१॥

इत्युक्त्वा सा विनिःसृत्य, बहिर्द्रुतपदं ययौ ।
अभून्निर्माल्यमित्येष, देव्याः कञ्चुकमग्रहीत् ॥५२॥

ततश्च हर्षवान् यावदभ्येति सरितस्तटम् ।
न तावदङ्गिनीं नाऽपि, नाविकं तत्र पश्यति ॥५३॥

इतस्ततश्च शब्दायमानो नाविकमुच्चकैः ।
नाऽपश्यत्तं न लेभे च, तस्य प्रतिवचस्ततः ॥५४॥

गतः क्वाऽपि दुरात्माऽयं, मामुत्सृज्येह शत्रुवत् ? ।
गृहीतकञ्चुकः क्वाऽहं, यामिन्यां यामि चाऽधुना ? ॥५५॥

इत्यन्तःखेदमापन्नस्तदैव क्वाऽपि पत्तने ।
गत्वा बाह्यप्रपायां हि, सुष्वाप श्रमभागसौ ॥५६॥

इतश्च दस्यवः केऽपि, भ्रमन्तः परितः पुरम् ।
प्रपायां तत्र ते जग्मुर्निशायां सर्वगा हि ते ॥५७॥

अथैकः प्राह कोप्येष, दिव्यः परिमलोऽत्र भोः ? ।
तत् सम्भाव्यः कश्चिदत्र, पुमान् भोगी समं स्त्रिया ॥५८॥

सज्जा भवत तद्यूयं, बन्देन ध्रियते ह्यसौ ।
चेन्न किञ्चित्तथाऽप्येष, कर्त्ता नः सफलां निशाम् ॥५९॥

इति निभृतमालोच्य, तन्मध्यात्कोऽपि तस्करः ।
स्वरूपमनुकृत्याऽथ, प्रपाऽन्तः प्राविशच्छनैः ॥६०॥

जिघ्रन् भूमिं परिभ्राम्यन्नपश्यत्सुप्तमेव तम् ।
उपेत्य श्लथग्रन्थिस्थमघ्रासीत् पुष्पकञ्चुकम् ॥६१॥

स्फोटयन्तं घ्राणां गन्धमाघ्राय क्षणमद्भुतम् ।
निभालयन् धनाऽऽढ्यैषोऽस्पृशत्कटिकराऽऽदिकम् ॥६२॥

अपश्यन् किञ्चनाऽप्यन्यन्निद्राभरमुपेयुषः ।
तस्याऽऽरामभुवोऽगृह्णात्, कञ्चुकं जीवितव्यवत् ॥६३॥

अथाऽऽनीय बहिस्थानामाख्याय च यथातथम् ।
भ्राम्यदनर्गलाऽऽमोदं, तेषामदर्शयत् स तम् ॥६४॥

कुर्वाणाः स्मितमूचुस्ते, गत्वरेणाऽमुना किमु ।
यदि नाऽस्त्यपरं किञ्चित्तन्मुञ्चैनमपि क्वचित् ॥६५॥

आरामनन्दनाऽभाग्यान्न मुमोच स तस्करः ।
विभातायां विभावर्यां, तेऽथ जग्मुः पृथक् पृथक् ॥६६॥

आरामसूरथोत्तस्थौ, भास्करेऽभ्युदिते सति ।
निमीलिताऽक्ष एवाऽयं, ग्रन्थिं स्प्रष्टुं करं न्यधात् ॥६७॥

भाग्यशून्यमिवाऽऽत्मानं, ग्रन्थिशून्यं ददर्श सः ।
नष्टनिद्राश्रमो भीतः, समुत्तस्थौ ससम्भ्रमः ॥६८॥

स्वां पटीं विरलीकृत्य, सोऽपश्यच्छयनाऽवनिम् ।
अपश्यतश्च तस्याऽगान्मूर्च्छा कञ्चुकमूर्च्छया ॥६९॥

स्वयमाश्वस्य निःश्वासांश्चिक्षेप वेपमानहृत् ।
प्रपाया बहिरन्तश्च, नाऽद्राक्षीत् कञ्चुकं क्वचित् ॥७०॥

धत्तूरित इवैक्षिष्ट, तच्छून्यामपि मेदिनीम् ।
निश्चितं गतसर्वस्वो धीरोऽपि ग्रहिलीभवेत् ॥७१॥

अहो ! दैवं विपर्यस्तं, ममैव नाऽपरस्य हि ।
दित्सुः प्रियावियोगं मेऽवस्थां दुस्थां चकार यत् ॥७२॥

अन्यथा कथमह्नाय, निनाय नाविकस्तरीम् ? ।
प्रियोपायनभूतं मे, जह्रे वा कोऽपि कञ्चुकम् ? ॥७३॥

नाऽहं हि दैवहतकः, स्वस्थानं गन्तुमुत्सहे ।
नाऽन्यः स्यात्कञ्चुकस्तादृक्, कल्पद्रुकुसुमैर्विना ॥७४॥

चेत् पुनर्भ्रमता क्वाऽपि, कञ्चुको लभ्यते मया ।
देवतानिर्मितो नैष, कालेनाऽपि विनङ्क्ष्यति ॥७५॥

तदहं प्रविशाम्येतत्, पुरं सुरपुरोपमम् ।
ध्यात्वेति परितः पश्यंश्चचाल स पुरं प्रति ॥७६॥

तापप्रवेशरक्षार्थमिवोद्यानपरम्परा ।
व्यूहीभूय स्थिता यत्र, जलयन्त्रैर्मिलद्ध्वनिः ॥७७॥

स्वशरीरोत्थतापेन, सन्तप्तस्तिग्मदीधितिः ।
सेवितुं स्पृहयामास, यत्राऽऽरामान् हिमाऽऽलयान् ॥७८॥

अभ्रंलिहगृहप्रेङ्खत्कोटिसङ्ख्याऽधिकध्वजे ।
कस्तूरिच्छटकच्छन्नराजमार्गरजोव्रजे ॥७९॥

मणिभित्त्यापणश्रेणिदृश्याऽन्तर्गुप्तवस्तुनि ।
शातकुम्भशिलाबद्धमहेभ्याऽऽवासवास्तुनि ॥८०॥

देवयात्रेक्षणव्याजात्कृतशृङ्गारविभ्रमम् ।
आनन्दिकामिनीवृन्दं, यत्राऽनुयान्ति कामिनः ॥८१॥ त्रिभिर्विशेषकम् ॥

ईदृक्षे नगरे तस्मिन्, रमानिलयनामनि ।
प्रविश्याऽऽगाज्जिनाधीशान्, वन्दितुं स जिनौकसि ॥८२॥

तं तथाविधवन्दारुं, देवान्मधुरया गिरा ।
अपश्यत्सागरश्रेष्ठी, पूर्वं तत्र समीयिवान् ॥८३॥

स देववन्दनाप्रान्ते, व्याख्यानं कुर्वतो गुरून् ।
दिनकृत्यं गृहस्थानामप्राक्षीदथ तेऽब्रुवन् ॥८४॥

सुन्यायः पुरवास्तव्यः, सुप्रातिवेश्मिकः पुमान् ।
शुद्धाऽऽत्मा प्रातरुत्थाय, परमेष्ठिस्तुतिं स्मरेत् ॥८५॥

शुचिगात्रांऽशुकस्त्रिर्द्विः, सकृद्वाऽप्यर्हतोऽर्चयेत् ।
भावनाभाविताऽऽत्मा तान्, वन्दयेच्च यथाविधि ॥८६॥

ततो गुरुभ्यः श्रद्धालुर्दत्त्वा वन्दनकं शमी ।
प्रत्याख्यानं विदध्याच्च, वर्ज्यान्नियमयन्निमान् ॥८७॥

पञ्चोदुम्बरमुख्यांश्चाऽनन्तकायान् जिनोदितान् ।
चतुष्पर्व्यां विशेषेण, ब्रह्मचर्यात्तपश्चरेत् ॥८८॥

जीवाऽभयप्रदानाऽर्थं, स्मरेद्देशाऽवकाशिकम् ।
शृणुयाद्धर्मशास्त्रं चाऽऽगमोक्तं कल्पितं च वा ॥८९॥

अपूर्वज्ञानग्रहणं, कुर्यात् प्रतिदिनं सुधीः ।
श्रद्दधानो जिनोक्तानि, तत्त्वानि परिभावयेत् ॥९०॥

दानं श्रेयांसप्रमुखे, शीलं ब्राहम्यादिके स्मरेत् ।
तपश्च बाहुबल्यादौ, भावना भरताऽऽदिषु ॥९१॥

जिनशासनकौशल्यान्न्यायेनोपार्जयन् धनम् ।
सदाऽतिथिसंविभागं, कृत्वाऽश्नीयादलौल्यभाक् ॥९२॥

अकृताऽभिनिवेशः सन्, कुर्याद्व्यवहृतिं निजाम् ।
अत्युग्रपापहेतुत्वाद्वर्जयेन्निशिभोजनम् ॥९३॥

दिनाऽऽयव्ययसंशुद्धेर्निश्चिन्तः समतां भजेत् ।
कुलशीलोत्तमैर्धर्मनिष्ठैर्गोष्ठीं सदाऽऽचरेत् ॥९४॥

सम्यक्त्वभावितः श्राद्धद्वादशव्रतरङ्गितः ।
सामायिकधरः सान्ध्यं, स्वाध्यायविधिमाचरेत् ॥९५॥

स्वदारतुष्टिभाक् स्मृत्वाऽर्हतो रात्रौ शयीत च ।
सर्वेषु धर्मकार्येषु, भावनां सह धारयेत् ॥९६॥

सङ्क्षेपाऽऽदित्यहःकृत्यं, श्रुत्वाऽदान्नियमान् बहून् ।
आजन्मकालिकांश्चातुर्मासिकान् सोऽथ शुद्धये ॥९७॥

आरामतनयस्याऽथ, श्रेष्ठी वन्दनकं ददौ ।
साधर्मिकोऽयमित्येष, भोजनाय निनाय तम् ॥९८॥

मम वेश्मनि भोक्तव्यं, सदेति श्रेष्ठिनाऽर्थितः ।
स तत्र पुत्रवद्भुङ्क्ते, वीक्षते नगरस्थितिम् ॥९९॥

ततः सन्तापिग्रीष्मर्तुसम्पत्सङ्गविरागिणः ।
निर्वापयितुमाश्वेव, जनान् प्रावृडभूदिति ॥१००॥

साकं केकिरुतेन गर्जितरवः पाथोभृतां श्रूयते,
सार्धं प्रोषितभर्तृकाऽश्रुसलिलैरापः पतन्त्यम्बरात् ।
भिद्यन्ते तटिनीतटानि हृदयैरध्वन्यपुंसां समं,
जम्बालाऽध्वनि नागरैः सह रविर्दत्ते न पादान् भुवि ॥१०१॥

अन्यदा तत्पुरक्ष्मापलक्ष्मीधरस्य कुञ्जरः ।
पयः पीत्वा निवृत्तोऽथ, सरःपाल्यां पपात सः ॥१०२॥

अतिस्थूलवपुर्भारादुत्थातुमक्षमक्रमः ।
रुद्ध्वाऽध्वानं गिरिरिव, तथैवाऽस्थात्स कुञ्जरः ॥१०३॥

आधोरणेन विज्ञप्ते, स्वरूपे हस्तिनस्तथा ।
कुञ्जरोत्थापने राजा, बहूपायानकारयत् ॥१०४॥

अधःखातेडंह्रिगात्रस्य, धत्ते न पदमप्यसौ ।
सङ्गिकाभिर्वरत्राभिरुत्पाटितोऽपि नाऽचलत् ॥१०५॥

परीक्ष्य सचिवाऽऽदीनां, बुद्धिं राजा त्ववादयत् ।
डिण्डिमं नगरस्याऽन्तरित्युद्घोषणपूर्वकम् ॥१०६॥

य एनं कुञ्जरं बुद्ध्योत्थापयति सुधीर्नरः ।
तद्यावितं नृपो दत्ते, तज्जनाः ! श्रूयतामिति ॥१०७॥

द्विरदोत्थापने ये स्युरुपायास्ते कृताः खलु ।
राज्ञैवेत्यल्पधीः पौरोऽस्प्राक्षीत् कोऽपि न डिण्डिमम् ॥१०८॥

अथाऽऽरामसुतो धाम बुद्धेर्हर्षात् तमस्पृशत् ।
धीमद्भिः कौतुकात्पौरैर्वीक्ष्यमाणो ययौ नृपम् ॥१०९॥

प्रणम्य नृपतिं प्राह, कुञ्जरोत्थापने विभो ! ।
यः करोति ममाऽऽदेशं, तमाज्ञापय मन्त्रिणम् ॥११०॥

भूपोऽथ सचिवं किञ्चित्, निसृष्टाऽर्थं न्यरोपयत् ।
ततश्चाऽऽरामपुत्रोऽपि, द्विपोपान्तमगाद् द्रुतम् ॥१११॥

समीक्ष्य हस्तिनं दीर्घशुण्डासीत्कारमोचिनम् ।
गात्रांऽह्रिस्थानखातं तत्पूरयित्वेदमादिशत् ॥११२॥

परितः कुञ्जरं हस्तशतमानेऽत्र भूतले ।
दृढेष्टकोत्तानपट्टं, कारयाऽमात्य ! वेगतः ॥११३॥

तथेति कारिते तेन, मन्त्रिणा पुनरादिशत् ।
उत्तानपट्टं परितः, पालिमुच्चैर्विधापय ॥११४॥

भूपतेरिव तस्याऽथ, तमादेशं स मन्त्रिराट् ।
क्षणेन कारयामास, राजाऽऽदेशाद्धवेन्न किम् ? ॥११५॥

किमेषोऽथाऽत्र कर्त्तेति ?, विमृशत्सु सुधीष्वपि ।
हस्तिने दापयामास, सल्लक्यादि मदावहम् ॥११६॥

तडागपालिं प्रस्फोट्याऽपूरि तत् स्थानमम्बुभिः ।
पयस्यमाने तत्रैष, हस्ती बकस्थलायते ॥११७॥

वशां विहितशृङ्गाऽऽरामक्षिप्तत्र पाथसि ।
लोकमुत्तारयामास, पाल्याः स राजपूरुषैः ॥११८॥

सल्लकीभक्षणोद्भूतमहामदवशंवदः ।
पाथसा च लघूभूतवपुर्भारकृतोद्यमः ॥११९॥

अधस्ताच्चेष्टकाबन्धदृढलब्धपदस्थितिः ।
स हस्ती तां वशां वीक्ष्योत्थातुं गात्रमचालयत् ॥१२०॥ [युग्मम्]

आरोहकैर्बहिर्भूतैः, प्रेरिता साऽथ हस्तिनी ।
उपेत्य करिणस्तस्योपरि स्वं करमक्षिपत् ॥१२१॥

तस्याः स्पर्शेन तत्कालकामोद्रेकमहाबलः ।
तया रिरंसुरुत्तस्थौ, स्वयमेव शनैः शनैः ॥१२२॥

अथाऽऽरामसुतो धीमान्, हस्त्यारोहान् समादिशत् ।
अरे रे ! शनकैर्नीराद्बहिः कृषत हस्तिनीम् ॥१२३॥

एतैस्तथाकृते कोशो, वरत्रयेव वारिणः ।
आनीयत बहिः पृष्ठलग्नोऽयं वशया गजः ॥१२४॥

विश्रम्य मुहुराकृष्टः, स द्विपो लोहपिण्डवत् ।
इभ्याऽयस्कान्तपिण्ड्यव, हस्तिशालामनीयत ॥१२५॥

अहो ! बुद्धिरहो ! बुद्धिरन्यबुद्धेरगोचरम् ।
इत्यारामसुतं राज्ञः, पुरः प्राशंसिषुर्जनाः ॥१२६॥

तया बुद्ध्या नृपस्तुष्टोऽस्मै दित्सुः पारितोषिकम् ।
तमात्मपार्श्वमानेतुमाजूहवत्सगौरवम् ॥१२७॥

प्राविशत् स नृपाहूतस्ततस्तां राजसंसदम् ।
पञ्चाऽङ्गप्रसादं दत्त्वा, नृपोऽवोचद्वृणीष्व भोः ! ॥१२८॥

आकार्य श्रेष्ठिनं सोऽथ, सागरं तत्र संसदि ।
व्यजिज्ञपन्नृपं राजन् !, दीयतामस्य तद्वरः ॥१२९॥

राज्ञोक्तः सागरश्रेष्ठी, विमृश्य मनसि क्षणम् ।
ययाचे तत्पुरश्रेष्ठिपदं शाश्वतिकं नृपम् ॥१३०॥

सोऽभून्नाम्नैव प्राक् श्रेष्ठि, राज्ञा सत्यीकृतः पुनः ।
पौरैः सत्क्रियतेऽत्यर्थं, राजमान्यो हि पूज्यते ॥१३१॥

अनेनाऽदायि मे श्रेष्ठिपदवी नगरेऽत्र तत् ।
अहमस्मै ददे पुत्रीं, स्नेहो ह्यादानदानतः ॥१३२॥

ध्यात्वेति सागरश्रेष्ठी, रहस्याहूय गौरवात् ।
आरामसुतमाचष्ट, भृत्यवद्विहिताऽञ्जलिः ॥१३३॥

दीयमानं स्वयं राज्ञा, प्रसादं नाऽग्रहीद्भवान् ।
तन्मे किमस्ति यद्दत्त्वा, त्वां हि सन्तोषयाम्यहम् ॥१३४॥

किञ्चैतत्प्रार्थयेऽहं त्वां, यत्कुमारी सुताऽस्ति मे ।
उपयच्छस्व तां कुर्वन्ननृणं मां त्वमात्मनः ॥१३५॥

अथाऽऽरामसुतस्तं प्रत्यभाषिष्ट विशिष्टधीः ।
परिणीतोऽस्म्यहं श्रेष्ठिन् !, स्वदेशेष्विभ्यवेश्मनि ॥१३६॥

तदलं मे द्वितीयेन, कलत्रेणाधिहेतुना ।
प्रतिपन्नः पिताऽसि त्वं, त्वत्सुता हि स्वसा मम ॥१३७॥

अथाऽन्यदा महेभ्यानां, यानपात्राण्युदन्वति ।
अक्रियन्ताऽतिसज्जानि, परतीरयियासया ॥१३८॥

ततश्चाऽऽरामपुत्रोऽपि, जजल्प श्रेष्ठिपुङ्गवम् ।
अस्ति हे तात ! मे यानपात्राऽऽरोहणकौतुकम् ॥१३९॥

तदर्पय कियद्रव्यं, वणिक्पुत्रस्तवाऽस्म्यहम् ।
सलाभं तत्त्वया ग्राह्यं, विनोदः केवलोऽस्तु मे ॥१४०॥

अग्रे दातुमनाः श्रेष्ठी, विशेषात्तेन याचितः ।
तस्मै लक्षप्रमाणं स, ददौ द्रव्यमुदारधीः ॥१४१॥

अथाऽऽरामसुतो व्रीहीनक्रीणाद्बहुशो धनैः ।
अष्टौ च महिषीर्भूरिक्षीरसर्प्पिर्विधायिनीः ॥१४२॥

कर्पूरशर्करादींश्च, पदार्थानात्मनः प्रियान् ।
व्रीहिन्पेष्टुं यन्त्राण्यष्टौ, मुसलोदूखलं तथा ॥१४३॥

स्थालीश्च रन्धनायाऽथाऽन्यद्भोजनोपयोगि च ।
तथैव दिव्यवस्त्राणि, शस्त्राणि प्रचुराण्यपि ॥१४४॥

दध्रे वृत्त्या कर्मकरानष्टौ कर्मकरीस्तथा ।
आत्मशुश्रूषिकां चैकां, स कात्यायनिकां स्त्रियम् ॥१४५॥ त्रिभिर्विशेषकम् ॥

सप्तसितपटं यानपात्रं सोऽभाटयत्ततः ।
इत्थं हि व्ययता तेन, धनलक्षोऽपि वव्यये ॥१४६॥

ततोऽन्येषां महेभ्यानां, वाहनान्यभ्रियन्त च ।
महामूल्यैरसुप्रापैः, पण्यैश्चतुर्विधैरपि ॥१४७॥

आरामतनयोऽप्येष, हसतो नागरान्नरान् ।
अवगणयन् व्रीह्यादीन्, यानपात्रेऽध्यरोपयत् ॥१४८॥

यतः— शमयति शमो बहिः क्रुधमन्तस्तु सतां सुदुर्द्धरं तेजः ।
उष्णं तिरयच्छैत्यं, दहति हि तुहिनस्य जगदखिलम् ॥१४९॥

सागरश्रेष्ठिनं चैषोऽनुज्ञाप्य शुभवासरे ।
प्रागन्यवणिक्पुत्रेभ्योऽप्याऽऽरुरोह महातरीम् ॥१५०॥

अथाऽन्ये वणिक्पुत्रास्ते, ज्ञातिभिः कृतमङ्गलाः ।
विधाय यानपात्राणामर्च्चाद्यारुरुहुस्तथा ॥१५१॥

प्रधाने सुमुहूर्ते चाऽनुकूले वाति मारुति ।
कृतकोलाहलैराशु, तान्यपूर्यन्त नाविकैः ॥१५२॥

अन्वागच्छल्लघुतरीसन्दोहैस्तैरशोभि च ।
पृष्ठधावदपत्यौघसनाथैर्जनकैरिव ॥१५३॥

मनोवेगेन गच्छन्ति, तानि प्राप्तानि कुत्रचित् ।
अनूपे द्वीपेऽस्थाप्यन्त, मुक्तैः सितपटैरधः ॥१५४॥

शिष्यवद्गुरुवाक्यैर्द्रागङ्कुशैर्मत्तदन्तिवत् ।
महावेगेन गच्छन्ति, स्थितान्येतानि तैः स्फुटम् ॥१५५॥

मध्येऽम्भोध्यपि द्वीपेऽत्र, पीयूषसोदरं पयः ।
कटुदुर्जनवाग्मध्ये, किं न स्वादु सतां वचः ? ॥१५६॥

द्वीपमध्यस्थकूपेभ्यस्ते सर्वे जगृहुर्जलम् ।
चिक्षिपुर्मणिकेष्वेते, रसं तुम्बेषु वादिवत् ॥१५७॥

अहंप्रथमिकाभाजस्ते वाहनान्यपूरयन् ।
आरामतनयस्त्वेष, तत्र वासीव तस्थिवान् ॥१५८॥

किं न पूरयसि स्वस्य, वाहनं भो ! महामते !? ।
इति सांयात्रिकैरुक्तः, सोऽपि तान् प्रत्यभाषत ॥१५९॥

शरीरकारणं मेऽस्ति, ततो नाऽऽगन्तुमुत्सहे ।
इति स्थितोऽहमत्रैव, पन्थानः सन्तु वः शिवाः ॥१६०॥

अथ ते सम्भ्रमात् प्रोचुश्चेत्ते शरीरकारणम् ।
प्रतिपालयिष्यामस्तत्, त्वां सहाऽऽगामुकं खलु ॥१६१॥

अनारूढपूर्वे यानपात्रे भ्रमति मे वपुः ।
तन्नाऽऽरोढुं क्षमेऽहं भो !, आतङ्काऽऽकुलमानसः ॥१६२॥

निवर्त्तमाना गच्छेत, मामादाय सहाऽऽत्मना ।
इति सप्रश्रयं तान् स, समभ्यर्थ्य व्यसर्जयत् ॥१६३॥

विसृष्टास्तेन ते तस्याऽनागत्याऽतीवदुःखिनः ।
ययुर्यातव्यदेशेषु, क्षेमात्सांयात्रिकाः क्रमात् ॥१६४॥

आरामतनयोऽप्येष, शुद्धबुद्धिबृहस्पतिः ।
कर्मकृद्भिः प्रवहणाद्व्रीह्यादीनुदतारयत् ॥१६५॥

स वीक्ष्य सर्वतो द्वीपं, काशोटजान्यचीकरत् ।
व्यलब्ध च स तान्येषां कर्मकृद्भ्यः पृथक् पृथक् ॥१६६॥

कर्मकृद्वेश्मनां नाऽतिदवीयस्याऽत्मनो गृहम् ।
कारयित्वा कर्मकरान्, व्रीहीन् पेष्टुं समादिशत् ॥१६७॥

कर्मदासीर्न्ययुक्ताऽथ, चोक्षतन्दुलकर्मणि ।
दोग्धुं चारयितुं द्वीपे, सैरिभीः कञ्चिदादिशत् ॥१६८॥

ददौ मानुषमानेन, कर्मकृद्भ्यः स तन्दुलान् ।
ग्रामवत् सोऽभवद्द्वीपः, प्रारब्धे रन्धनादिके ॥१६९॥

एवं च नित्यं क्षैरेयीप्रभृत्योदनभोजनात् ।
नित्यदीपोत्सवप्रायास्तत्रैषां यान्ति वासराः ॥१७०॥

एकदाऽऽरामपुत्रोऽसौ, नीरतीरेषु सर्वतः ।
प्रदोषसमये धीमान्, बभ्राम मुहुरेककः ॥१७१॥

अवधार्य किमप्यन्तर्निजैः कर्मकरैः स तु ।
खात्रवद्वार्द्धिवेलायां, कोष्णां रक्षामचिक्षिपत् ॥१७२॥

ततो यादःपुमांसश्च, सायं निःसृत्य वारिधेः ।
भस्मसौरभमाघ्रायाऽऽजग्मुस्तत्र शनैर्भयात् ॥१७३॥

पयःक्षोभितगात्रत्वाच्चण्डकण्डूकरालिताः ।
ततो रासभवत् तत्र, वेल्लयामासुराशु ते ॥१७४॥

उद्वृत्योद्वृत्य गात्रं स्वमौषधेनेव भस्मना ।
पाण्डुराभा बभूवुस्ते, महातपस्विनः किल ॥१७५॥

एवं च नित्यं कुर्वाणास्तत्र ते वेल्लनक्रियाम् ।
अभूवन्निर्भयाः किञ्चित्क्रमेणाऽथ जलौकसः ॥१७६॥

आरामसूस्ततः स्निग्धदधिकूरकरम्बकम् ।
प्रालेयशीतलं ह्येलाकर्प्पूरक्षोदवासितम् ॥१७७॥

अगरुधूपितक्षुद्राताम्रस्थालीतलस्थितम् ।
स्वयमादाय सोऽम्भोधितीरे दूरेऽमुचत्ततः ॥१७८॥ युग्मं ॥

दक्षिणाऽनिलप्रेङ्खोलत्तत्सौरभमनर्गलम् ।
तथा ते निःसृत्य नासापुटेन जगृहुः क्षणम् ॥१७९॥

प्रियभावुकं तमभिव्यात्तनासापुटास्ततः ।
ते चेलुरुन्मुखा भृङ्गा, इव केतककाननम् ॥१८०॥

मुहुर्यान्तो मुहुः प्रत्यायान्तस्ते भयकातराः ।
विलम्बात् करम्बस्थालीमुपेत्याऽदुः करम्भकम् ॥१८१॥

एकैकस्वादाऽतृप्ताश्च, ते च दुष्कालरोरवत् ।
लिहन्ति जिह्वया स्थालीं, भुक्तोच्छिष्टमिवोतवः ॥१८२॥

द्वितीयेऽथ दिने तद्वत्तेन मुक्ते करम्भके ।
यथाबलं विक्षिप्याऽन्यान्, यादांसि भुञ्जते श्वत् ॥१८३॥

क्रमेणाऽऽरामपुत्रस्तु, स्वगन्धमपि साहयन् ।
स्थालीं करेण तां धृत्वाऽन्यदा तीरमुपाविशत् ॥१८४॥

सत्रवत्तत्र ते स्थाल्यां, ज्ञातवेला द्विजा इव ।
दधावुर्भोक्तुमन्योन्यं, क्षिपन्तः परितो हठात् ॥१८५॥

तेषां च स्पर्द्धयेवाऽथ, पक्षिणामिव धावताम् ।
वैनतेय इवाऽत्यन्ततरस्वी कश्चिदागमत् ॥१८६॥

यावदायान्ति नाऽन्यानि, तावद्गृह्णाम्यहं त्विमाम् ।
इत्यात्मम्भरिरादातुं, स्थालीं प्रत्यक्षिपत् करम् ॥१८७॥

अथाऽऽरामसुतेनाऽपि, निजपाणिः प्रसारितः ।
यादःपुमांश्च भावज्ञो, वार्द्धौ झम्पामदात्पुनः ॥१८८॥

आगच्छन्त्यन्ययादांसि, नाऽस्त्यद्येति निवर्त्त्य सः ।
मायावी तं क्षणं स्थित्वा, रत्नपाणिरगात् पुनः ॥१८९॥

रत्नं प्रक्षिप्य तत्पाणौ, स्थालीमादाय सम्भृताम् ।
करम्भं बुभुजे तुन्दपरिमृजोऽथ सोऽभवत् ॥१९०॥

आरामतनयो रत्नं, वीक्ष्य रत्नपरीक्षकः ।
जहर्षाऽत्यर्थं सफले, ह्युपाये को न मोदते ? ॥१९१॥

सिद्धोपायस्ततो भूयो, भूयोऽपि स दिने दिने ।
अज्ञापयत् कर्मकृतां, करम्भाट्टमिव व्यधात् ॥१९२॥

आनीयाऽऽनीय रत्नानि, रत्नाकरतलान्मुहुः ।
तस्माद्यादांसि गृह्णन्ति पण्यवत्तं करम्भकम् ॥१९३॥

रत्नान्यारामपुत्रस्य, वर्द्धन्ते प्रतिवासरम् ।
अपत्यानीव निःस्वस्य, शिराऽम्भांस्यवटस्य वा ॥१९४॥

रत्नानि रक्षितुं तस्य, प्रियजानेः कलत्रवत् ।
चिन्ता रात्रेर्दिनश्रीवन्निद्रायाश्छेदिकाऽभवत् ॥१९५॥

प्रत्युत्पन्नमतिः सोऽथ, चित्ते निश्चित्य किञ्चन ।
आर्द्रच्छगणकेष्वन्तरेकैकं रत्नमक्षिपत् ॥१९६॥

आत्मशुश्रूषिकामुक्त्वा, मैतानि जिह्मलः खलु ।
सरत्नानामरत्नानां, चैषां पृथग् वलिं व्यधात् ॥१९७॥

एवं च कुर्वतस्तस्य, वलिद्वयं रराज तत् ।
सेतुद्वन्द्वमिवाऽऽरब्धं, लङ्घितुं दौःस्थ्यसागरम् ॥१९८॥

कियद्भिर्दिवसैस्तुल्या, सा वलिद्वय्यवर्द्धत ।
बुद्धिस्थाल्यां तु तत्कीर्त्तिं सिद्धये चुल्लिकेव हि ॥१९९॥

इतश्चाऽऽरामपुत्रेऽस्मिन्नुत्तीर्णे ह्यनुकञ्चुकम् ।
सोऽबद्ध्वा नर्मदातीरे, नावं सुष्वाप नाविकः ॥२००॥

भ्रमन्ती नर्मदातीरे, सा नौर्नारीव पुंश्चली ।
नर्मदास्रोतसाच्छेद्य, चालिताऽम्भोधिमापतत् ॥२०१॥

दैवयोगेन साऽम्भोधौ, प्रभ्रम्य नाविकाऽन्विता ।
श्रान्तेवाऽऽगत्य द्वीपेऽत्राऽविनष्टैवाऽलगत्तटे ॥२०२॥

आरामसूश्च तां वीक्ष्य, ममैषेत्युपलक्ष्य च ।
दधावे सम्मुखं तस्याः, स्वमातुरिव बालकः ॥२०३॥

उत्तीर्णं नाविकं स्नेहादभिष्वज्य स्वबन्धुवत् ।
आनीय स निजाऽऽवासे, दिव्यौदनमबूभुजत् ॥२०४॥

पप्रच्छ तस्य वृत्तान्तं, मुञ्चन्नश्रूणि भूरिशः ।
विना रत्नस्वरूपं चाऽऽत्मवृत्तान्तमचीकथत् ॥२०५॥

मिलिते नाविके तस्मिन्, वनसूर्मुमुदेऽधिकम् ।
परस्परं वियुक्तानां, दर्शनं सुदिनायते ॥२०६॥

स्मारं स्मारं कुटुम्बं स्वं, प्रेयसीं तां तथोज्झिताम् ।
तस्योत्तिष्ठन् वियोगाग्निर्यैर्याऽम्भसोपशान्तवान् ॥२०७॥

अथ सांयात्रिकास्तेऽपि, विधाय क्रयविक्रयम् ।
लाभभाजो निवृत्ता द्राग्, द्वीपेऽस्मिन् पुनराययुः ॥२०८॥

पुनस्तथैव तत्राऽम्भ, आदाय ते पुरं प्रति ।
आकारयामासुरेनं, सोऽपि सज्जीबभूव च ॥२०९॥

यानपात्रे सरत्नानि, रत्नरिक्तानि नावि च ।
क्षेपयंच्छगणकानि, तैरुक्तं किमिदं ननु ? ॥२१०॥

एतावद्भिर्दिनै राशिः, सागरश्रेष्ठिनो मया ।
अविदुरेणोपायानां, दायादेनेव भक्षितः ॥२११॥

गोमयान्यत्र मुक्तानि, कस्याऽर्थे हि लगन्ति भोः ! ।
इन्धनाऽऽहरणायैव, किलाऽऽगामित्युवाच सः ॥२१२॥

हसद्भिस्तैः पुनः प्रोचे, सरलोऽस्यधुना खलु ।
मुञ्चैतान्यत्र तत्रैषां, किमस्त्यप्रापणिः पुरे ? ॥२१३॥

वरमस्माकमाकण्ठपण्यपूर्णतरीचयात् ।
निधेहि वाहने किञ्चिद्, दास्यामस्तव भाटकम् ॥२१४॥

इति प्रबोधितोऽप्येतैरविशेषेण तानि सः ।
आदाय यानपात्रस्थः, पुरीं प्रत्यचलन्मुदा ॥२१५॥

क्रमेणाऽऽगच्छतां तेषां, प्रतीपः पवनोऽभवत् ।
दण्डेनेवाऽऽहता गावो, व्याघुटन् वाहनान्यथ ॥२१६॥

निवर्त्तितानि वात्याभिर्यानपात्राणि तूलवत् ।
सितपटैरुद्ग्रीवाणि, नश्यदाटिव्रजानि किम् ? ॥२१७॥

मण्डलीपवनाऽऽवर्त्तपरिवर्त्तितवारिणि ।
आरब्धरासकानीव, परिभ्रेमुरमून्यथ ॥२१८॥

अवकूलितान्येतानि, महावारिधिमभ्यगुः ।
सितपटास्त्वपात्यन्त, बभूवुश्चाऽऽकुला जनाः ॥२१९॥

स्मरन्तो देवतानां ते, ह्यार्त्ताः सांयात्रिका मुहुः ।
मृतम्मन्या न भूयोऽप्यारोक्ष्याम इत्यमंसत ॥२२०॥

तत्रैवं तस्थुषां तेषां, पर्यवस्यदथेन्धनम् ।
आरामसुतमेतेऽथ, ययाचुर्गोमयानि ते ॥२२१॥

एषोऽपि प्रत्युवाचैतान्, व्ययाम्येतान्यहं नहि ।
रिक्ते हि यानपात्रे मे, पण्यान्येतानि येन भोः ! ॥२२२॥

वारंवारममी त्रुट्यदेधसोऽस्मात्सुमेधसः ।
अर्थेनाऽपि ययाचुस्ते, ततोऽप्येष ददाति न ॥२२३॥

अथेन्धनं विना धान्यमाममेवाऽपि जक्षुषाम् ।
तेषामुदरपीडाऽभूत्, प्राणानां यमदूतिका ॥२२४॥

अथ सांयात्रिकाः प्रोचुरारामसुतमादरात् ।
दददिन्धनमस्माकमाऽऽहारदानदो भव ॥२२५॥

तेषां मध्यादथोच्छ्वस्याऽवादि केनाऽपि वाग्मिना ।
एवं चेन्न ददासि त्वं, तद्देह्युद्धारकेऽथ नः ॥२२६॥

वयं हि गणयित्वैवाऽऽदास्यामो गोमयानि ते ।
चतुर्गुणानि दास्यामः, सम्प्राप्ताः स्वपुरं पुनः ॥२२७॥

को वः प्रत्यय इत्यर्थे, तेनेत्युक्तास्तु तेऽवदन् ।
यः सम्यग् रोचते तुभ्यं, तं दद्याः प्रत्ययं खलु ॥२२८॥

यादृशानि मदीयानि, गोमयानि ग्रहीष्यथ ।
तादृशान्येव देयानीत्यर्थे कुरुत पत्रकम् ॥२२९॥

किञ्च मे मुञ्चताऽऽत्मीयं, पण्यं ग्रहणकेऽखिलम् ।
नाऽऽपत्रपिष्णुना भाव्यं, व्यवहारे सुमेधसा ॥२३०॥

तेनेत्युक्तं मेनिरे ते, नाऽर्थिनो हि विवेचिनः ।
आरामसूश्च तत्राऽर्थे, महत्पत्रमलेख्यत् ॥२३१॥

तर्यां च यानपात्रे च, सन्त्येतानि यदृच्छया ।
गृह्णन्तु यानि रोचन्तेऽन्वजानादिति सोऽथ तान् ॥२३२॥

अगाधाद्यानपात्रात्ते, लातुं तानि किलाऽलसाः ।
नावः सम्भाल्य सम्भाल्याऽग्रहीषुर्दुर्धियो हि ते ॥२३३॥

यो यावन्त्यग्रहीत्तस्मै, तावन्त्युद्धारयन्नसौ ।
अर्पयामास सर्वाणि, नौस्थान्यकृतसम्मदः ॥२३४॥

तान्यादाय च ते सर्वेऽप्याऽऽगता यानमात्मनः ।
नाऽदादर्थेन मूढोऽसावेतानीत्यहसन् मिथः ॥२३५॥

एतानि नाऽऽनयेदेष, चेदेधः स्यात्कथं हि नः ? ।
इति दैवहताः स्वार्थादेनं प्राशंसिषुश्च ते ॥२३६॥

राज्ञीव पवने किञ्चिदानुकूल्यमुपेयुषि ।
स्वपुरं प्रति चेलुस्ते, पुनः पूरितवाहनाः ॥२३७॥

बहुभिर्दिवसैस्तेषां, निनष्टुर्गोमयान्यपि ।
नित्यभूतं च तद्धस्म, मध्येऽब्धि क्षिप्यते स्म तैः ॥२३८॥

तानि विश्रम्य चलितानीव जातजवान्यथ ।
उत्कानीव क्षणादीयुरात्मपूर्मन्दिराऽऽजिरे ॥२३९॥

उत्तीर्य वर्द्धका जग्मुर्यानपात्राऽऽगमोत्सवे ।
वर्द्धयितुं महेभ्यान् स्वान्, पारितोषिकलिप्सया ॥२४०॥

तच्छ्रुत्वा च महेभ्यास्ते, प्रमोदाऽऽकुलचेतसः ।
सनाथाः स्वस्वलोकेन, पूर्णपात्रपवित्रिताः ॥२४१॥

कुर्वाणास्तुमुलं पुर्यां, पञ्चशब्दमहास्वनैः ।
पुरः सङ्गीतसुभगाः, स्वं स्वं वाहनमभ्यगुः ॥२४२॥ [युग्मम्]

वर्द्धयामासुरेतेऽपि, मङ्गलोद्गीतिपूर्वकम् ।
सवाहनान् वणिक्पुत्रान्, सलाभः पूज्यते खलु ॥२४३॥

तस्याऽऽरामतनूजस्य, न ययौ च न चाऽऽययौ ।
वर्द्धकः कोऽपि येन स्युर्बन्धुभिर्मङ्गलश्रियः ॥२४४॥

ततश्चोत्तार्योत्तार्यैते, स्वस्वप्रवहणाद्बहिः ।
समुद्रवेलापर्यन्तेऽकारयन् पण्यपर्वतान् ॥२४५॥

आरामतनयोऽप्येवमुत्तार्य गोमयान्यपि ।
तदुत्करं व्यधान्मङ्गलार्थं गेहाऽरिकामिव ॥२४६॥

ततश्चेक्षकलोकोऽन्यो, वीक्ष्याऽन्यपण्यसञ्चयान् ।
प्रपश्यन् गोमयोच्छ्रायं, जहास दत्ततालिकः ॥२४७॥

आरामसूस्वरूपं तज्ज्ञात्वा श्रेष्ठ्यपि सागरः ।
द्रव्यव्ययजनहास्यदुःखात्तस्थौ स्ववेश्मनि ॥२४८॥

अथेभ्यास्ते समादाय, सारवस्तूनि पण्यतः ।
भूभुजे ढौकनं चक्रुर्दानाऽल्पत्वविधित्सया ॥२४९॥

गोमयैर्भरणिं भृत्वाऽऽरामसूरपि भूपतिम् ।
दिदृक्षुः प्रविशन् पुर्यां, गोपुराऽध्यक्षमैक्षत ॥२५०॥

विमृश्यैष ततस्तस्मै, किमनेनेत्यगृह्णते ।
रक्षाऽस्य रोगघ्नीत्युक्त्वा, ह्येकं गोमयमार्पयत् ॥२५१॥

शुल्कशालामुपेत्याऽथ, नाऽन्यदस्तीति वेदयन् ।
तद्वत्पञ्चकुलस्याऽपि, पञ्चैतानि समर्पयन् ॥२५२॥

कर्मकृन्मस्तकाऽऽरूढगोमयैर्भरणीयुतः ।
आपणश्रेणिमार्गेण, नृपौकोद्वारमाययुः ॥२५३॥ [युग्मम्]

वीक्ष्याऽन्योन्यं प्रहसद्भिः, पौरलोकैः स वेष्टितः ।
द्वाःस्थेन ज्ञापितो राज्ञः, प्राविक्षद्राजसंसदि ॥२५४॥

आयान्तं तं तथा वीक्ष्य, महेभ्यास्ते पुराऽऽगताः ।
आख्यन्नृपायोपहासान्नाथाऽभ्येति सुधीरसौ ॥२५५॥

भरणिं मोचयित्वाऽग्रे, राज्ञो निःक्षोभमानसः ।
नत्वा दण्डप्रणामेन, नृपं स समुपाविशत् ॥२५६॥

उपायनीकृतेष्वन्यैः, सुवर्णमौक्तिकाऽऽदिषु ।
दृष्ट्या निभालयन् भूपोऽद्राक्षीच्छगणकान्यथ ॥२५७॥

स कोपकौतुकौत्सुक्याद्बभाषे भूपतिर्भृशम् ।
केनेदं ढौकनं चक्रे, दुष्प्रापं वणिजा मम ? ॥२५८॥

द्वाःस्थः कृताऽञ्जलिः प्रोचे, नाथाऽऽरामभुवाऽमुना ।
राजा तं वीक्ष्यमाणोऽथाऽस्मरत्तद्बुद्धिवैभवम् ॥२५९॥

चेतस्यथ स दध्यौ चोत्थापितो ह्यमुना करी ।
बुद्धिप्रयोगः कोऽप्यस्य, नूनमत्राऽपि जृम्भते ? ॥२६०॥

निश्चित्य चेतसेत्येष, राजा दक्षशिरोमणिः ।
अर्गलासरलेनाऽथ, हस्तेनैकं तदग्रहीत् ॥२६१॥

आरामपुत्रो मुमुदे, गोमयाऽऽदानकर्मणा ।
सभया सार्धमत्यर्थं, मूढाः सिष्मियिरे परे ॥२६२॥

स्फोटयामास तन्नालिकेरवद्विष्टरे नृपः ।
अब्धिमध्यादिवाऽऽदित्यो, रत्नं प्रादुरभूत्ततः ॥२६३॥

आत्तं हि स्वधिया पूर्वं, पश्चादादत्त पाणिना ।
स्वयं परीक्षको राजा, रत्नं वीक्ष्य मुदं ययौ ॥२६४॥

अन्यान्यपि स्वयं राजा, प्रस्फोट्याऽविदितश्रमः ।
जग्राह तानि रत्नानि, तेषु गृध्नुर्भवेन्न कः ? ॥२६५॥

अर्कस्येवांऽशुभी रत्नरश्मिभिः सर्वसंसदः ।
हर्षोत्कर्षमासेदुष्या, मुखाऽब्जानि चकाशिरे ॥२६६॥

उलूकानामिवैतेषां, सांयात्रिकनृणां पुनः ।
उद्योतेऽपि तदातङ्कतिमिरमसृणादृशः ॥२६७॥

रत्नगर्भाऽञ्जलिपुटो, नमस्कर्त्तुमिवोद्यतः ।
पप्रच्छ स्वाऽऽगतं राजाऽऽरामपुत्रं तमादरात् ॥२६८॥

स्वागतं त्वत्प्रसादान्मे, तेनेत्युक्तः पुनर्नृपः ।
अपृच्छत्सर्वमीदृक्षं, पण्यं किं तेऽस्ति धीधन !? ॥२६९॥

ओमित्युक्त्वा स राजानं, विज्ञाप्याऽऽनाययत्ततः ।
शौल्किकेभ्यो गोमयानि, पश्यतां वणिजां खलु ॥२७०॥

तेभ्योऽपि स तथा रत्नान्यादाय रचिताऽञ्जलिः ।
द्रष्टुं वेलातटं स्वामिन् !, प्रसीदेति व्यजिज्ञपत् ॥२७१॥

गुरोरिव तस्याऽऽदेशात्, स राजाऽऽरुह्य वाजिनम् ।
सांयात्रिकान् सहाऽऽदाय, कौतुकात्तत्र जग्मिवान् ॥२७२॥

आरामतनयाऽऽतङ्काच्छुष्यत्तालुस्खलद्गिरः ।
भूभुजे दर्शयामासुः, स्वभाण्डं वणिजः परे ॥२७३॥

अपश्यन् स नृपस्तानि, क्षणनिक्षिप्तया दृशा ।
गोमयोच्छ्रायमभ्यागान्मुक्तवल्गेन वाजिना ॥२७४॥

ततश्चाऽऽरामपुत्रेण, द्विधा तानि विधाप्य च ।
वागुरेवाऽन्यवणिजां, रत्नराशिरकार्यत ॥२७५॥

रत्नराशिन् नृपः प्रेक्ष्य, परमाऽऽनन्दभागभूत् ।
प्रजापालकभूपाला, मोदन्ते हि जनर्द्धिभिः ॥२७६॥

ततश्च दर्शयामास, भूभुजेऽक्षरपत्रकम् ।
तत्रोद्धारकमद्राक्षीद्राजाऽन्येषां सहस्रशः ॥२७७॥

प्राहाऽऽरामसुतो भूपमेभ्यो लभ्यान्यमूनि हि ।
स्वयं दास्यन्ति चेन्नैते, तद्वो विज्ञपयिष्यते ॥२७८॥

दानमुक्तिं प्रपद्यैषां, सर्वेषां व्यवहारिणाम् ।
विशेषप्रसादं कृत्वाऽऽरामसूनोस्त्वगान्नृपः ॥२७९॥

गते तस्मिन् क्षणादन्यो, राजा तं रत्नपर्वतम् ।
द्रष्टुमागादन्तरिक्षे, वनसूस्तमवर्णयत् ॥२८०॥

क्रीत्वा भास्करमण्डलादपि कराऽऽक्रान्तात् सुधाया दलम्,
संस्कृत्याऽऽत्मनि वर्त्मनि प्रतिनिशं तद्वर्णिकां दर्शयन् ।
राकापर्वणि पर्वताऽरिनगरे लोकेऽर्थिनि स्तोकशो,
विक्रीयेन्दुवणिक्सदेश्वरमहामूर्धन्य एवाऽभवत् ॥२८१॥

आरोप्य शकटं रत्नान्यागात् स श्रेष्ठिवेश्मनि ।
श्रुतस्वरूपः श्रेष्ठी तु, सम्भ्रमेण तमभ्यगात् ॥२८२॥

सागरश्रेष्ठिनं दूराज्जोदकरोत् स कृत्यवित् ।
स्नेहात्तं श्रेष्ठ्यभिष्वज्य, स्वाऽर्धाऽऽसनमवीविशत् ॥२८३॥

आलापशालिनं श्रेष्ठिसागरं रचिताऽञ्जलिः ।
पितरं पुत्रवन्नम्रश्चाऽऽरामसूर्व्यजिज्ञपत् ॥२८४॥

वसून्यर्जितान्येतानि, मया कर्मकृतेव ते ।
व्यवसायः फलेत् प्रायः, पुण्येन स्वामिनः खलु ॥२८५॥

तत्त्वं गृहाण सर्वाणि, यदेषां त्वमसि प्रभुः ।
मया हि गच्छताऽपीति, त्वां प्रति प्रतिशुश्रुवे ॥२८६॥

सन्तुष्टेनेव देवेन, तेनेत्युक्तः स सागरः ।
स्वीचकार यत्कोऽनेच्छुरागच्छद्द्रव्यमौकसि ? ॥२८७॥

इतश्चाऽन्यैर्वणिक्पुत्रैरात्मीयव्यवहारिणाम् ।
छगणानां कथाऽऽख्यायि, चिन्तासन्तानसारणिः ॥२८८॥

ततः सर्वे महेभ्यास्ते, सर्वस्वक्षतिभीतयः ।
सम्भूयाऽऽलोच्य किमपि, निशीयुः सागरौकसि ॥२८९॥

श्रेष्ठी च सागरस्तेनाऽऽरामपुत्रेण संयुतः ।
अभ्युदस्थात् समुदायो, येन गौरवमर्हति ॥२९०॥

यतः— गौरवमधिकं बिभ्रन्न महान् मान्यो जनेऽपि तु तनुत्वम् ।
दवपावकपूर्णेन्दू, ननु पश्यत दीपबालेन्दू ॥२९१॥

यथायोग्यं च मुक्तानि, परित्यज्याऽऽसनानि ते ।
इष्टदेवस्येवाऽऽरामपुत्रस्याऽग्रे ह्युपाविशन् ॥२९२॥

ऊचुर्दीनवचांसीति, शीताऽऽर्त्ता इव कम्पिनः ।
धीमन् ! वयमधमर्णा, बभूविम तव ध्रुवम् ॥२९३॥

द्विर्निषिद्धैस्त्वयाऽप्येभिरेधसे हि वणिक्सुतैः ।
सरत्नानीत्यजानद्भिरात्तानि गोमयानि ते ॥२९४॥

तानीह भस्मसात्कृत्वा, त्यक्तान्यम्भोधिपाथसि ।
न तेष्वेकमप्युद्वव्रे, भक्तवत्कृपणौकसि ॥२९५॥

यदेकं लभते रत्नमारामसुत ! तावकम् ।
विक्रीयमाणाः सर्वेऽपि, न तल्लभामहे वयम् ॥२९६॥

पत्राऽक्षराणि संवीक्ष्य, वीक्षाऽऽपन्ना वयं ततः ।
त्वां चाऽननुज्ञाप्य पण्यं, नाऽऽनयामः स्ववेश्मनि ॥२९७॥

एते वयं ते रत्नानि, यदि विद्मस्त्रिधाऽपि हि ।
ततो यत्त्वं भणस्यद्य, तं कुर्मः शपथं खलु ॥२९८॥

छगणकवृत्तं जानन्नारामसूरलुब्धधीः ।
कञ्चुकाऽऽर्त्त्या निराकाङ्क्षः, स्मित्वोचे मृदु तान् प्रति ॥२९९॥

किमेतदुच्यते दीनं, युष्माभिरिभ्यपुङ्गवाः !? ।
रत्नेभ्यो हि भवन्तो मेऽभीष्टा बिभीत माऽऽस्म तत् ॥३००॥

रत्नप्रत्यर्पणे चेद्धो !, अशक्ताः स्थ मयैव तत् ।
पाटितं पत्रमित्युक्त्वा, चक्रे तानकुतोभयान् ॥३०१॥

यतः— उपहत्य परं कुर्वन्नात्मसमृद्धिं महानपि त्याज्यः ।
तिथिपातजातजन्माऽधिकमासो वर्ज्यते कार्ये ॥३०२॥

वस्त्रताम्बूलदानेन, सत्कृत्य प्रत्युत स्वयम् ।
पण्यं स्वीकुर्वतां गत्वेत्युक्त्वा स तान् व्यसर्जयत् ॥३०३॥

अस्माकमपराधोऽस्मत्कुटुम्बद्रव्यघस्मरः ।
लीलयैवाऽमुना सोढो, निसर्गतः कृपालुना ॥३०४॥

इत्युच्चैः प्रशशस्वांसस्तमारामसुतं हि ते ।
नत्वेभ्या वणिक्पुत्रेभ्यो, भाण्डमानाययन् गृहे ॥३०५॥

आरामतनयः सोऽपि सागरश्रेष्ठिनाऽन्यदा ।
पुण्यधीर्व्यवसायानामत्युत्कर्षः स एष ते ॥३०६॥

तदेतस्य हि वित्तस्य, क्लेशप्राप्तस्य नश्यतः ।
धर्माऽर्थकामैर्भुञ्जानः, साफल्यं दानतः कुरु ॥३०७॥

इत्युक्तः परमाऽऽनन्दमीयुषा चेतसा ततः ।
दध्यावेष स्वयं श्रेष्ठी, ममाऽनुज्ञातवान् धनम् ॥३०८॥

तदहं स्वेच्छया यच्छाम्यात्मनः पुण्यहेतवे ।
यद्दत्तं श्रेष्ठिना मह्यं, तन्मदीयं परस्य न ॥३०९॥

कञ्चुकाऽनुपदीभूत्वा, भ्रान्तः सर्वत्र चित्तवत् ।
नाऽऽप्नुवं कञ्चुकं क्वाऽपि, बोधिबीजमभव्यवत् ॥३१०॥

तद्दुःखस्य विनोदाय, स्वबुद्धिप्रेक्षणाय च ।
पुण्येयत्तावबोधायाऽरुक्षं मृत्युसखीं तरीम् ॥३११॥

दैवादासाद्य रत्नानि, तेजश्च यशसाऽञ्चितम् ।
रत्नच्छगणवृत्तान्ताद्भूपं विस्मापयं खलु ॥३१२॥

अधुना निजदोर्दण्डाऽर्जितद्रव्यव्ययादहम् ।
सप्तक्षेत्र्यां कृतश्रद्धो बोधिबीजं लभेय चेत् ॥३१३॥

इति ध्यात्वाऽर्हतां चैत्यमालास्वष्टाह्निकां व्यधात् ।
राज्ञे दत्त्वा धनं मूलादमारिं पर्यघोषयत् ॥३१४॥

अवारितमहादानडिण्डिमं पर्यवादयत् ।
काराऽगारग्रहग्रस्तगुप्तिकायानमोचयत् ॥३१५॥

हर्षाऽश्रुपूरसम्पूर्णश्रद्धासिन्धुशुचीकृतः ।
तपश्चारित्रपात्राणि, प्रासुकान्नाद्यलाभयत् ॥३१६॥

धन्यम्मन्यस्ततः सोऽथ सङ्घातघातकर्मठम् ।
भोजनाऽऽच्छादनाऽऽद्यैश्च श्रीसङ्घं पर्यपूपुजत् ॥३१७॥

साधर्म्मिकाणां वात्सल्यं, कृत्वैवं मुदितस्ततः ।
प्रत्यष्ठापयदाचारात्, स बिम्बान्यर्हतां मुदा ॥३१८॥

अलेखयच्च कर्माऽब्धिमज्जज्जीवतरीनिभान् ।
जगद्बन्धुजिनाऽऽदिष्टसिद्धान्तपुस्तकान् बहून् ॥३१९॥

इत्थं व्ययादपर्याप्तद्रव्यसम्भारकारणात् ।
मणिरत्नाऽङ्कितं रम्यमर्हच्चैत्यमकारयत् ॥३२०॥

एवं श्रद्धावशोल्लासिपुण्यप्रावृतजीवितः ।
धर्मैकशरणो जज्ञे, सुधीरारामनन्दनः ॥३२१॥

स्वपुण्योपार्जितं वित्तं, स्वपुण्यपरिपुष्टये ।
दत्त्वाऽऽरामसुतः स्वाऽऽढ्यम्भविष्णुः श्रेयसाऽभवत् ॥३२२॥

यतः— लक्ष्मीरात्मगृहोद्भवेति तनया पात्रेप्यदातुः स्वयं,
लोकाद्वारिनिधेरिवाऽत्र रुदतः सा गृह्यते जिष्णुना ।
चेत्पाणिग्रहणं विधाप्यत इयं त्यागेन सूत्वा यशः,
पुण्ये क्वाऽपि गताऽपि वत्सलतया व्यावर्त्तते तत्पुनः ॥३२३॥

अथाऽन्यदा जिनेन्द्राणां, कृत्वाऽर्चां सायमादरात् ।
स पञ्चस्तुतिमुच्चार्य, निद्रामुद्राऽङ्कितोऽभवत् ॥३२४॥

निद्रासुखादथाऽऽहारे, पक्वाऽऽशयमुपेयुषि ।
निशाऽन्तप्रहरस्याऽर्धे, तेन स्वप्नस्त्वदृश्यत ॥३२५॥

किल लक्ष्मीपुरे स्वस्मिन्नगरे नर्मदातटे ।
श्रीखण्डागुरुकाष्ठौघैश्चिता ह्येका व्यरच्यत ॥३२६॥

ततः पद्मावती तत्र, कृत्वा स्नानं नदीजले ।
विधायाऽष्टविधां पूजां, देवस्येष्टस्य भक्तितः ॥३२७॥

ऊचे यद्यपि शास्त्रेषु, प्रवेशोऽग्नौ निराकृतः ।
तथाऽप्यहं करिष्यामि, प्रवेशं जातवेदसि ॥३२८॥

यतो मयका हतया, दुराग्रहगृहीतया ।
कञ्चुकाऽऽनयने प्राणदयितः प्रेषितो हठात् ॥३२९॥

व्यावृत्य यत् स नाऽऽयातस्तन्मन्येऽहममङ्गलम् ।
मृतो वा मारितो वाऽन्यैरिति तस्य द्वयी गतिः ॥३३०॥

अथवाऽन्यैर्न शक्योऽयं, प्रेषितुं यमसद्मनि ।
न च तादृगभूद्रोगो, येन स्वेन म्रियेत सः ॥३३१॥

न च जीवति येनैष, न तिष्ठेन्मां विना क्वचित् ।
तन्मेऽसौ प्रत्ययः प्रेम्णो, मद्वियोगोऽस्य मृत्यवे ॥३३२॥

भावि वः कल्मषं लोकाः !, पापास्यां मां हि पश्यताम् ।
मिथः स्नेहस्य कः स्याच्च, प्रत्ययः प्रिययोर्जने ? ॥३३३॥

जीवन्तीनां विना नाथं, स्त्रीणां स्युर्दुर्वचांसि च ।
सति भर्त्तरि नारीषु स्निह्यन्ति पितरोऽपि च ॥३३४॥

इत्यहं तं विना वह्नौ, विशाम्येषा स्वमृत्यवे ।
इत्युच्चार्य दधावे च, चितां प्रति स्फुरत्क्रमा ॥३३५॥

पश्यन् साक्षादिवैनां द्रागुत्तस्थौ वनसूर्भयात् ।
उच्चैरूचे च मा मेति, प्रिये ! पश्यसि किं न माम् ? ॥३३६॥

इत्युच्चैर्लापिनं तं हि, श्रुत्वोत्तस्थौ परिच्छदः ।
किमेतदिति संरम्भात्तमुवाच मुहुर्मुहुः ॥३३७॥

मान्त्रिकान् मान्त्रिकान् शीघ्रमाह्वयत्यथ सागरे ।
भाषिणि स्वेन चैतन्यं, प्राप्याऽऽरामसुतोऽवदत् ॥३३८॥

पटुरस्मि निवार्यन्तां, मान्त्रिका यत्किमत्र तैः ? ।
स्वप्नाऽऽवेशवशादुच्चैः, किलाऽहं विललाप भोः ! ॥३३९॥

इति निवर्त्य तान् पश्चादन्तश्चिन्ताऽऽतुरोऽभवत् ।
चितामारोढुमुत्काऽभूत्प्रिया मे किमतर्किता ? ॥३४०॥

नाऽयं मे स्याद्रुजा स्वप्नश्चिन्तास्वप्नोऽपि नैष मे ।
किन्तु सत्य इवाऽऽभाति, देवतादर्शितो ह्यसौ ॥३४१॥

अत एव हि मेऽङ्गेषु, तापो लानिर्मनोभ्रमः ।
तत् किं कुर्वे ? कथं तत्र, याम्यहं कञ्चुकं विना ? ॥३४२॥

यद्वा कञ्चुकवार्ताऽपि, मम शान्ता प्रियां विना ।
येन सा मद्वियोगेन, चिताऽऽरूढा भविष्यति ॥३४३॥

स्त्रीहत्यापातकाऽऽक्रान्ताऽऽत्मानं मां वोढुमक्षमा ।
क्षमाऽपि तद्गिरौ क्वाऽपि, विधायाऽनशनं म्रिये ॥३४४॥

इति निश्चित्य चित्ते स्वे, सागरश्रेष्ठिनं ततः ।
अनुज्ञाप्य क्षणाद्गन्तुं, चचाल स गिरिं प्रति ॥३४५॥

गच्छंश्च त्वरितं तत्र, पर्वतोपत्यकातले ।
इतस्ततः स योगीन्द्रानद्राक्षीत् कर्म कुर्वतः ॥३४६॥

तथाहि– मृगत्वचि समासीनः, कृत्वाऽऽसननियन्त्रणम् ।
योगपट्टपरीवेषः, कश्चिदात्मानमीक्षते ॥३४७॥

कश्चित्पवनकाऽऽह्लादिनादाऽऽकृष्टमृगव्रजः ।
उच्चैर्मधुरमन्द्रां च, चर्यागीतिमसूत्रयत् ॥३४८॥

कश्चिदप्यस्थिकूटोच्चपल्यङ्कविलुलद्वपुः ।
स्वेच्छया भैक्ष्यमुत्तानशयो भुङ्क्ते हसन् रटन् ॥३४९॥

कश्चित्करालप्रज्वालखादिराऽङ्गारखातिकाम् ।
मृद्नन् पद्भ्यामथाऽऽङ्गारान्, करेणाऽऽदाय चाऽघसत् ॥३५०॥

अन्त्रसूतितहारेषु, वह्निकुण्डेषु कश्चन ।
जुहोति मांसखण्डानि, श्रद्धावान् मन्त्रसिद्धये ॥३५१॥

इति पश्यन् जगामैष, धीरत्वाद्योगिनोऽन्तिके ।
दृष्टश्च योगिना दूरात्, सम्पूर्णलक्षणो मुदा ॥३५२॥

अभिगम्य मुदाऽश्रूणि, मुञ्चन् योगी जगाद तम् ।
मम पुण्यैस्त्वमाकृष्टोऽकस्मादत्राऽऽगतोऽसि भोः ! ॥३५३॥

यन्मया ह्यधुना कृत्वा, पूर्वसेवां गुरूदितः ।
मन्त्रः साधयितुं सिद्धक्षेत्रेऽस्मिन्नुपचक्रमे ॥३५४॥

किन्तु सत्त्वाऽधिकः कोऽपि लब्धो नोत्तरसाधकः ।
तदभावादहं शक्तो, मन्त्रं साधयितुं नहि ॥३५५॥

तदहं प्रार्थये त्वां हि, प्रसीद मयि सात्त्विक ! ।
विद्यां साधयतो मे तदुत्तरः साधको भव ॥३५६॥

यतः– गताऽऽशस्याऽपि तुष्टेन, दैवेनाऽर्थः समर्थ्यते ।
मूर्च्छापर्यस्तमम्भोजं, पश्य जीवति भास्करात् ॥३५७॥

इत्युक्तो योगिनाऽत्यर्थमारामतनयस्ततः ।
दध्यौ चिन्तितपूर्वो मे, पूर्णो मृत्युमनोरथः ॥३५८॥

साधयिष्यति योगीन्द्रो, विद्यां च तत्र भाविनः ।
विघ्नांस्तान् रक्षयतो मे, वेतालेभ्यः सुखान्मृतिः ॥३५९॥

प्रतिशृणोमि योगीन्द्रवाचं द्रागिति निश्चयात् ।
आरामतनयः प्रोचे, योगिनं चाऽस्मि तेऽनुगः ॥३६०॥

इति तद्वाक्यपीयूषस्रोतसि स्नानमानसः ।
भूत्वा च निर्वृतो योगी, प्रारेभे मन्त्रसाधनम् ॥३६१॥

आगच्छन् राक्षसः प्रेतो, वेतालोऽन्योऽपि कश्चन ।
वार्यस्त्वयेत्यथाऽऽदिक्षदारामतनयं स हि ॥३६२॥

मण्डलाऽन्तः प्रविश्याऽथ, योगी मन्त्रं मुदाऽस्मरत् ।
अभूच्च क्षोभो मन्त्राऽधिष्ठात्र्या देवास्ततः पुरः ॥३६३॥

आजग्मुर्भूतवेतालशाकिनीप्रेतराक्षसाः ।
परीक्षाऽर्थं ततो ववृर्मण्डलं परितः क्षणात् ॥३६४॥

उच्चैः किलकिलाऽऽरावं, विदधुश्चैकहेलया ।
दिशो नेशुरिवाऽऽकाशं, पुस्फोटेव तदारवात् ॥३६५॥

आरामतनयस्त्वेष, तथाऽस्थादकुतोभयः ।
ततश्चाऽऽगत्य वेतालः, कोऽपि कोपादुवाच तम् ॥३६६॥

अरे ! न भवसीदानीं, कुरु शस्त्र स्मराऽमरम् ।
अद्य ते यमपुर्यां हि, प्रवेशदिनमुत्तमम् ॥३६७॥

इत्युक्तो वनसूस्तेन, दधावे सम्मुखस्ततः ।
वेतालघातं स्खलित्वा, तस्याऽङ्गे प्रविवेश सः ॥३६८॥

विक्रम्य मर्मणि स्वैरं, निहत्य मुष्टिभिर्मुहुः ।
वेतालः क्षमातले क्षिप्तः, सिद्धस्तेऽस्मीत्युवाच तम् ॥३६९॥

ततो मुक्तः प्रणम्याऽथ, वेतालस्तं व्यजिज्ञपत् ।
शौर्यक्रीतोऽस्मि दासस्ते, तद्ब्रूहीष्टं करोमि किम् ? ॥३७०॥

वनसूः प्राह कष्टे त्वां, यदि स्मरामि तत्त्वया ।
शीघ्रमागम्य साहाय्यं, कार्यं वेतालराज ! मे ॥३७१॥

ओमिति प्रतिपद्याऽसौ, तं प्रणम्य व्रजन् पुनः ।
निवृत्य सहसा तस्मै, किलाऽऽस इत्यचीकथत् ॥३७२॥

योगिनोऽस्य गिरा माऽऽस्म, भ्राम्यस्त्वं परितोऽनलम् ।
अन्यथा क्षेप्स्यति त्वां स, मायी वह्नौ स्वसिद्धये ॥३७३॥

यतः– वर्ज्यो दूरेण खलो, मध्यगतोऽनर्थकारणं स खलु ।
पश्य प्रविश्य तक्रं, स्तब्ध्वा दुग्धं विमन्थयति ॥३७४॥

इत्युदित्वा पुनर्नत्वा, वेतालोऽगान्निजाऽऽलयम् ।
आरामतनयोऽप्यस्थादुपसाधकमुद्धतः ॥३७५॥

ततश्च योगिना मन्त्रादाकृष्टा देवताऽगमत् ।
ऊचे सा योगिनं ब्रूहि, कुर्वेऽहं किमतः परम् ? ॥३७६॥

योगी प्राह त्वया साध्यः, सौवर्णपुरुषोऽधुना ।
प्रवेक्ष्यत्यत्र वह्नौ यः, स भावी स्वर्णपुरुषः ॥३७७॥

इत्युक्त्वाऽऽज्यच्छटां वह्नौ, क्षिप्त्वा सा देवता ययौ ।
योगी चाऽऽरामपुत्रस्य, शिखां मूर्ध्न्यभ्यमन्त्रयत् ॥३७८॥

रक्तचन्दनचर्चां च, चक्रेऽङ्गेषु यथाविधि ।
कण्ठे मालां तथा रक्तकणवीरस्य सोऽक्षिपत् ॥३७९॥

अभाणीच्च यदग्निं त्वं, परितो भ्राम्य निर्भयः ।
यथा सिद्ध्ययति मे विद्या, त्वत्प्रभावेन सात्त्विक ! ॥३८०॥

वेतालवचनं चित्ते स्मरन्नारामसूस्ततः ।
ध्यायन् पञ्चनमस्कारमभ्राम्यत्परितोऽनलम् ॥३८१॥

योगी च छलमादातुं, तमनुभ्राम्यति द्रुतम् ।
मङ्गलाऽऽवर्त्तनासत्कं, यद्वदनुचरो वरम् ॥३८२॥

कालेनाऽपि यदा वह्नौ, क्षेप्तुं तं नाऽभवत्क्षणः ।
विलक्षोऽभ्यग्नि चिक्षेप, योगी तं वननन्दनम् ॥३८३॥

लघुकायः स उच्छल्य, दोर्भ्यामाक्षिप्य योगिनम् ।
द्रष्टुं कौतुकमक्षेप्सीद्, ज्वलति ज्वलने क्षणात् ॥३८४॥

जातश्च तत्क्षणादेव, योगी जीवेन वर्जितः ।
सार्द्धषोडशसौवर्णपुरुषो द्युतिमन्दिरम् ॥३८५॥

तस्मिंश्च निःस्पृहोऽत्यन्तमारामतनयस्ततः ।
भूमौ निक्षिप्य तं कर्तुमनशनं पुरोऽचलत् ॥३८६॥

ततश्च दिशि याम्यायां, गच्छन् शुश्राव योगिनीम् ।
विलम्बस्तत्र किं वोऽभूच्छिष्याभ्य इति पृच्छतीम् ॥३८७॥

निपत्य पादयोस्तस्याः, शिष्यास्ताः प्राहुराकुलाः ।
विकथाश्रुतिचापल्यमपराध्यति देवि ! नः ॥३८८॥

योगिन्याह कथं जज्ञे, विकथाश्रुतिचापलम् ? ।
ताः प्राहुः श्रूयतां तर्हि, परमेश्वरि ! सादरम् ॥३८९॥

अस्तीह भरते क्षेत्रे, वैताढ्यो नाम पर्वतः ।
एतस्य दक्षिणश्रेणावस्ति पूर्मङ्गलावती ॥३९०॥

तत्र विद्याधरो विद्युन्माली नामाऽस्ति सोऽन्यदा ।
गच्छन्नष्टापदं व्योम्ना, प्राप ह्रीपुरपत्तनम् ॥३९१॥

तत्राऽथ बहिरुद्याने, तत्पुरक्ष्मापवल्लभाम् ।
सखीभिः सह कुर्वाणां, जलकेलिं ददर्श सः ॥३९२॥

तिरोहितः क्षणं पश्याम्येतासां स्वैरचेष्टितम् ।
इति विद्याधरः शाखिशाखायां निभृतोऽभवत् ॥३९३॥

राजपत्न्याह साऽऽनन्दात् क्षेमङ्करि ! कुतः कथम् ? ।
लब्धवानार्यपुत्रोऽमुं, कञ्चुकं देवदुर्लभम् ? ॥३९४॥

ऊचे क्षेमङ्करी देवि !, त्वत्पुण्यैर्लब्धवान् नृपः ।
खादतां किल पुण्यैर्हि, जायते धावतां धनम् ॥३९५॥

तथाऽपि कथयेत्येतत्, प्रोक्ता देव्याऽवदत्सखी ।
त्वत्पुण्यप्रेरिताश्चक्रुश्चौराः केऽप्यत्र चौरिकाम् ॥३९६॥

प्राप्तास्ते नगराऽध्यक्षैर्बद्ध्वाऽऽनीता नृपाऽग्रतः ।
दृष्ट्वा तान् जनता राज्ञे, व्यजिज्ञपत् कृताऽञ्जलिः ॥३९७॥

एतैर्नाथ ! पुरं सर्वं, लुण्टितं खात्रदानतः ।
एतद्गेहे समस्तं हि, वस्तु सम्भाव्यते विभो ! ॥३९८॥

ततश्च राजा तद्वेश्म, शोधयित्वा धनं नृणाम् ।
यद्यस्य हि तत्तस्यैवाऽर्पयामास सुनीतिमान् ॥३९९॥

लुण्टद्भिः स्तेनवेश्मानि, राजाऽध्यक्षैरवाप्यत ।
स एष कञ्चुकस्तत्र, सौरभव्याप्तनासिकः ॥४००॥

तैरार्प्यत नृपस्यैष, राजाऽप्यानन्दमीयिवान् ।
तुभ्यं चोपायनीचक्रे, प्रेमाऽद्वैतं दधत्त्वयि ॥४०१॥

स एष प्रेम्ण उत्कर्षः, प्रियस्य दयितां प्रति ।
पश्यन्तीनां यदन्यासामेकस्याः प्राभृताऽर्पणम् ॥४०२॥

इति देवी निशम्याऽथ, प्रेमसर्वस्वमात्मनि ।
पत्युर्विचिन्त्य सन्तोषपीयूषनिर्वृताऽभवत् ॥४०३॥

आदिशच्च सखीं वेगात्कञ्चुकं तं समानय ।
परिधाय यथाऽद्यैनं, राज्ञोऽर्द्धाऽऽसनमाश्रये ॥४०४॥

सखी गत्वा गृहीत्वा तं, यावन्मार्गमुपस्थिता ।
तावद्विद्याधरः सोऽयं, जह्रे कञ्चुकमूर्द्ध्वतः ॥४०५॥

हर्षाद्विद्याधरो वीक्ष्य, कञ्चुकं रामणीयकम् ।
दध्यौ यदस्य न म्लानिश्चित्रं न सौरभच्युतिः ॥४०६॥

तन्नीत्वाऽद्यैव रुष्टायाः, प्रियाया विदधाम्यहम् ।
ढौकने कञ्चुकं ह्येनं, येन तुष्यति सा मयि ॥४०७॥

इति विद्याधरो ध्यात्वा, क्षणादागत्य वेश्मनि ।
यावदर्पयिष्यत्यस्यै, तावदन्याऽथ तत्प्रिया ॥४०८॥

ज्ञात्वा कञ्चुकमायान्तं, पत्ये दास्या व्यजिज्ञपत् ।
समर्प्यः कञ्चुको मह्यमारोक्ष्याम्यन्यथा चिताम् ॥४०९॥

मयि सत्यां त्वमन्यस्यै, समर्पयसि कञ्चुकम् ।
इदं स्वप्नेऽपि मा मंस्थाः सपत्नीर्ष्या हि दुस्सहा ॥४१०॥

एतद्विद्याधरः श्रुत्वा, सन्देहाऽब्धौ ममज्ज सः ।
द्विभार्यस्य हि, पुंसः स्यान्न दुःखस्याऽन्तरं खलु ॥४११॥

वयस्याऽऽभ्यः स्वयं चाऽपि, भाणिते भणिते अपि ।
विद्याधर्यौ न मन्येते, कञ्चुकाऽऽदानमेकया ॥४१२॥

न शयाते न भुञ्जाते, कञ्चुकाऽप्राप्तिदुःखतः ।
विद्याधर्यौ ततः सोऽपि, विद्याधरो व्यचिन्तयत् ॥४१३॥

यद्येकस्यै प्रदास्यामि, कञ्चुकं ह्यपरा तदा ।
कुरुतेऽत्याहितं सोऽर्प्यस्तन्न कस्या अपि ध्रुवम् ॥४१४॥

इत्येकान्ते विमुक्तोऽसौ, कञ्चुकः सौरभोच्चयः ।
ययौ विद्याधरोऽप्यष्टापदे वन्दितुमर्हतः ॥४१५॥

विद्याधर्यौ तथैव स्तो, विना शयनभोजनम् ।
कथां ब्रूते विनोदाय, स्वस्वदासीजनस्तयोः ॥४१६॥

इत्येतद्बुद्धयोगिन्यै, कथयन्तीस्तु योगिनीः ।
श्रुत्वाऽज्ञासीदथाऽऽरामपुत्रः कञ्चुकमात्मनः ॥४१७॥

इति वृत्तान्तश्रवणात्, स्थिताः स्मस्तत्र किञ्चन ।
भगवति ! प्रसीद त्वमपराधं क्षमस्व नः ॥४१८॥

सोऽस्ति मे कञ्चुकोऽद्यापि, कथं वैताढ्यपर्वते ? ।
सैष तस्करवृत्तान्तो, घटते मम चेतसि ॥४१९॥

यत्कृते कञ्चुकप्राप्तिः, प्रीत्यै स्यात्सा मृता प्रिया ।
प्रियामृत्युविधायिन्या, कृतं कञ्चुकवार्तया ॥४२०॥

ततो न यावदद्याऽपि, भास्वानुदयमश्नुते ।
तावद्विशामि तं वह्निं, क्षिप्तो यत्राऽस्ति योगिराट् ॥४२१॥

इत्यालोच्य निवृत्याऽसावागात्तत्रैव मण्डले ।
धगद्धह्निनि सौवर्णपुरुषीभूतयोगिनि ॥४२२॥

स्मृत्वा पञ्चनमस्कारमालोच्य निजदुष्कृतम् ।
जीवेषु क्षामणां दत्त्वाऽनुमोद्य सुकृतं निजम् ॥४२३॥

यावत्प्रवेक्ष्यति क्षिप्रं, वह्नावारामनन्दनः ।
अकस्मात्तावदासन्नवृक्षाल्लेखः पुरोऽपतत् ॥४२४॥ युग्मम् ॥

किमेतदिति ? सम्भ्रान्तो, लेखमादाय पाणिना ।
उद्ग्रथ्य च समारब्धो, वाचनाय स्वचेतसा ॥४२५॥

स्वस्तिश्रीपुरपत्तनान्नरपतिर्लक्ष्मीविनोदः स्वयं,
सम्बोध्याऽऽदिशतीह काननसुतं स्थाने यथानामनि ।
आयातोऽसि न यत्पुनस्तत इयं वह्नौ विशन्ती मया,
त्वत्कान्ताऽस्ति निवारिताऽष्टदिवसीं यावत्ततस्त्वर्यताम् ॥४२६॥

प्रतिदिशं त्वच्छुद्ध्यर्थं, शुकशाखामृगाऽऽदयः ।
प्रेषिताः सन्ति तत्कोऽपि, भूयः प्रेष्योऽत्र शुद्धिकृत् ॥४२७॥

वाचयित्वेति लेखाऽर्थमवबुध्य व्यचिन्तयत् ।
अहो ! सत्योऽभवत्स्वप्नो, यो दृष्टः श्रेष्ठिवेश्मनि ॥४२८॥

मन्ये कदाचिन्मे कान्ता, मद्वियोगाद्धविर्भुजम् ।
विशन्ती सत्यतो राज्ञा, संरम्भाद्विनिवारिता ॥४२९॥

अहह !!! सत्यता कीदृक्, स्वप्नस्य मिलिताऽधुना ।
नूनं मामनुगृह्णन्त्याऽभीष्टदेव्या स दर्शितः ॥४३०॥

कथं व्योम्नः पपातैष ?, इति वृक्षं व्यलोकयत् ।
शाखाऽऽसीनमपश्यच्च, क्रीडामर्कटकं निजम् ॥४३१॥

ततः शाखामृगो वृक्षादुत्तीर्य प्रणमन्नथ ।
गृहीतो वक्षसाऽऽरामपुत्रेण ममता ह्यसौ ॥४३२॥

दध्यौ भाग्यान्ममाऽद्याऽपि, दिष्ट्या जीवति सा प्रिया ।
प्रवृत्तिः कञ्चुकस्याऽपि, प्राप्ताऽस्ति दैवयोगतः ॥४३३॥

कथञ्चित्कञ्चुकं प्राप्य, प्रियायै ह्यर्पये यदि ।
ततश्चिताऽग्निझम्पाया, मूढमृत्युर्भवेन्न नौ ॥४३४॥

पुरेऽत्रैव स्ववृत्तान्ताऽऽवेदकं लेखमर्पये ।
शाखामृगो यथा राज्ञे, निवेदयति यद्यथा ॥४३५॥

इति वल्गिरसेनैष, लिखित्वा पत्रमात्मना ।
समर्प्य मर्कटं स्नेहादनुगम्य व्यसर्जयत् ॥४३६॥

स्वयं च कञ्चुकोपायव्यग्रचित्तोऽभ्रमद्भुवि ।
स्वकान्तादर्शनाऽऽसन्नाऽवधिं चेतसि चिन्तयन् ॥४३७॥

अन्यदा वानरीभूय, क्रीडतो व्यन्तरान् वने ।
वीक्ष्याऽऽरामसुतोऽपश्यत्तेषां कापेयकौतुकम् ॥४३८॥

तेष्वेको नृपतीभूतो, महान् कालमुखाऽभिधः ।
सामन्ताऽमात्यपादातपदवानरसेवितः ॥४३९॥

अथ कालमुखो राजा, द्वास्थं वानरमादिशत् ।
तक्षाणमादिश क्षिप्रं, कीलिकाकेकिनिर्मितौ ॥४४०॥

गत्वा द्वास्थोऽपि तक्ष्णे तं, राजाऽऽदेशं समादिशत् ।
सोऽपि वानरतक्षाऽऽशु, कीलिकाकेकिनोऽकरोत् ॥४४१॥

आश्वाकाशगतीन् कीलप्रयोगात्तान्विधाय सः ।
गत्वा विज्ञपयामास, तक्षा वानरभूभुजे ॥४४२॥

ततः सोऽवादयद् ढक्कां, यियासुः प्रतिवानरान् ।
सम्भूयाऽऽजग्मुराश्वेव, सर्वे सन्नह्य वानराः ॥४४३॥

व्यलब्ध केकिनः सर्वान्, वानराणां पृथक् पृथक् ।
आरूढान् वीक्ष्य तान् राजा, चचालाऽऽरुह्य केकिनम् ॥४४४॥

कीलप्रयोगादुड्डीनान्, सजीवानिव केकिनः ।
तेऽथ वल्गावशादश्वानिवाऽमुञ्चन् यथापथम् ॥४४५॥

व्योममार्गे प्रयान्त्येते, केक्यारूढास्तु वानराः ।
भूमार्गेण दधावे च, तानन्वारामसूस्ततः ॥४४६॥

उत्तेरुः काननं प्राप्य, केकिभ्यो वानरास्तु ते ।
सज्जीबभूवुराश्वेवाऽवस्कन्दायाऽरिकानने ॥४४७॥

काहलां वादयामासुः, कातरप्राणहारिणीम् ।
एकान्ते केकिनो मुक्त्वा, चेलुस्ते च रिपून् प्रति ॥४४८॥

ज्ञात्वा प्रतिभयाद्वैरिसेनां तां बहिरागताम् ।
नेशुः केचिल्लताकुञ्जे, वृक्षाद्वृक्षं ययुः परे ॥४४९॥

कान्तामादाय केचिच्च, विविशुर्गिरिगह्वरे ।
फलितांऽह्रिपमूर्च्छाभिस्तस्थुस्तत्रैव केचन ॥४५०॥

नंष्ट्वा व्याघुट्य चाऽन्ये तु, वीक्षन्तेऽरींस्तरुस्थिताः ।
भयात्केचित्स्खलत्पादा, निपत्याऽगुः पुनस्तरुम् ॥४५१॥

केचिन्नीलमुखं भूपमावृत्य शौर्यशालिनः ।
ऊचुर्देव ! दृढीभूय, गम्यतेऽभिरिपून् स्वयम् ॥४५२॥

वीरावरणिकां कृत्वा, गच्छामः कतिचिद्वयम् ।
त्वत्प्रतापाद्विद्विषां सेनां, भङ्क्ष्यामो यदिदं कियत् ? ॥४५३॥

समादिश यथायोग्यमेते स्मस्त्वन्निदेशगाः ।
येन ते राजधानीयं, शत्रुभिर्व्याप्य भज्यते ॥४५४॥

लोकश्च क्षोभमापन्नः, त्यजन् पुत्रादि नश्यति ।
युद्धोपक्रममाधेहि, ज्ञास्यते विक्रमोऽधुना ॥४५५॥

इत्थमुत्तेजितो मन्त्रिसामन्तैर्विक्रमोद्धतैः ।
युयुत्सुश्च स्वयं नीलमुखो राजाऽऽह मन्त्रिणः ॥४५६॥

निधत्ताऽन्तःपुरं दुर्गे, सहाऽपत्यैर्यथासुखम् ।
मुञ्चन्तां दुर्गरक्षायै, सैन्यानि परितः स्फुटम् ॥४५७॥

इत्यादिश्य च नासीरवीरवल्गितराजितः ।
निस्ससार स सर्वाऽभिसारतो वानराऽधिपः ॥४५८॥

ततो नासीरयोरासीद्द्वयोरपि महाऽऽहवः ।
नखानखिहताः पेतुरुभयत्राऽपि वानराः ॥४५९॥

वानर्यश्च समानीयाऽब्जिनीपत्रपुटस्थितम् ।
पाययन्ति स्म पानीयं, युद्ध्यमानान् निजान् भटान् ॥४६०॥

आरामतनयोऽप्यागाद्वेगात्तिष्ठन्ति यत्र ते ।
कीलप्रयोगसञ्चारात्पुङ्गवो दारुकेकिनः ॥४६१॥

इतश्च युद्ध्यमानास्ते, चपेटाभिः परस्परम् ।
आरुक्षन् वृक्षमुत्पेतुर्दिवं विक्रमवल्गिनः ॥४६२॥

अथ दैववशाद्भग्नः, कालवक्त्रो ननाश सः ।
प्राणानादाय मुक्त्वा तु, तत्र तान् काष्ठकेकिनः ॥४६३॥

आरामतनयः सम्यक्, कीलसञ्चारवित्ततः ।
आरुह्य केकिनं कञ्चिद्वैताढ्यं प्रति सोऽचलत् ॥४६४॥

मनोवेगेन च स्पर्द्धमानेन काष्ठकेकिना ।
आरामतनयः प्राप, वैताढ्ये मङ्गलावतीम् ॥४६५॥

तुर्यभूमिगवाक्षाऽग्रपल्यङ्कन्यस्तकञ्चुकम् ।
कथञ्चिदप्ययं ज्ञात्वा, विद्युन्मालिगृहं ययौ ॥४६६॥

विद्युन्मालिनिवासे च, कलाऽप्यारूढ एव सः ।
प्रविश्य कञ्चुकं दृष्ट्वा, तमादाय च निर्ययौ ॥४६७॥

निर्भयत्वादवादीच्च, हट्टश्रेणिषु निर्भरम् ।
मदीयः कञ्चुको ह्येष, नीयते तन्मयैव हि ॥४६८॥

इत्युच्चैर्घोषयन्नेष, निस्ससार पुराद्बहिः ।
कीलिकाकौशलान्मङ्क्षु, प्रतस्थे स्वपुरं प्रति ॥४६९॥

अकस्मादेत्य गेहाच्च, गृहीत्वा कञ्चुकं पुनः ।
केक्यारूढपुमानेष, हहा !! याति द्रुतद्रुतम् ॥४७०॥

इति तारतरं विद्याधर्यौ ते इष्टकञ्चुके ।
सोरस्ताडं जनानुच्चैरूचतुर्धावत द्रुतम् ॥४७१॥

गतोऽग्रेऽष्टापदं विद्युन्माली यो हि पतिस्तयोः ।
ततस्ताभ्यां स्वयं चक्रे, कञ्चुके वादनिर्णयः ॥४७२॥

कञ्चुकग्राहिणं जित्वा, याऽत्र गृह्णाति कञ्चुकम् ।
तस्या एव भवेत्सैष, नाऽन्यस्याः शपथोऽत्र नौ ॥४७३॥

इति निर्णयमाधाय, स्वस्वपैतृकपत्तिभिः ।
सनाथे चेलतुर्द्वे ते, तस्याऽनुपदमेव च ॥४७४॥

विचक्रतुः क्षणादेते, विद्याधर्यौ स्वशक्तितः ।
आश्वहास्तिकपादातरथकट्याचतुर्बलीम् ॥४७५॥

विद्याधर्योः प्रभावेन, चतुर्द्धाऽपि च तद्बलम् ।
प्रत्यारामसुतं व्योम्ना, दधावे चित्तरंहसा ॥४७६॥

ततो ददृशतुर्विद्याधर्यौ दूरेऽग्रगामिनम् ।
आरामनन्दनं वस्त्राऽञ्चलचुम्बितकञ्चुकम् ॥४७७॥

मिलित्वा ते अवेष्टेतां, विद्याधर्यौ वनाऽङ्गजम् ।
ऊचतुश्च क्व रे ! यासि, गृहीत्वा कञ्चुकं करे ? ॥४७८॥

ऐक्षिष्टाऽऽरामसूर्व्योम्नि, प्लवमानमितस्ततः ।
विद्याधर्योर्बलं दूराद्यादःसैन्यमिवाऽम्बुधौ ॥४७९॥

दध्यौ च न हि शक्ष्यामि, गन्तुमेतैर्वृतोऽस्मि यत् ।
एकश्चाऽहं कथं योक्ष्ये ?, धास्ये वा कञ्चुकं कथम् ? ॥४८०॥

विद्याधर्योश्च सैन्येनाऽत्यर्थमाच्छादितं नभः ।
भयादिवाऽर्कभासश्च, नाऽऽत्मानं दर्शयन्त्यपि ॥४८१॥

केवलं ध्वान्तसाम्राज्यमेकच्छत्रं विजृम्भते ।
नाऽग्रतः पश्यतो दृष्टी, दिग्मोहो भविताऽत्र मे ॥४८२॥

भ्रान्त्वा भ्रान्त्वा पतिष्यामि, भूयो भूयोऽपि भूरिशः ।
विद्याधर्योर्वरूथिन्यां, तत्कुर्वे किमतः परम् ? ॥४८३॥

वारंवारं पुरः पश्चात्पार्श्वयोर्निकटं भवत् ।
विद्याधर्योर्बलं वीक्ष्य, स वेतालं ततोऽस्मरत् ॥४८४॥

स्मृतमात्रोऽपि वेतालः, समागात् सपरिच्छदः ।
मुखान्मुक्ताऽनलज्वालाध्वस्तध्वान्तकृतद्युतिः ॥४८५॥

मुक्ताऽट्टहाससन्त्रासपर्यस्तपरसैनिकः ।
नत्वाऽऽरामसुतं प्रोचे, समादिश करोमि किम् ? ॥४८६॥

स उवाच विद्याधर्योर्युद्ध्यमानो बलं स्खल ।
समर्प्य कञ्चुकं यावदायामि पुनरत्र भोः ! ॥४८७॥

यद्यहं नाऽधुना तत्र, पुरे स्वे यामि तन्मया ।
आगमेनाऽवधिः प्रोक्तः, पूर्यतेऽत्र विलम्बनात् ॥४८८॥

ततश्च मत्प्रिया प्रोद्यद्वह्निज्वाऽलाञ्चितां चिताम् ।
प्रविशेत्तत्त्वयाऽत्रैव, सैन्यं स्खल्यमनुव्रजत् ॥४८९॥

वेतालः प्राह कस्मिंश्चित्, पुरेऽदर्शि मयाऽप्यदः ।
यदेका स्त्री चितावह्नौ, प्रवेष्टुं प्रस्थिताऽभवत् ॥४९०॥

ततो यदि पुनः सा ते, भाविनी दयिता खलु ।
तद्गच्छ त्वरितं येन, त्वत्पृष्ठिरक्षकोऽस्म्यहम् ॥४९१॥

इति वेतालकथितस्त्रीवृत्तान्तकृताऽरतिः ।
वामाक्षिस्पन्दनेनाऽपि, सूचितप्रेयसीमृतिः ॥४९२॥

ततश्चचाल सन्तप्तवपुश्चित्तो वनाऽङ्गजः ।
कीलिकायन्त्रसञ्चारजङ्गालदारुकेकिना ॥४९३॥ युग्मम् ॥

इतश्च नर्मदातीरे, कान्ताऽऽगतिदिनाऽवधिम् ।
पूरयित्वा नृपं प्रोचे, पद्मावती कृताऽञ्जलिः ॥४९४॥

राजन्नहं स्ववर्गेण, वारिताऽपि चितां प्रति ।
पतिमृत्युप्रायश्चित्तशुद्धये चलिताऽभवम् ॥४९५॥

पृथ्वीपुण्योच्चयेनाऽथ, मान्येन गुरुवत्त्वया ।
मर्कटाच्छुद्धिमानीय, स्थापिताऽहमियच्चिरम् ॥४९६॥

ततस्तल्लेखनिर्दिष्टाऽवधिदिनाऽधिकोऽभवत् ।
यदद्याऽपि स नाऽऽयाति, तत्पत्युर्भाव्यमङ्गलम् ॥४९७॥

विसृज तन्महाराज !, चितावह्निप्रवेशने ।
पतिहत्योत्थपाप्मा, मामाक्रामत्यभितोऽपि यत् ॥४९८॥

इति श्लथीकृताऽऽबन्धमुक्त्वा राजानमुच्चकैः ।
नत्वा श्वशुरवर्गस्य, पितृवर्गस्य चाऽऽदरात् ॥४९९॥

दत्त्वाऽत्यर्थमसौ दानं, दीनाऽनाथजनाय तु ।
श्रद्धावन्धोद्धुरीभूय, पूजयित्वेष्टदेवताम् ॥५००॥

अनुकूल्य सखीलोकं, क्षमयित्वा परिच्छदम् ।
आश्वास्य स्वकुटुम्बं चाऽऽपृच्छ्य श्वशुरमात्मनः ॥५०१॥

गर्हित्वा दुष्कृतं स्वस्य, सुकृतं चाऽनुमोद्य सा ।
सिद्धसाक्षिकमालोच्य, चचालाऽथ चितां प्रति ॥५०२॥ [चतुर्भिः कलापकम्]

ततः क्रन्दति पूर्लोके, मूर्च्छति स्वसखीजने ।
रुदति बन्धुवर्गे चाऽनुशोचति महीपतौ ॥५०३॥

सोरस्ताडं विलिखन्त्यां, भूमौ मातरि निर्दयम् ।
वृक्षस्तम्बे शिरस्यास्फालयति भ्रातृपुङ्गवे ॥५०४॥

क्वेदं रूपं पुनर्भावि ?, विनयः क्वैष द्रक्ष्यते ? ।
क्वेदमुत्कर्षि शीलं च ?, क्व चौचित्यगुणक्रमः ? ॥५०५॥

क्वेदं वात्सल्यमुज्जृम्भि ?, क्व चैषा दानशीलता ? ।
क्वेदं दीनकृपालुत्वं ? क्व धर्मैक्यविधायिता ? ॥५०६॥

क्व चैषा दक्षता ? क्वाऽयं वैदग्ध्यवक्तृतागुणः ? ।
क्व चैतत्पतिदेवत्वं ?, क्व भक्तिर्गुरुषु स्थिरा ? ॥५०७॥

जातमेतर्हि शून्यं च, जगदेतद्विनाऽनया ।
क्रीडासौधमियं सर्वकलानां भजते हहा !! ॥५०८॥ षड्भिः कुलकम् ॥

इत्यासन्नपुरग्रामाऽऽगतलोकेषु भूरिशः ।
परिदेवितदीनेषु, ततः पद्मावती क्षणात् ॥५०९॥

कृत्वाऽञ्जलिपुटं पञ्चनमस्कारं शुभाऽऽशया ।
मनसिकृत्य निर्भीका, ददौ झम्पां चिताऽनले ॥५१०॥ युग्मम् ॥

ततो लोकः समस्तोऽपि, प्रोच्चैराक्रन्ददीनवाक् ।
इतस्ततश्च पर्यस्तनिस्सहाऽङ्गोऽपतद्भुवि ॥५११॥

अथेत्यवसरे दृष्ट्वाऽभितो धूमाऽङ्कितं नभः ।
आरादायात्स आरामपुत्रो जीवन्मृतोऽभवत् ॥५१२॥

क्षणाच्च नर्मदातीरे, तत्राऽऽगाद्वननन्दनः ।
अपश्यच्च चितां वह्निज्वालाऽऽलीढदिगन्तराम् ॥५१३॥

वस्त्राऽऽच्छादितवक्त्राऽग्रानुदश्रून् शोकविह्वलान् ।
वीक्ष्याऽऽत्मस्वजनान् लोकानन्यांश्च परिदेविनः ॥५१४॥

ज्ञात्वा पद्मावतीं वह्निप्रविष्टां निजचेतसा ।
उत्तीर्य केकिनो मुक्त्वा, कञ्चुकं चैकतोऽवनौ ॥५१५॥

ततो यद्यस्ति मे कान्ता, सतीव्रतविराजिनी ।
तदियं च तथाऽहं च, भूयास्व द्रुतमक्षतौ ॥५१६॥

इत्युक्त्वा दयितामृत्युपातकाऽऽतङ्ककम्पवान् ।
अदृष्टः स्वजनैर्झम्पां, चितायां वनसूरदात् ॥५१७॥

ततोऽनुपदमायद्भिर्युद्ध्यमानैर्मिथोऽपि सः ।
विद्याधरीवरूथिन्या, वेतालैश्च व्यलोक्यत ॥५१८॥

अथोचतुर्विद्याधर्यावहो ! वह्निचितामयम् ।
प्राविशत्कथमुत्प्लुत्य, कञ्चुके पश्यतोहरः ॥५१९॥

वेतालोऽपि तदा दध्यौ, हहा !! किमिदमागतम् ? ।
यद्रक्षाऽर्थं मया युद्धं, स कथं वह्निमाविशत् ? ॥५२०॥

इत्युभे अपि ते सैन्ये, योद्धुं शैथिल्यमीयुषी ।
ईयतुर्नर्मदातीरे, यत्राऽऽस्ते स रुदन् जनः ॥५२१॥

अथोत्तरेण तद्विद्याधर्योर्हस्त्यादिगर्जितम् ।
आकर्ण्य दक्षिणेनाऽथ, वेतालोच्छृङ्खलाऽऽरवम् ॥५२२॥

सम्भ्रमात्संवृताऽऽस्याऽग्रप्रावरणाऽञ्चलाः क्षणात् ।
दृष्ट्वा तदुभयत्राऽपि, सैन्यं नेशुर्भयाज्जनाः ॥५२३॥ [युग्मम्]

किमेतदिति ? सम्भ्रान्ता, गत्वा दूरे स्थिता जना ।
विलोकन्ते समायान्तीं, चितामनुबलद्वयीम् ॥५२४॥

करिष्यन्ति किमेते हि ?, चितां प्रति कृतत्वराः ।
इति व्यात्तदृशः प्रोच्चैः, स्थानाऽऽरूढा मिथो जगुः ॥५२५॥

राजा तु सर्वसन्नाहव्यूहमाधाय सत्वरम् ।
योद्धुं विद्याधरीसैन्यैर्बभूवाऽभिमुखः क्षणात् ॥५२६॥

ततो विद्याधरीवृन्दं, तच्चितां परितः स्थितम् ।
वीक्षाञ्चक्रे भुवि भ्रष्टं, केकिनं कञ्चुकं तथा ॥५२७॥

अस्मद्भयादथाऽन्यस्माद्धेतोर्वा प्राविशच्चिताम् ।
अयं स कञ्चुकस्तेयीत्यालोकिष्ट चितां दृशा ॥५२८॥

विलोक्य चाऽक्षतं तत्र, सनाथं वामतस्तया ।
पद्मावत्याऽप्यक्षताऽङ्क्या, ह्यारामपुत्रमुत्प्रभम् ॥५२९॥ [युग्मम्]

अहो ! आश्चर्यमाश्चर्यं, प्रविष्टोऽग्नावपीह यत् ।
सप्रियोऽप्यस्ति सौवर्णाऽऽसनाऽऽसीनोऽम्भसीव सः ॥५३०॥

इत्युच्चैर्लापिनीं श्रुत्वा, विद्याधर्योर्वरूथिनीम् ।
आययुः कौतुकाद्राजा, परेऽपि स्वजनाऽऽदयः ॥५३१॥

ततश्चाऽऽरामपुत्रोऽपि, पद्मावतीसतीव्रतात् ।
शीतीभूताऽग्निपुञ्जायाश्चिताया निरगाद्बहिः ॥५३२॥

जोच्चक्रेऽथ स राजानं, तमाश्लिक्षन्नृपो मुदा ।
अपृच्छच्च स सङ्क्षेपाद्वृत्तान्तं कञ्चुकाऽऽदिकम् ॥५३३॥

आनन्दसम्पदद्वैतप्रादुर्भूताऽश्रुमोदितौ ।
व्यात्तबाहू मुदाऽऽश्लिष्य, ननाम पितरौ पदोः ॥५३४॥

आश्लिष्याऽऽश्लिष्य पितृभ्यां, हर्षाऽश्रुमोचनच्छलात् ।
पुत्राऽदर्शनदुःखाय, ददे मूलाज्जलाऽञ्जलिः ॥५३५॥

यतः— पुत्राऽऽगतिर्मुदामग्रे, मुदोऽन्याः पदपांशवः ।
पुत्राऽदर्शनदुःखेन, मृतो दशरथोऽपि हि ॥५३६॥

कैश्चिदालापितः स्नेहात्, कांश्चित् स आलपन् स्वयम् ।
नतः कैश्चिन्ननामाऽथ, कांश्चिदारामनन्दनः ॥५३७॥

एवं पद्मावती लज्जानीरङ्गीविवृताऽऽऽनना ।
गुरून् दूरान्ननामैषा, भूतलन्यस्तमस्तका ॥५३८॥

पुत्रान् प्राप्नुहि नीरोगान्, गुणिनः सम्पदाऽऽवृतान् ।
वन्द्या भवस्व शीलेनेत्याशिषं गुरवो ददुः ॥५३९॥

दृष्ट्या दृष्टाऽसि वत्से ! त्वं, भूयोऽपि शुभकर्मभिः ।
अभिसृत्येति साऽऽनन्दा, दृढं माताऽऽलिलिङ्ग ताम् ॥५४०॥

मुहुरस्याः प्रमोदाऽश्रु, निर्मार्ज्य निजपाणिना ।
चुचुम्बाऽऽस्यं सुतेभ्यो यन्मातुः पुत्र्योऽधिकं प्रियाः ॥५४१॥

ततश्च स्वसखीलोकमाश्लिष्य वक्षसा दृढम् ।
पद्मावती सुधास्नातेवाऽभूत् स्नेहः सखीषु यत् ॥५४२॥

विद्याधर्यावथ ज्ञात्वा, वृत्तान्तं कञ्चुकस्य तत् ।
कञ्चुकं प्रति निर्बन्धं, मुक्त्वा विस्मयमीयितुः ॥५४३॥

अहो ! प्रीतिर्मिथो यूनोरेतयोर्यत् परस्परम् ।
आशङ्क्याऽमङ्गलं वह्नौ, पेततुः प्रेम यत्प्रभुः ॥५४४॥

एते च स्वजना यूनोरनिर्वाच्यां मुदं ययुः ।
स्वजनाऽऽगमनप्रीतिर्दुःखग्रीष्मघनाऽऽवली ॥५४५॥

इत्यानन्दमयं सौख्यमयं धृतिमयं जनम् ।
वीक्ष्य विद्याधरप्राणदयिते ते ततः स्वयम् ॥५४६॥

आदाय कञ्चुकं प्रीत्या, स्वहस्तेन भुवस्तलात् ।
पर्यदीधपतां पद्मावतीं तं दिव्यसौरभम् ॥५४७॥ [युग्मम्]

ततो विद्याधरीसैन्यैर्व्योमवर्त्मनि यायिभिः ।
भूमार्गगामिभिर्भूपसैन्यैः परिवृतः स तु ॥५४८॥

गन्धसिन्धुरमारूढः, पठ्यमानश्च बन्दिभिः ।
सोत्तरीयाऽञ्चलोल्लासं, गृह्णन् वृद्धाऽङ्गनाऽऽशिषम् ॥५४९॥

अग्नौ शैत्यकरोच्छ्वासिदृष्टशीलाऽनुभावतः ।
शीलप्रशस्तिशालिन्या, पद्मावत्या विराजितः ॥५५०॥

मुहुर्वीक्षितुमावृत्तवक्त्रं पुरोगबन्धुभिः ।
प्रविश्य पुरमुद्भूतसङ्गीतः स्वगृहं ययौ ॥५५१॥ [चतुर्भिः कलापकम्]

सत्कृत्य भूपतिं नानारत्नाऽऽभरणदानतः ।
यथायोग्यं च सन्तोष्य, राजलोकं धनाऽम्बरैः ॥५५२॥

विद्याधर्यौ च सन्मान्य, स्नेहादञ्जलिबन्धतः ।
आनीतपूर्णपात्रत्वात्, स्वजनान् परिधाप्य च ॥५५३॥

याचकेभ्यो धनं दत्त्वा, भोजयित्वा बुभुक्षितान् ।
आरामतनयः सर्वान्, विससर्ज कृताऽञ्जलिः ॥५५४॥ [त्रिभिर्विशेषकम्]

अन्यैरदृश्यमानाच्च, वेतालात्स्वर्णयोगिनम् ।
तमानाय्य गृहीत्वा च, वेतालं व्यसृजन्मुदा ॥५५५॥

ततः स्नानं विधायैषोऽलङ्कृताऽभिनवाऽम्बरः ।
अर्हतोऽपूपुजद्भक्त्या, गेहे देवगृहेषु च ॥५५६॥

प्रतिलम्भ्य ततः साधूंस्तपश्चारित्रमन्दिरम् ।
साधर्मिकजनैः सार्धं, बुभुजेऽसौ यथारुचि ॥५५७॥

इत्थं ज्ञातस्वपुण्योऽयं, ज्ञातपत्नीसतीव्रतः ।
आरामतनयः पूर्णं, गार्हस्थ्यं पर्यपालयत् ॥५५८॥

अन्यदा बहिरुद्याने, केवली समवासरत् ।
तं वन्दितुमथाऽऽरामपुत्रोऽगात्तत्र सप्रियः ॥५५९॥

त्रिश्च प्रदक्षिणीकृत्य, ज्ञानिनं तं ननाम सः ।
प्राक् समासीनभव्यानां, ददौ वन्दनकं च सः ॥५६०॥

ततः शुद्धमहीपीठे, निषण्णे स वनाऽङ्गजे ।
पापपङ्कपयःप्रायां, प्रारेभे धर्मदेशनाम् ॥५६१॥

कृतभक्तिर्जिनेन्द्राणां, नतश्चारित्रशालिनाम् ।
कुर्वाणश्च दयाधर्मं, सम्यक्त्वान्मोक्षमश्नुते ॥५६२॥

पुञ्जीकृतप्रकृतिकर्मवपुःकटित्रे
चिक्रीडतोर्बत शुभाऽशुभयोः क्षयेण ।
आत्मम्भरिः स हि कवत् स्वमुखश्च यः
स्यादात्मा स मर्त्यभवपट्टकलाभभोक्ता ॥५६३॥

किञ्च– दानाऽऽदिकमुपकृत्यं, सपदि जरित्वाऽक्षरद्वयीमात्रः ।
यत्कल्याणं धर्मस्तन्मुञ्चति गुह्यनाग इव ॥५६५॥

अकृतसुकृतस्य न सुखान्यतसतपसो न चेष्टसिद्धिश्च ।
नाऽशीलवतो महिमा, नहि मोक्षो मूढहृदयस्य ॥५६६॥

तस्माद्धर्मे बुद्धिः, कार्याऽकार्ये विचार्य कार्यैव ।
अधिगम्य मानुषत्वं, जिनधर्माऽऽराधकैर्भाव्यम् ॥५६७॥

यत्सद्भावाद्धर्मो, जीवति तत्प्राणिरक्षणं श्रेष्ठम् ।
दूरेऽपि नागवल्यां, छिन्नायां तद्दलप्लोषः ॥५६८॥

सत्या वाक्किल दयिता, धर्मस्याऽनन्यशरणललितस्य ।
त्यक्तरजनिः शशाङ्को यात्यस्तं भवति वाप्यमहाः ॥५६९॥

चोरीकारकलङ्को, नहि मृष्यति सम्पदं न विश्वासम् ।
क्रूरग्रहः किलर्क्षे, रक्षति वृष्टिं तथा पुष्टिम् ॥५७०॥

मैथुनसतताऽऽसक्तं, वृण्वन्त्यपकीर्तिपापमरणानि ।
शशिनो रजनीरागाच्चिरलाञ्छनखण्डनग्रहणम् ॥५७१॥

अनियन्त्रितविपुलाऽऽशः, सविलासं नर्त्यते मनोरथकैः ।
गुणविधृताऽप्याशायुक्, पताकिका भ्राम्यते पवनैः ॥५७२॥

इत्याकर्ण्य समुद्भूतभावनाऽऽसक्तमानसः ।
स सम्यक्त्वं प्रपद्याऽथ, गुरून् नत्वा ययौ गृहम् ॥५७३॥

सिद्धसौवर्ण्णपुरुषादङ्गेषु कर्त्तितादपि ।
पुनः पल्लविताद्गृह्णन् स्वर्णमाढ्यतरोऽभवत् ॥५७४॥

अष्टाऽहिकामर्हद्देवगेहेषु कारयत्यथ ।
ददाने श्रेयसि द्रव्यमारामतनये ततः ॥५७५॥

स्फुटद्दृष्टमहास्वप्नसूचितं तनयं सती ।
पद्मावती सहाऽऽनन्दपूरेणाऽसूत सप्रभम् ॥५७६॥ [युग्मम्]

उत्सवं कारयामास, गायन्नृत्यद्वधूजनम् ।
मङ्गलध्वनिसाऽऽनन्दं, समागच्छत् सुमातृकम् ॥५७७॥

षष्टिकां जागरित्वाऽथ, सङ्गीताऽऽह्लादमेदुराम् ।
दशाऽहे परिपूर्णे च, हृष्यद्बान्धवबन्धुरे ॥५७८॥

अस्माकं दुःखमुच्छेद्य, पूरयित्वा मनोरथान् ।
जातोऽयमिति पुत्रस्य, पूर्णात् कलश इत्यथ ॥५७९॥

पितरौ नाम चक्राते, श्लाघितौ सुतजन्मना ।
ततः सोऽपि क्रमाल्लाल्यमानः प्रापाऽथ यौवनम् ॥५८०॥
समानगुणरूपाभिरिभ्यपुत्रीभिरुत्सवात् ।
पितृभ्यां पूर्णकलसः, सन्तोषात् पर्यणाय्यत ॥५८१॥
आरामतनयस्याऽथ, सम्यक्त्वस्थैर्यमीक्षितुम् ।
आसन्नव्यन्तरी क्वाऽपि, चकारेत्यसमञ्जसम् ॥५८२॥
पाणिग्रहणाऽनुपदं, पुत्रस्याऽऽगान्महाज्वरः ।
तद्वशाद्दाहदीर्घार्त्तिस्तं प्रचक्रेऽतिदुस्सहम् ॥५८३॥
सोऽचैतन्यादसम्बद्धं, प्रलपति लुठन् भुवि ।
न वैद्येन न यक्षैश्च, बभूवाऽस्य ज्वरक्षयः ॥५८४॥
ततश्चाऽऽगात्कुतोऽप्येको, मान्त्रिकः स्फुटडम्बरः ।
ज्ञात्वा तं वनसूराह्वच्चिकित्सायै सुतस्य तु ॥५८५॥
सत्कृत्वा [सत्कृत्य] मण्डलाऽऽलेखमुपवेश्य कुमारिकाम् ।
क्षिप्तमक्षतपात्रेऽसिं, पूजयामास डम्बरात् ॥५८६॥
स्वयं तु ध्यानमुद्राभिः, किलाऽवतार्य यक्षिणीम् ।
खड्गे कुमारिकां प्राह, बाले ! पश्यसि किञ्चन ? ॥५८७॥
बालाऽऽह खड्गे पश्यामि, यक्षिणीं भीषणाऽऽकृतिम् ।
मान्त्रिकः प्राह किं ब्रूते ?, यक्षिणी कथय स्फुटम् ॥५८८॥
सम्यगाकर्ण्य बालाऽपि, समाख्यदुच्चकैरिदम् ।
यक्षिणीयं वदत्येतद्यत्पूर्णकलसो ह्यसौ ॥५८९॥
मोचनाऽर्थमशक्येन, ग्रस्तो दोषेण भूयसा ।
गच्छन् सम्भाव्यते वेश्म, कृतान्तस्येति निश्चयः ॥५९०॥
इति श्रुत्वाऽपि बालाया, वाचं प्राणाऽपहारिणीम् ।
पद्मावती मुमूर्च्छाऽथ धीरस्त्वाऽऽरामसूर्जगौ ॥५९१॥
पृच्छ मान्त्रिक ! दोषोऽयं, निवर्त्तते कुतोऽप्यहो ! ।
अपप्र(न्वपृ)च्छदसौ देवीं, बालया खड्गवासिनीम् ॥५९२॥

देवीवाचं ततः श्रुत्वा, बालाऽऽह सर्वसाक्षिकम् ।
चेत्पुरीपद्रयक्षस्य, शापाऽनुग्रहकारिणः ॥५९३॥

आरामतनयः स्वेन, पाणिभ्यां कुरुतेऽर्च्चनम् ।
तदा निवर्त्ततेऽवश्यं, रोगोऽस्य मृत्युरन्यथा ॥५९४॥ [युग्मम्]

तच्छ्रुत्वाऽऽरामपुत्रोऽथ, सम्यक्त्वकृतनिश्चयः ।
दध्यौ यद्यस्ति मृत्युर्हि, तत्केनाऽपि न जीवति ॥५९५॥

अथ जीवितमस्त्यस्य, पूर्वोपार्जितमायतम् ।
तत्केनाऽपि न मृत्युः स्याद्यक्षेण व्यन्तरेण वा ॥५९६॥

अर्थेऽस्मिन् गतसन्देहे, किं यक्षाऽऽदिभिरर्चितैः ? ।
तदर्चा येन सम्यक्त्वदूषणाय भवेन्मम ॥५९७॥

सुतस्तु म्रियतां वाऽपि, जीवताद्वा स्वकर्मतः ।
जाता मृताश्च भूयांसः, संसारे वसतां सुताः ॥५९८॥

भवकोटिभ्रमात्प्राप्ते, मानुषत्वेऽतिदुर्लभे ।
तत्राऽपि प्राप्य सम्यक्त्वं, तज्ज्ञः को दूषयत्यदः ॥५९९॥

ऊचे च मान्त्रिकं शीघ्रं, त्वं विसर्जय मण्डलम् ।
नाऽहं कल्पद्रुमं मुक्त्वा, सेवे धत्तूरकाऽङ्घ्रिपम् ॥६००॥

इत्युक्तो मान्त्रिकस्तेन, संहृत्य मण्डलं क्षणात् ।
बभूव व्यन्तरी दिव्यनैपथ्योद्भटविग्रहा ॥६०१॥

ततो वनभुवं प्रोचे, त्वत्सम्यक्त्वं परीक्षितुम् ।
किलैतत्कृतवत्यस्मि, नीरुक् पुत्रोऽस्त्यतः परम् ॥६०२॥

इत्युक्त्वा व्यन्तरी शक्त्या, तिरोभूता ततः क्षणात् ।
स पूर्णकलसो नीरुक्, भूत्वा चिक्रीड पूर्ववत् ॥६०३॥

आरामतनयोऽप्येष, पालयित्वा विशेषतः ।
सम्यक्त्वं तत्प्रभावेन, दिवं प्रापाऽऽयुषः क्षये ॥६०४॥

आरामतनयकथा समाप्ता ॥ ग्रन्थाग्रम् ६१४॥

हरिषेणश्रीषेणकथा

कथामेनां निशम्याऽयमजापुत्रो विशेषतः ।
विवेकाद्गतनिद्रः सन्, पुनः पप्रच्छ सत्कथाम् ॥१॥

वयस्योऽपि जिनेन्द्रोक्तधर्मसंवर्म्मितां कथाम् ।
विनयप्रधानां भूयः, प्रारेभे कलया गिरा ॥२॥

अस्तीह भरतक्षेत्रे, विशाला नाम पूर्वरा ।
विशालविक्रमो नाम, तत्राऽऽस्ते पृथिवीपतिः ॥३॥

तत्राऽभूतां हरिषेणश्रीषेणाऽऽख्यौ सहोदरौ ।
क्षत्रियौ परमस्नेहादवियुक्तौ परस्परम् ॥४॥

अथाऽवलगनाऽर्थं तावुभौ देशान्तरं प्रति ।
चेलतुर्येन नैव स्युस्तेजस्विनो निरुद्यमाः ॥५॥

गच्छन्त्वावन्यदा सायं, समीक्ष्य यक्षमन्दिरम् ।
वासाऽर्थं जग्मतुस्तत्र, कुलायमिव पक्षिणौ ॥६॥

क्व गन्तव्यं ? नृपः को वा, योग्यः सेवितुमावयोः ? ।
इत्यादि मन्त्रयन्तौ तौ, यक्षोऽन्तःस्थोऽब्रवीदिति ॥७॥

हं हो !! मर्त्यौ ! युवां सेवां, विधातुमनसौ यदि ।
तदाऽहमेव सेव्यो वां, सर्वं दातुं क्षमोऽस्मि यत् ॥८॥

अहं हि श्रीफलाऽभिख्योद्यानाऽधिष्ठायकस्ततः ।
अन्यैर्महर्द्धिकैर्यक्षैस्तस्मान्निर्वासितो बलात् ॥९॥

विजेतुमनलम्भूष्णुः, शत्रूनहमिहाऽऽगमम् ।
बहूनां हि विपक्षाणां, शूरोऽप्येकः करोतु किम् ? ॥१०॥

मनश्चाऽत्र न मे स्थास्नु, भूरिभोगाऽभिलाषुकम् ।
सहायौ तद्युवां कृत्वा, यातुमिच्छामि कुत्रचित् ॥११॥

इति यक्षवचः साक्षान्निशम्याऽथ ससम्भ्रमम् ।
कृताऽञ्जली ततो यक्षं, प्रत्येताविदमूचतुः ॥१२॥

सेवकौ स्वो मनुष्याणामप्यावां द्रव्यलोभतः ।
किं पुनर्देवयोनेस्ते वाञ्छिताऽर्थविधायिनः ? ॥१३॥

आवां भृत्यौ भवान् स्वामी, किं न्यूनमियताऽपि नौ ? ।
अमूर्त्तस्य तवाऽऽवाभ्यां, यद्विधेयं तदादिश ॥१४॥

यक्षः प्राह स्वशक्त्याऽहमधिष्ठाय किमप्यहो !? ।
तिष्ठामि यत्र तत्रैव, युवाभ्यां स्थेयमादरात् ॥१५॥

प्रतिपन्ने वचस्याभ्यां, पुरुषीभूय यक्षराट् ।
एताभ्यां सहितो गच्छन्, प्राप श्रीपुरपत्तनम् ॥१६॥

ऊचे यक्षस्ततो यद्भो !, अग्रे नाऽस्ति गतिर्मम ।
बहुभिर्व्यन्तरैरेतत्पुरं व्याप्तं विभागतः ॥१७॥

तदेतन्नगराऽऽसन्ननदीपरिसरे क्वचित् ।
स्थास्यामीति गतस्तत्र, यक्षः पुनरुवाच तौ ॥१८॥

भवन्तौ कुरुतामत्र, वालुकोत्करमुच्चकैः ।
कल्हारपत्रिकाभिश्च, ततः पूजयताममुम् ॥१९॥

कृते ताभ्यां तथा यक्षः, शिक्षामित्येतयोरदात् ।
अहमेनमधिष्ठाय, विधास्ये स्वप्रभावनाम् ॥२०॥

अधिष्ठितो मया चाऽयमाहतोऽप्यम्बुवायुभिः ।
वालुकोत्करः शैलवन्न गतो विशरारुताम् ॥२१॥

मयि प्रत्ययितो लोको, दत्ते यदुपयाचितम् ।
ग्राह्यं सर्वं युवाभ्यां तत्, कार्यो भोगः सदा मम ॥२२॥

शिक्षयित्वेति तौ यक्षोऽथाऽध्यष्ठाद्वालुकोत्करम् ।
यथा तथाऽपि लोकेऽस्मिन्, प्रकाश्यो गुणिभिर्गुणः ॥२३॥

हरिषेणश्रीषेणाभ्यां, ततो लोकस्य पश्यतः ।
स्नपितोऽप्यम्बुनाऽत्यर्थं, नाऽपतद्वालुकोत्करः ॥२४॥

तदाऽऽश्चर्यं समीक्ष्याऽथ, पूर्लोकः कौतुकात्ततः ।
घर्षयन् स्नपयत्येनं, पयस्कुम्भशतैः स्वयम् ॥२५॥

वालुकोत्करतस्तस्माच्चलत्येकोऽपि नो कणः ।
महाप्रभावोऽयमिति, ख्यातोऽभूत् सकले पुरे ॥२६॥

केन केनाऽपि दुःखेन, पीडितः पूर्जनस्ततः ।
उपयाचितान्याचष्ट, यक्षः पूरयति क्षणात् ॥२७॥

पूरितप्रत्ययो लोको, यक्षं प्रत्यतिभाववान् ।
अकारयद्देवगृहं, तद्वालुकोत्करोपरि ॥२८॥

कामिताऽर्थप्राप्तिप्रीतो, दत्ते यत्किञ्चनाऽपि यः ।
हरिषेणश्रीषेणौ तद्गृह्णीतस्तस्य सेवकौ ॥२९॥

पृथक् पृथग् नृणामग्रे, तौ तत्प्रभावमूचतुः ।
प्रसादाज्जीव्यते यस्य, स ख्याप्यो हि विपश्चिता ॥३०॥

जनश्रुत्या ततो ज्ञात्वा, यक्षं साऽतिशयं तु तम् ।
दुर्गबाहुर्नृपस्तत्र, यक्षौकसि समागतम् ॥३१॥

काश्मीराऽम्भोभिरत्यर्थं, स्नपयामास तं नृपः ।
न तैरभेदि स क्वाऽपि, जिनवाक्यैरभव्यवत् ॥३२॥

साऽऽश्चर्यो नृपतिर्वालुकोत्करस्य पुरः स्थितः ।
कृत्वाऽञ्जलिमुवाचैवं, समक्षं सर्वसंसदः ॥३३॥

यदि कोऽपि प्रभावोऽस्ति, भवतस्तत्सुतस्य मे ।
दृढबाहोर्गतस्याऽरिदेशे शुद्धिं समानय ॥३४॥

इति नृपोदिते यक्षो, वालुकोत्करधारणे ।
विधाय यत्नं कमपि, नृपपुत्राऽन्तिकं ययौ ॥३५॥

शुद्धिस्ते ननु नाऽऽयाति, दवीयस्त्वाच्चिरेण तत् ।
श्रीदुर्गबाहुना राज्ञा, महादुःखमुपेयुषा ॥३६॥

अभ्यर्थितस्त्वच्छुद्ध्यर्थं, यक्षोऽहं श्रीपुरादिह ।
समागां नभसा शीघ्रं, दृढबाहो ! नृपोद्वह ! ॥३७॥ [युग्मम्]

ततः स्वशुद्धिलेखं त्वं, साऽभिज्ञानं समर्पय ।
इति नभःस्थयक्षोक्ते, दृढबाहुस्तथाऽकरोत् ॥३८॥

अभिज्ञानास्त्रिकायुक्तं, लेखमानीय तत्क्षणात् ।
तथैवोद्ध्वस्थराज्ञोऽस्य, हस्ते यक्षस्तमक्षिपत् ॥३९॥

राजा पुत्राऽस्त्रिकां दृष्ट्वा, हर्षबाष्पजलोर्म्मिभाग् ।
स्वयमुद्ग्रथ्य तं लेखं, सगद्गदमवाचयत् ॥४०॥

स्वस्ति श्रीपुरपत्तने स्वपितरं नत्वा ब्रुवे कौशलं,
दुर्गाऽन्तःस्थकलिङ्गराजमधुना व्यापाद्य सद्यस्ततः ।
पूज्यप्रेषितदेवताऽर्पितभवच्छुद्धिप्रमोदोत्सुकः,
प्रत्येष्यामि तदत्र निश्चयपराऽभिज्ञानमेषाऽस्त्रिका ॥४१॥

तच्छुद्ध्यानयनात्प्रीतो, राजा साऽन्तःपुरस्ततः ।
विलिप्य पूजयित्वा च, ननाम वालुकोत्करम् ॥४२॥

अमात्यमादिशच्चाऽथ, यद्वालुकोत्करोपरि ।
महद्यक्षगृहं काष्ठमयं कारय सत्वरम् ॥४३॥

एषोऽहं कारयामीति, विज्ञप्ते तेन मन्त्रिणा ।
नत्वा तं नृपतिर्धाम, जगाम मुदितस्ततः ॥४४॥

मन्त्री च कारयामास, काष्ठप्रासादमुच्चकैः ।
निखन्य स्तम्भान्नद्यन्तरचाल्यान् पूरपाथसा ॥४५॥

यक्षवेश्मनि निष्पन्ने, चक्रे प्रेक्षणकस्थितिम् ।
नृपः प्रणम्य तं भुङ्क्तेऽन्येऽप्येवं बहवो जनाः ॥४६॥

हरिषेणश्रीषेणौ च, यक्षस्याऽऽसन्नसेवकौ ।
सत्क्रियेते च लोकेन, तादृक् सेवा न निष्फला ॥४७॥

वर्षाकाले नदीपूरे, समायातेऽपि नैव च ।
पाथसा ह्रियते तस्य, यक्षस्य काष्ठवेश्म तत् ॥४८॥

पूरेऽपि तत्तथाभूतं, दृष्ट्वा लोको विसिष्मिये ।
तदेकदेवतीभूय, तस्य भोगमकारयत् ॥४९॥

अथ दीपोत्सवे प्राप्ते, पुंसा केनाऽपि यक्षराट् ।
पात्रेऽवतारितो रात्रौ, प्रष्टुं किञ्चिन्निजौकसि ॥५०॥

तदैव दैवतो नद्यां, महत्पूरं समागमत् ।
यक्षशून्यं नदीपूरेणाऽऽकृष्टं काष्ठवेश्म तत् ॥५१॥

अन्तःसुप्तहरिषेणश्रीषेणं दीपमण्डितम् ।
स्रोतसा नीयमानं च, समुद्राऽन्तस्तदाऽपतत् ॥५२॥

सरित्पतिपयस्यस्मिंस्तरति यक्षवेश्मनि ।
समुद्रगर्जितध्वानैर्जजागाराऽनुजस्ततः ॥५३॥

श्रीषेणस्तत उत्थाय, वेश्मनोऽस्मादगाद्बहिः ।
अपश्यच्च ससम्भ्रान्तो, जलाऽद्वैतं हि सर्वतः ॥५४॥

कुर्वाणैः किं महावृष्टिं पाथोदैः पूरिता मही ? ।
अकालोच्छृङ्खलोदन्वन्नीरैः किं प्लावितं जगत् ? ॥५५॥

अहहा !!! नगरी सैषा, मग्नाऽत्र दृश्यतेऽपि न ।
स यक्षाऽऽराधको भूपो, मृत्युमाप्तो भविष्यति ॥५६॥

धिग् धिग् यक्षमिमं येन, रक्षता मन्दिरं निजम् ।
यः स्वाऽऽत्माऽऽराधको भूपो, पूर्लोको रक्षितोऽपि न ॥५७॥

इति चिन्तयति भ्रान्ते, श्रीषेणे भयमीयुषि ।
भूमाविव चलन्नप्सु पुमानेकः समाययौ ॥५८॥

अस्माकं यक्षतोऽप्येष, सप्रभावः पुमानहो ! ।
चलत्यम्भसि यः पद्भ्यां, ध्यात्वेत्यूचे स तं नरम् ॥५९॥

अहो ! कस्त्वं ? महाभाग !, शक्तिर्यस्येयमीदृशी ।
समीहसे क्व वा गन्तुं ?, त्वरा यस्येयमीदृशी ॥६०॥

अथ श्रीषेणमूचे स, भूरिश्वासभृताऽऽननः ।
नालम्भूष्णुरहं तुभ्यमिदानीं दातुमुत्तरम् ॥६१॥

तथाऽपि किमपि ब्रूहीत्युक्तः श्रीषेणमाह सः ।
रत्नद्वीपं व्रजन्नस्मि, कार्यं यत्तत्र तच्छृणु ॥६२॥

तस्मिन् द्वीपे समस्त्येका, देवी राज्यप्रदाऽभिधा ।
तत्पुरोऽस्ति महाकुण्डं, तापितत्रपुसम्भृतम् ॥६३॥

दीपोत्सवनिशायां च, स्नायात् कुण्डेऽत्र यो नरः ।
तस्य तुष्टा महाराज्यं, दत्ते सा देवता खलु ॥६४॥

इति कल्पप्रमाणेन, द्वीपं यास्याम्यहं ततः ।
औषधाऽऽलेपमाहात्म्यात्, पद्भ्यां यामि जले द्रुतम् ॥६५॥

श्रीषेणश्च निशम्येति, गच्छतस्तस्य कारणम् ।
स्वयञ्च कृतराज्येच्छः, पुनरूचे स तं नरम् ॥६६॥

आगन्तव्यं कदा तस्मात् ?, सोऽवोचदधुनैव हि ।
न चिरं लभ्यते स्थातुं, तत्र स्त्रीसङ्कुले नरैः ॥६७॥

यक्षं प्रति विरक्तः सन्, श्रीषेणः प्रत्यभाषत ।
दत्से लेपौषधं चेन्मे, तदा यामि त्वया सह ॥६८॥

स प्राह प्रार्थनादैन्यं, सुप्रापे किमियत्यपि ? ।
गृहाणैतां त्वमप्येहि, राज्याऽऽस्तौ कुरु साहसम् ॥६९॥

इति तेनाऽऽर्पितौषध्या, विलिप्य स निजक्रमौ ।
मुक्त्वा स्वं भ्रातरं सुप्तं, तेन सार्धं चचाल च ॥७०॥

औषधप्रभावात्तौ तु, जङ्घालावप्सु गामुकौ ।
रत्नद्वीपं क्षणादेव, प्रापतुः पक्षिणाविव ॥७१॥

अथोत्सर्पत्प्रभाभारकीर्णरत्नमरीचिभिः ।
दूराऽपास्ततमःस्तोमकृतप्राकारविभ्रमे ॥७२॥

स्वच्छमुक्तामणिश्रेणिगुच्छग्रथितदामनि ।
शातकुम्भमहास्तम्भमूर्द्धन्याबद्धतोरणे ॥७३॥

कृतकुट्टिमनीलाऽश्मपयःसंशयशालिनि ।
परितो विस्फुरद्धेममत्तवारणपालिनि ॥७४॥

स्वयं चन्द्राऽश्ममयत्वात्फेनसब्रह्मचारिणि ।
मसृणमणिसोपानरोहत्पतत्पुरन्ध्रिणि ॥७५॥

पाञ्चालीदीपिकाहस्तन्यस्तमाणिक्यभासुरे ।
वेश्मन्येवंविधे देव्यास्तौ द्राग् विविशतुस्ततः ॥७६॥ [पञ्चभिः कुलकम्]

तन्मूर्त्तेश्च पुरः कुर्वन्, सङ्गीतं मधुरध्वनि ।
अतिश्रीरूपलावण्यं, स्त्रीवृन्दं तावपश्यताम् ॥७७॥

अथाऽऽयातौ च नेदीयः स्त्रीवृन्दस्य प्रगायतः ।
विस्मृताऽपरकर्तव्यौ, स्तम्भिताविव तस्थतुः ॥७८॥

गायन्त्यां क्षणं नर्त्तक्यां, क्षणं वीणाऽऽकृतिक्षणम् ।
भ्रान्त्वा श्रान्तेव तदृष्टिर्निर्निमेषत्वमाश्रयत् ॥७९॥

आसन्नस्तम्भाऽवष्टम्भाऽचलत्सर्वाङ्गधारिणौ ।
रेजाते तौ कटाक्षैः स्वैरेताभिः कीलिताविव ॥८०॥

कर्णपालीविशद्गीतिपीयूषवृष्टिजाड्यभाक् ।
तन्मनोहृत्कुटीकोणे, निलीयाऽस्थादचेतनम् ॥८१॥

तयोर्निश्चेष्टयोरेवं, सुखमूर्च्छामिवेयुषोः ।
गीतग्रहिलतां द्रष्टुमिवाऽऽशु प्रोदगाद्रविः ॥८२॥

उदितश्च सहस्रांशुस्तिरोभूताश्च योषितः ।
गीताऽनुरणनभ्रान्त्या, तस्थतुस्तौ तथैव तु ॥८३॥

अर्केणोत्थापनायैव, गाढं स्पृष्टौ करैर्निजैः ।
निद्रामिव समुज्झन्तौ, रङ्गे चिक्षिपतुर्दृशौ ॥८४॥

न यावत्पश्यतस्तासां, मध्ये ह्येकामपि स्त्रियम् ।
ततः सस्मरतुः स्वार्थं, जातजातिस्मृती इव ॥८५॥

विलोक्योदितमादित्यं, सम्भ्रान्तावभिदेवताम् ।
चलितौ पश्यतो द्वारं, पिहितं निजपुण्यवत् ॥८६॥

अहहा !!! किमभूदेतद्गीतमोहितचेतसोः ।
दूरे राज्यश्रियो देव्या, न नौ दर्शनमप्यभूत् ॥८७॥

धिग् धिग् व्यसनिनावावां, कृत्वा कष्टमिहाऽऽगतौ ।
न चाऽभूत् फलनिष्पत्तिर्व्यसनं हि न सिद्धये ॥८८॥

सहस्तघर्षमित्युक्ते, पुरुषेणाऽवरेण हि ।
वृद्धा काचित्समायासीद्वदन्ती यात यात रे ! ॥८९॥

नत्वैनां पुरुषोऽप्राक्षीत्, किं निर्वास्यावहे त्वया ? ।
साऽख्यत् सकम्पमत्राऽर्थे, वत्साऽऽस्ते महती कथा ॥९०॥

कथामेतामथाऽऽख्यातुमिदानीमस्मि कातरा ।
अन्तरुत्तिष्ठदातङ्कनष्टाऽमृतकलाऽऽनना ॥९१॥

श्रीषेणः प्राह मा भैषीर्बूहि त्वमकुतोभया ।
यत्तवाऽऽतङ्ककर्तारं, मत्खड्गः शिक्षयिष्यति ॥९२॥

सावज्ञं प्राह सेदानीमेतस्मात्कुटिलाद्विलात् ।
दृष्टिविषो महासर्पो, निर्गन्ता यमखड्गवत् ॥९३॥

यद्वस्तु सम्मुखं तस्य, सजीवं मानुषाऽऽदिकम् ।
तद्दृष्टिरश्मिभिः स्पृष्टं, भस्मीभवति तत्क्षणात् ॥९४॥

कुतोऽप्यासादितवरो, देवताभिर्न मार्यते ।
किन्त्वैतिह्यमिदं मर्त्यैः, प्रेष्योऽयं यममन्दिरम् ॥९५॥

किञ्चाऽत्रैनमजानन्त्यो, वसन्त्यः केवलाः स्त्रियः ।
बह्व्यो भस्मीकृताः क्रूरेणाऽनेन विषचक्षुषा ॥९६॥

ततो यातं युवां क्वाऽपि, सापायाद्देवतौकसः ।
अहं च वसुधाऽन्तःस्थं, यामि स्वं वेश्म भीतिभाक् ॥९७॥

श्रीषेणः पुनरूचे तां, मातरेकं वचः शृणु ।
एताः कथय कुत्रत्याः, सङ्गीतककृतः स्त्रियः ? ॥९८॥

सत्वरं प्राह सा वत्स !, सर्वास्ता राजकन्यकाः ।
दीपोत्सवे दीपोत्सवे, रात्रावायान्ति नन्विह ॥९९॥

कृत्वा ता देवतायाश्च, स्नानपूजाऽऽदिकं स्वयम् ।
सङ्गीतेनाऽऽराधयन्त्यो, जाग्रत्येतां निशामिह ॥१००॥

श्रीषेणः प्राह किं तासां, देव्याराधनकारणम् ? ।
ऊचे वृद्धा प्रतिज्ञातमेताभिरिदमात्मना ॥१०१॥

यो हि दृष्टिविषं सर्पमेनं हत्वा तदैव हि ।
देवीमूर्त्तिपुरःस्थेऽत्र, कुण्डे स्नास्यति तापिते ॥१०२॥

स एव साहसाऽऽवासो, नरोऽस्मान् परिणेष्यति ।
इत्याप्तयौवनाश्चाऽपि, न वृण्वन्ति नराऽन्तरम् ॥१०३॥

ततोऽस्मिन् पन्नगे सर्वं, भस्मीकृत्य निवर्त्तिनि ।
तन्माहात्म्याऽहिताऽऽतङ्का, तिरोभवति देव्यपि ॥१०४॥

विधातुं भस्मसात् सर्वं, स्थित्वा मासान् दशेह सः ।
आस्ते द्विमासीं योगस्थो, बिलस्याऽन्तः प्रविश्य हि ॥१०५॥

ततः स्थानममत्वेन, देवी राज्यप्रदा पुनः ।
शक्त्या निर्मापयत्येव, पुरं तरुविराजितम् ॥१०६॥

इति कथयन्त्यां तस्यां, बिलाज्ज्योतिरजृम्भत ।
सोऽयं सर्पः समेतीति, भीता वृद्धा ननाश सा ॥१०७॥

ततश्च पुरुषोऽप्येष, कम्पमानमनस्तनुः ।
एह्येहि क्वाऽपि नश्यावो, वदन्नित्यन्वगाच्च ताम् ॥१०८॥

श्रीषेणश्च ततो राज्यस्त्रीलुब्धत्वादपेतभीः ।
खड्गमाकृष्य स्तम्भस्याऽन्तरेऽस्थादतिनिश्चलः ॥१०९॥

ततः फूत्कारवात्याभिरुत्क्षिपन्तीव मन्दिरम् ।
निस्ससार फणाऽऽभारचण्डा तुण्डी बिलादहिः ॥११०॥

चतुरङ्गुलमानां तां, निःसृतां वीक्ष्य हर्षतः ।
श्रीषेणः स्वकृपाणेन, चिच्छेदोरगतुण्डिकाम् ॥१११॥

स्वेनाऽथाऽपावृते देवीद्वारात् कपाटसम्पुटे ।
सोऽपश्यदुरगोच्छेदहृष्टाऽऽस्यामिव देवताम् ॥११२॥

तन्मूर्त्तेः पुरतश्चैकं, वीक्ष्य कुण्डं यथाश्रुतम् ।
नमस्कृत्य स तां देवीं, बद्ध्वाऽञ्जलिर्व्यजिज्ञपत् ॥११३॥

देवि ! दीपोत्सवं यावन्नाऽस्म्यलं स्थातुमत्र तत् ।
मयि प्रसीद मन्यस्वाऽद्यैव तद्दिनयामिनीम् ॥११४॥

इत्युक्त्वा सहसा तस्मिन्, कुण्डे झम्पामदादसौ ।
तसं त्रपु बभूवाऽथ, क्षणात्पीयूषसोदरम् ॥११५॥

महासत्त्व ! वृणीष्व द्विर्यत्ते मनसि रोचते ।
भाषमाणेति सन्तुष्टा, प्रत्यक्षा देवताऽभवत् ॥११६॥

श्रीषेणस्तु प्रसन्नां तां, वीक्ष्योपकृतिलम्पटः ।
एकेन हि वरेणाऽयं, ययाचे रचिताऽञ्जलिः ॥११७॥

देवि ! श्रीपुरवास्तव्यः, पौरलोकः स भूपतिः ।
पूरेण प्लावितो नद्याः, पुनः स जीवतादिति ॥११८॥

देवताऽथ विभङ्गेन, ज्ञानेन तद्विजानती ।
प्राह हंहो !! धीरोत्तंस !, स्वयं तत्राऽस्ति कौशलम् ॥११९॥

तद्वृणीष्व परं किञ्चिद्वराभ्यां सत्त्वमन्दिर ! ।
तवोपकारसत्त्वाभ्यां, तुष्टाऽस्मि दातुमुद्यता ॥१२०॥

श्रीषेणोऽथ विमृश्यैकवरेण सोऽवृणोदिति ।
सङ्गीतकामिनीयुक्तं, महत्साम्राज्यमस्तु मे ॥१२१॥

दुःसाध्ये क्वाऽपि कार्ये त्वां, यदा देवि ! स्मराम्यहम् ।
आगच्छेस्त्वं तदा क्षिप्रमित्यस्तु मेऽपरो वरः ॥१२२॥ [युग्मम्]

एवमस्त्विति मत्वा सा, तिरोभूताऽथ देवता ।
श्रीषेणोऽपि च तन्मूर्त्तिं, प्रणम्य निरगाद्बहिः ॥१२३॥

क्व मे सखाऽयं सम्भाव्यः ?, श्रीषेणश्चिन्तयन्निति ।
बभ्राम परितस्तत्र, कुर्वन् शब्दं च तं प्रति ॥१२४॥

कुतश्चिदपि नाऽयासीत्, स पुरुषो गताऽसुवत् ।
हहा ! क्वाऽयमिति ध्यात्वा, सैष खड्गसखोऽचलत् ॥१२५॥

विना तामौषधीं क्लीबः, श्रीषेणो गन्तुमम्भसि ।
निकषाऽब्धितीरं काञ्चिद्दिशमुद्दिश्य जग्मिवान् ॥१२६॥

देव्याऽपि हि दुरुच्छेदं, सर्पं हत्वा वृतो वरः ।
त्यक्तस्वभ्रातृशुश्रूषं, न मां सुखीकरोत्यसौ ॥१२७॥

इत्यन्तःखेदमापन्नः, श्रीषेणस्त्वरितं व्रजन् ।
ददर्श लहरीलोलं, विदूरे यक्षवेश्म तत् ॥१२८॥

यानपात्रमिदं किञ्चिदायाति मम सम्मुखम् ।
तत्प्रतिपालयाम्येतदित्यस्थादूर्ध्व एव सः ॥१२९॥

क्रमेण घूर्णमानं च, भूताऽधिष्ठितपात्रवत् ।
तीराऽभ्यर्णमथ प्राप्तमुपालक्षयदेष तत् ॥१३०॥

कथमेतत्तदेवाऽस्मद्यक्षस्य काष्ठमन्दिरम् ।
इति सम्यक् समीक्ष्यैष, तदारुरोह वेगतः ॥१३१॥

प्रविष्टोऽन्तश्च नैक्षिष्ट, ज्यायांसं भ्रातरन् निजम् ।
न वालुकोत्करं किन्तु, द्वारोत्कीर्णाऽक्षराऽऽवलीम् ॥१३२॥

पूरेणाऽम्भोधिनिक्षिप्तयक्षवेश्मनि वीक्षितः ।
सांयात्रिकैस्ततो नीत्वा, मुक्तस्तीरेऽस्म्युदन्वतः ॥१३३॥

वाचयित्वेति सोऽत्यर्थं, बाष्पप्लावितचक्षुषा ।
ज्येष्ठभ्रातृवियोगाऽऽर्त्तश्चिन्तयामास चेतसि ॥१३४॥

अहो ! दुरात्मना तेन, यक्षेणेदमरक्षितम् ।
न्यपतदर्णवे मे तु, भ्राता दुःखाऽर्णवे हहा !! ॥१३५॥

धिग् धिग् मामपि येन स्वस्त्यक्तः सुप्तोऽयमग्रजः ।
बान्धवैर्हि सनाथानामपि दुःखं सुखायते ॥१३६॥

तद्यामि क्वाऽपि पश्यामि, चेत्पुनर्भ्रातरं निजम् ।
स्त्रीत्वमारोपयेत्पुंसो, विधुरे परिदेवनम् ॥१३७॥

अथोत्तीर्य ततः काष्ठमन्दिराद्वर्त्मनि स्थितः ।
क्रमेण सिंहलद्वीपे, रङ्गशालां पुरीमगात् ॥१३८॥

नराश्चतुर्दिगायातास्तेनाऽभिज्ञानपूर्वकम् ।
पृष्टा नाऽख्यन् भ्रातृशुद्धिं, ततः कुत्राऽप्युवास सः ॥१३९॥

अथ दासीद्वयं तत्र, विजनमित्युपेत्य तत् ।
मिथः पृष्ट्वा सुखदुःखवार्त्तामेकाऽथ पृच्छति ॥१४०॥

एतावन्ति दिनान्यासां, नियमाऽऽराधनस्पृशाम् ।
किमद्याऽपि न सन्तुष्य, दत्ते देवीप्सितं वरम् ? ॥१४१॥

द्वितीयाऽऽह कुमारीणां, प्रतिज्ञाभररञ्जिता ।
ददौ राज्यप्रदा देवी, वरं न्यक्कृतमन्मथम् ॥१४२॥

श्रुत्वा राजप्रदेत्याख्यां, श्रीषेणो निभृतं ततः ।
तद्वार्तायामदात् कर्णौ, विशेषात्तमसि स्थितः ॥१४३॥

हृष्टाऽथ प्रथमाऽपृच्छत्, कोऽसौ कोऽसौ वरः सखि !? ।
द्वितीयः प्राह नाऽस्माभिः, स सम्यगुपलक्षितः ॥१४४॥

किन्तु देव्या कुमारीणामादिष्टं यद्भवत्पिता ।
येन घानिष्यते सोऽयं, युष्माकं भविता पतिः ॥१४५॥

देवीप्रसादमित्येताः, प्रतीष्यैवाऽऽगमन्निह ।
हस्त्यश्वादिबलं सर्वमुपायेनाऽऽत्मसाद् व्यधुः ॥१४६॥

देवतावाक् प्रमाणेन, कुतश्चिदपि कोऽपि हि ।
एत्यधुना नृपं हत्वा, राज्यमेतद्ग्रहीष्यति ॥१४७॥

अथोचे प्रथमा नैव, शक्यो मारयितुं खलु ।
विना हस्त्यादिसेनां स, शूरेणाऽपि हि भूपतिः ॥१४८॥

द्वितीयोचे न जानासि, राजा स्त्रीलम्पटो ह्यसौ ।
निशायामेककः पुर्यां, परिभ्राम्यति सर्वतः ॥१४९॥

किञ्च दृष्टिविषं सर्पं, यो हि व्यापाद्य तत्क्षणात् ।
तपत्रपुणि कुण्डेऽस्नात्तस्याऽसाध्यं हि किं सखि !? ॥१५०॥

तदेहि समयस्तस्येदानीमागमनाय यत् ।
किञ्चाऽन्धकारपटकं, प्रावृत्याऽभ्येति भूपतिः ॥१५१॥

सम्भाव्यमधुना किञ्चिन्नूनमेकाकिभूपतेः ।
मा च पश्यत्वसावावामित्युक्त्वा जग्मतुश्च ते ॥१५२॥

श्रीषेणस्तु स्ववृत्तान्तमाकर्ण्याऽऽनन्दमावहन् ।
नृपं चाऽऽसन्नमालोक्य, निपत्याऽस्थात् क्षणं भुवि ॥१५३॥

राजा च विगताऽऽशङ्को, ययौ तदन्तिकाऽध्वना ।
श्रीषेणोऽथ समुत्थाय, दूरस्थो नृपमन्वगात् ॥१५४॥

दैवेनाऽन्धीकृत इवाऽपश्यंस्तं पृष्ठगं नृपः ।
पुरा सङ्केतितैर्द्वास्थैरनुक्तः सौधमाविशत् ॥१५५॥

नृपाऽऽसन्नचरो भावी, नूनमेष पुमानिति ।
श्रीषेणोऽपि ह्यनुक्तस्तैर्भूपमन्वविशत्ततः ॥१५६॥

गृहाण शस्त्रं भो ! राजन्नेष नो भवसि ध्रुवम् ।
श्रीषेणोऽथ ब्रुवन्नेवं, शिरश्चिच्छेद भूपतेः ॥१५७॥

जय त्वं कुरु राज्यं त्वं, कुमारीणां पतिर्भव ।
इति लोकस्य प्रत्यक्षमन्तरिक्षे वचोऽभवत् ॥१५८॥

दैवतं तद्वचः श्रुत्वा, कुमार्यः सपरिच्छदाः ।
निवारयन्त्यस्तुमुलं, समीयुः खेदहर्षतः ॥१५९॥

ततः स्वयंवरमालां, कण्ठपीठेऽस्य चिक्षिपुः ।
राज्यश्रिय इवैतास्तु, पुलकाङ्कुरमेदुराः ॥१६०॥

तदैवाऽऽकारयामासुरमात्यप्रभृतीनिमाः ।
तैर्ज्ञातस्वरूपै राज्ये, श्रीषेणोऽस्थाप्यत स्वयम् ॥१६१॥

योऽत्र राजा भवेत्तस्य, नाम स्यात्तु सरित्सुतः ।
श्रीषेणमिति विज्ञप्याऽस्थापयंस्तस्य नाम तत् ॥१६२॥

सरित्पुत्रस्ततः प्रातरुदयाऽचलमर्कवत् ।
सिंहासनमलंकृत्याऽऽज्ञापयामास पूर्जनम् ॥१६३॥

आज्ञापयति वः पौरा !, राजाऽयं सरितःसुतः ।
राज्याऽऽसिमङ्गले यूयं, पूःशोभां कुरुत द्रुतम् ॥१६४॥

ततो नगरशोभायां, कृतायामथ भूपतिः ।
पट्टकुञ्जरमारूढः, सोऽकार्षीद्राजपाटिकाम् ॥१६५॥

अथाऽसौ प्रधाने लग्ने, सर्वास्ता राजपुत्रिकाः ।
चित्तेन परिणीताः प्रागुपयेमे पुनर्नृपः ॥१६६॥

रममाणः समं ताभिस्ताराभिरिव चन्द्रमाः ।
शक्रवन्न्यायवानेष, प्रजाः पाति सरित्सुतः ॥१६७॥

व्यग्रः समग्रराजन्योत्थापनस्थापनादिभिः ।
सर्वथा भ्रातरं ज्येष्ठं, विसस्मार सरित्सुतः ॥१६८॥

अथ सांयात्रिकाः केचित्, प्रभूताऽर्जितभूतयः ।
रत्नस्थालयुतं खड्गमुपानिन्युर्महीपतेः ॥१६९॥

शस्त्रप्रियत्वाद्राजाऽपि, खड्गमादाय वेगतः ।
आचकर्ष प्रतीकारं, वीक्षितुं तस्य सारताम् ॥१७०॥

हरिषेणस्य मद्भ्रातुरयमित्युपलक्ष्य तं ।
युष्माभिरवाप्तः क्वाऽसौ, राजा तानब्रवीदिति ? ॥१७१॥

कम्पमानशरीरास्ते, प्रोचुः प्रस्खलिताऽक्षरम् ।
नृपाऽस्माभिर्गुरुप्रायैर्मज्जन् भव इवाऽम्बुधौ ॥१७२॥

पोतेनोपदशेनेव, तत्पारं प्रापितः पुमान् ।
ततोऽस्माकं कृतज्ञेन, तेनाऽयमातरीकृतः ॥१७३॥ [युग्मम्]

सम्भ्रमात्प्राह भूपोऽपि, गतः क्वाऽसौ ततः परम् ? ।
ते कृताऽञ्जलयोऽथाऽऽख्यन्, न विद्मोऽतः परां कथाम् ॥१७४॥

ततः सरित्सुतो राजा, सत्कृत्य वणिजः स्वयम् ।
हरिषेणस्य शुद्ध्यर्थं, प्राहिणोत् सर्वतो नरान् ॥१७५॥

स्वयं चाऽपि तमन्वेष्टुमुत्सुकायितमानसः ।
मन्यते निगडप्रायं, राज्यं तत्तादृशं नृपः ॥१७६॥

मिलिते भ्रातरि ज्येष्ठे, विधास्ये राजपाटिकाम् ।
द्विर्भोक्ष्ये च सरित्पुत्रो, राजा प्रत्यशृणोदिति ॥१७७॥

इतश्च हरिषेणोऽपि, समुत्तीर्णः सरित्पतेः ।
श्रीषेणं क्वाऽपि वीक्ष्येऽहं, बभ्रामेति चतुर्दिशम् ॥१७८॥

अन्यदा ग्रीष्मसमये, प्रपायां क्वाऽपि सोऽध्वनि ।
सर्पपीतचरं पाथः, पपौ तृष्णाकरालितः ॥१७९॥

पीतेन पाथसा तेन, घूर्णमानोऽधिकाऽधिकम् ।
निद्रायमाणश्छायायां, वटस्याऽधस्तलेऽस्वपीत् ॥१८०॥

हरिद्रावर्णतां भेजे, वपुस्तस्य क्षणादपि ।
लहरीपरितः सोऽभूदचैतन्यवशंवदः ॥१८१॥

ततो वटतलच्छिद्रमध्यादेको महोरगः ।
निःसृत्य तन्मुखं वीक्ष्य, नाभिदेशं निपीड्य च ॥१८२॥

जीवतीति च विज्ञायाऽह्वायाऽऽनीय स औषधीम् ।
अमुचन्नाभिदेशेऽस्य, फूच्चकार च तत्र ताम् ॥१८३॥ [युग्मम्]

तस्य फूत्कारवातेनौषधीसंस्पर्शशालिना ।
परिगतेन देहाऽन्तरुत्तस्थावेष तत्क्षणात् ॥१८४॥

उत्थितो हरिषेणश्च, वीक्षाञ्चक्रे महोरगम् ।
नाभिक्षिप्तौषधीदत्तफूत्कुर्वच्चण्डतुण्डिकम् ॥१८५॥

अथ तं वीक्ष्य सर्पोऽपि, शङ्कातरलचक्षुषम् ।
भूत्वा विद्याधरः सोऽहिस्त्राता तेऽस्म्यब्रवीदिति ॥१८६॥

पयःपानादभूदेवमिति जानन्नसौ स्वयम् ।
हरिषेणः पुनः सर्पीभूतं तमूचिवानिति ॥१८७॥

तवोपकारिणः शङ्का, नागराज ! ममाऽस्ति न ।
विषमूर्च्छा निवृत्ता मे, कस्मादिति ? तु सम्भ्रमः ॥१८८॥

भुजङ्गः प्रत्यभाषिष्ट, दृष्ट्वा त्वां विषमूर्च्छितम् ।
कारुण्यादनयौषध्योदस्थापयमहं ततः ॥१८९॥

हरिषेणस्तमाचष्ट, किं करोमि प्रियं तव ? ।
प्रत्यूचेऽहिरलम्भूष्णुर्न कर्तुं कोऽपि मत्प्रियम् ॥१९०॥

तथाऽपि कथयाऽऽश्वेवं, हरिषेणोदिते ततः ।
स प्राह मत्पिता दृष्टिविषाऽख्यो निजविद्यया ॥१९१॥

सर्पीभूयाऽथ सर्वत्र, क्रीडन् व्यापादितश्छलात् ।
सिंहलद्वीपभूपेनाऽनुकृताऽन्तिकमूर्तिना ॥१९२॥ [युग्मम्]

पुण्याऽऽढ्यं तं निहन्तुं तु, कथञ्चनाऽपि नाऽस्म्यलम् ।
ततोऽशक्यप्रतीकारं, पितृवैरं दुनोति माम् ॥१९३॥

क्व कथं त्वत्पिता तेनाऽघानीति प्रश्नितेऽमुना ? ।
प्राहाऽहिर्मत्पितुर्मैत्र्यमासीच्छेषाऽहिना सह ॥१९४॥

अन्यदा स्मितवक्त्रं तं, वीक्ष्य पप्रच्छ मत्पिता ।
हास्ये को हेतुराहैष, हा ! कीदृग् भवितव्यता ? ॥१९५॥

दृष्ट्या दग्धुं जगच्छक्तस्त्वमित्थं सर्परूपधृत् ।
राज्यप्रदायाः प्रासादे, नरेण तु हनिष्यसे ॥१९६॥

श्रुत्वेति मत्पिता दृष्ट्याऽधाक्षीद्राज्यप्रदां पुरीम् ।
अन्यदा निःसरन् भूमेः, सर्पीभूतो हतोऽमुना ॥१९७॥

इति निशम्य प्रत्युपकारचिकीः प्रमोदभाक् ।
हरिषेणोऽब्रवीदल्पे, कर्तव्येऽस्मिन्विषीद मा ॥१९८॥

महानाग ! मया सैष, पितृवैरी तव ध्रुवम् ।
व्यापाद्यः किन्तु दूरत्वात्तत्राऽहं गन्तुमक्षमः ॥१९९॥

अहिः प्राह यदि त्वं मे, सत्यं प्रत्युपकारकः ।
ततस्त्वां तत्र नेष्यामि, नेदीयसा पथा खलु ॥२००॥

वचस्यङ्गीकृतेऽमुष्मिन्, हरिषेणस्ततोऽहिना ।
सिंहलद्वीपगामिन्यां, सुरङ्गायामनीयत ॥२०१॥

अग्रेऽहिः पृष्ठतः सैष, हरिषेणः सुरङ्गया ।
स्वल्पैरेव दिनैर्द्वीपं, सिंहलं प्रापतुश्च तौ ॥२०२॥

गत्वा च रङ्गशालायां, बहिःस्थे वटभूरुहि ।
क्षणं विश्रम्य तं प्रोचे, हरिषेणो भुजङ्गमम् ॥२०३॥

नागराज ! त्वमेतं हि, वटकोटरमाश्रय ।
प्रविश्याऽहं पुरीं राज्ञो, घातोपायान् विलोकये ॥२०४॥

राज्ञो व्यापादनं श्रुत्वा, गच्छेस्त्वं स्थानमात्मनः ।
दैवात्तु मारिते राज्ञि, ममाऽप्यस्ति न जीवितम् ॥२०५॥

एवमस्त्वितिसर्पोक्ते, हरिषेणोऽविशत् पुरीम् ।
स द्यूतक्रीडया स्वस्य, प्राणवृत्तिं करोत्यथ ॥२०६॥

प्रत्यहं वीक्ष्यते चैष, घातोपायान् महीपतेः ।
न च प्राप स्थलं किञ्चिद्राज्ञो मृत्युर्भवेद्यतः ॥२०७॥

ततो दध्यौ मनस्येष, हहा !! मे वचनक्षतिः ।
अहेरग्रे प्रतिज्ञातं, करोम्यद्याऽपि नैव यत् ॥२०८॥

दिनानामियतां मध्ये, मया दृष्टोऽपि नो नृपः ।
नैष याति बहिर्नाऽहं, गन्तुमीशस्तदन्तिकम् ॥२०९॥ [युग्मम्]

अथाऽन्यदा नृपाऽऽसन्नचरीं दासीं स कामपि ।
तवाऽहं कामुकोऽस्मीति, प्रेम्णेवोपचचार ताम् ॥२१०॥

पत्रकुङ्कुमवस्त्राऽदि, मायया तस्य यच्छतः ।
पत्नीत्वमभजद्दासी, दानार्त्तिं न भवत्यहो !? ॥२११॥

गच्छन्तीं नित्यशो राजवेश्मन्यस्खलितामिमाम् ।
हरिषेणोऽन्यदेकाऽन्ते, सकौतुकमिवाऽवदत् ॥२१२॥

अपूर्वत्वान्नृपं द्रष्टुं, प्रियेऽस्ति मम कौतुकम् ।
तत्त्वं केनाऽप्युपायेन, मम दर्शय भूपतिम् ॥२१३॥

दास्यूचे तमुपायोऽस्ति, साधुर्भूपतिदर्शने ।
यास्यत्यद्यैव सन्ध्यायां, नद्यां साऽन्तःपुरो नृपः ॥२१४॥

तत्र स्नात्वा सचेलं च, सरित्तीरस्थितां श्रियम् ।
प्रणंस्यति नृपो राज्ञी, चाऽऽवृतनव्यवाससौ ॥२१५॥

न कोऽपि हि पुमांस्तत्र, प्रवेशं लप्स्यते प्रिय ! ।
अतस्त्वं कृतस्त्रीवेषश्चल तत्र मया सह ॥२१६॥

हरिषेणस्ततः प्राह, किमर्थं सैष भूपतिः ? ।
महाशीते पतत्यस्मिन्, सचेलं स्नाति निश्चयात् ॥२१७॥

भुजिष्याऽख्यन्न चेद्वर्षं, प्रत्यत्र स्नाति यो नृपः ।
माघमासाऽष्टमीरात्रौ, घातकेन स मार्यते ॥२१८॥

अहंयुत्वादविहितस्नानस्त्वग्रेतनो नृपः ।
अनेन प्रहतो राज्ञा, स्वयं राज्यमलङ्कृतम् ॥२१९॥

ततः प्रत्ययितो राजा, स्नात्येवैष स्थिते दिने ।
शूरा अपि पुमांसो यद्देवतां प्रति कातराः ॥२२०॥

अथाऽसौ सभयो दध्यौ, हरिषेणः कथं नृपः ।
यथाविधिकृतस्नानो, घातकेन न मार्यते ॥२२१॥

साऽवष्टम्भं पुनर्दध्यौ, दृष्टश्चेच्चक्षुषा नृपः ।
तदा दैवमपि क्लीबं, मत्तस्तं रक्षितुं खलु ॥२२२॥

साधूपायस्त्वयाऽदर्शि, प्रिये ! भूपतिदर्शने ।
सन्ध्यायामद्य मे तन्वि ! पूर्णीभवतु कौतुकम् ॥२२३॥

ततः साऽन्तःपुरे राज्ञि, सरित्तीर्थमुपेयुषि ।
स्त्रीवेषहरिषेणेन, युक्ताऽगात्तत्र दास्यपि ॥२२४॥

हरिषेणोऽपि गूढं च, कटीनिक्षिप्तशस्त्रिकः ।
गत्याऽथ वचसा स्त्रीवद्दासीपृष्ठगतोऽभ्रमत् ॥२२५॥

अथाऽङ्गरक्षका दूरे, चिक्षिपुः पुरुषव्रजम् ।
स्वयं चाऽस्थुर्दवीयांसस्ततो देवीयुतो नृपः ॥२२६॥

अस्राद्राज्यकृताऽऽचारपरतन्त्रः सरिज्जले ।
देवतां च नमस्कर्त्तुं, प्राविक्षद्देवतौकसि ॥२२७॥ [युग्मम्]

पुरैव देवीवेश्माऽन्तःप्रविष्टेन दुरात्मना ।
दासीति राज्ञाऽनुक्तेन, हरिषेणेन दुर्धिया ॥२२८॥

देवीं प्रत्यानतमूर्द्ध्नो, राज्ञः प्रविशतस्ततः ।
भ्रातेत्यजानताऽमोचि, प्रहारः कन्धरां प्रति ॥२२९॥ [युग्मम्]

राज्ञः पुण्यात्प्रहारोऽस्य, प्रास्खलद्द्वारदारुणि ।
राजा च तत्क्षणादेव, व्याघुट्याऽऽगाद्भयाद्बहिः ॥२३०॥

ततोऽन्तःपुरनारीणामभूत्कोलाहलो महान् ।
दधावुश्चाऽङ्गरक्षाऽऽद्याः, प्रोद्दीर्णतरुवारयः ॥२३१॥

स्त्रीत्वादियमवध्या मे, निर्वास्या किन्तु मत्पुरात् ।
अधुनैवेति सचिवमादिश्याऽगाद्गृहं नृपः ॥२३२॥

ततः समादिशन्मन्त्री, सौनिकं कालपाशिकम् ।
व्यङ्गीकृत्य पुरादेनां, स्त्रियं निर्वासयाऽधुना ॥२३३॥

सौनिकोऽप्यथ तां धृत्वा, गत्वा धाम निजं ततः ।
अचिन्तयदहो ! साधु, मयाऽऽसा समयेऽङ्गना ॥२३४॥

यतोऽधुनाऽवतीर्णस्य, वने नाऽतिदवीयसि ।
पूजा स्त्रीकर्णनासौष्ठैर्यक्षस्य मानिता मया ॥२३५॥

तदेनामधुनैवाऽहं, नीत्वा यक्षस्य वेश्मनि ।
एतत्कर्णाऽऽदिकैः कुर्वे, पूजां तस्य स्वयं मुदा ॥२३६॥

ध्यात्वेति सौनिकोऽथाऽऽत्मवर्ग्यानाहूय सादरम् ।
द्वाभ्यां पुम्भ्यां धृतं तत्र, तदैवैनं निनाय सः ॥२३७॥

हरिषेणस्तु शूरोऽपि, द्वीपीव विधृतः स तैः ।
न नंष्टुं न च तान् हन्तुं, शक्तोऽगाद्यक्षवेश्मनि ॥२३८॥

दध्यौ च धिग् धिग् मां येन, न छिन्नं भूपतेः शिरः ।
न च ममाऽपि मूर्घानमचिच्छिदन्नराऽधिपः ॥२३९॥

अधुनाऽपहृताऽस्त्रस्य, छागस्येव तपस्विनः ।
ममाऽङ्गैः सौनिका यक्षमर्च्चयिष्यन्ति सम्मदात् ॥२४०॥

श्रीषेणो न मया दृष्टो, नाऽहेश्चोपकृतिः कृता ।
चाण्ड[ा]लहस्तैर्दैवं हा !, दत्ते मृत्युं ममाऽधुना ॥२४१॥

उपासितं मया स्त्रीत्वं, नृपघाताय यत्पुरा ।
तेन बाधितपुंस्त्वेन, हता क्षत्रियता मम ॥२४२॥

अथाऽसौ सौनिको यक्षमभ्यर्च्य बहिरेत्य च ।
हरिषेणस्य कर्णाऽऽदावक्षिपच्चन्दनच्छटाम् ॥२४३॥

गाढं धरत भो ! एनामबलां नृपघातिकाम् ।
इत्यादिश्याऽऽत्मपुरुषांस्तीक्ष्णां चकर्ष कर्त्तिकाम् ॥२४४॥

पापे ! स्वेनाऽर्जितस्य त्वं, कर्मणः फलमाप्नुहि ।
इत्युक्त्वा प्राक्कर्णौ छेत्तुं, कपोले स करं न्यधात् ॥२४५॥

मुण्डितत्वात् कचस्तम्बास्तीक्ष्णास्तस्य करेऽलगन् ।
कथं कूर्चमिवैतस्या, इत्यसौ परितोऽस्पृशत् ॥२४६॥

कपोलस्पर्शतः कूर्चं, ज्ञात्वोचे सौनिको भयात् ।
अरेरे !!! धियतां गाढं, यत् पुमानेष नाऽबला ॥२४७॥

अस्माकं भूपतिं हन्तुं, कृतस्त्रीवेषकैतवम् ।
दुरात्मानममुं बद्ध्वा, छिन्तेत्युच्चैरुवाच सः ॥२४८॥

बद्धे च तस्मिन् श्वपचैर्निष्कृपः सौनिकोऽवदत् ।
अहो ! नर ! स्मर त्वं हि, किमपीष्टं स्वदैवतम् ? ॥२४९॥

अस्माभिः स्त्रीभ्रमेण त्वं, नाऽसि बद्धो नवा हतः ।
ज्ञातपुंस्त्वोऽधुना त्वं हि, यक्षस्याऽग्रे समाप्यसे ॥२५०॥

हरिषेणस्तमूचेऽथ, साऽवष्टम्भं निरस्तभीः ।
दैवात् समागते मृत्यौ, स्मृतः कः किं करिष्यति ? ॥२५१॥

प्रथमं छिन्धि मे हस्तं, यद् घातो नाऽलगन्नृपे ।
पश्चात् कुरु यथाऽभीष्टं, यक्षाऽग्रे सौनिक ! द्रुतम् ॥२५२॥

इत्युक्तो हरिषेणेन, किलाऽसौ, प्रहरिष्यति ।
विज्ञाय हरिषेणं तु, यक्षो मा मेत्यभाषत ॥२५३॥

मत्प्रतिचारको ह्येष, हरिषेणाऽभिधस्ततः ।
किमेवं हन्तुमारेभे, रे चाण्डाल ! ममाऽग्रतः ? ॥२५४॥

एतस्यैव हि शुद्ध्यर्थं, देशाद्देशं भ्रमाम्यहम् ।
मत्प्रमादादहो ! प्राप, दुर्दशामयमीदृशीम् ॥२५५॥

इति पुम्भूतयक्षोक्ताश्चाण्डालाः कृतभीतयः ।
ते सर्वेऽपि पलायन्त, सिंहनादादिव द्विपाः ॥२५६॥

ततश्च हरिषेणस्य, बन्धा यक्षप्रभावतः ।
सुबद्धा अप्यत्रुट्यन्त, त्रटत्त्रटदिति स्वयम् ॥२५७॥

किमेष स एवाऽहोऽयं, ? यक्षो यः सेवितः पुरा ।
इति ज्ञात्वा हरिषेणस्तस्थौ नीचैष्कृताऽऽननः ॥२५८॥

पुरुषीभूतयक्षोऽथ, स्नेहात्तमभिषस्वजे ।
आलपच्च महाभाग !, कथमित्थं विडम्बना ? ॥२५९॥

ततः क्षामाक्षरं तस्मै, हरिषेणो न्यवेदयत् ।
समस्तमात्मवृत्तान्तं, स्थित्वा स्थित्वा त्रपावशात् ॥२६०॥

यक्षोऽथ प्रत्यभाषिष्ट, हरिषेणं विषादभाक् ।
मया कुस्वामिना यस्ते, कृतोऽनर्थः क्षमस्व तत् ॥२६१॥

अथोचे हरिषेणोऽपि, यक्षराज ! तवाऽधुना ।
रक्षतो मार्यमाणं मां, स्वामिता सफलाऽभवत् ॥२६२॥

नागस्याऽग्रे प्रपन्नं यत्, तदकुर्वन्नहं वचः ।
त्वद्दत्तजीवितं मन्ये, मृत्योरुपरि चूलिकाम् ॥२६३॥

साऽवष्टम्भं पुनर्यक्षो, हरिषेणं जगाद सः ।
मा विषीद प्रतिज्ञां ते, विधास्ये सफलां खलु ॥२६४॥

पप्रच्छ हरिषेणस्तं, कुत्राऽपि दृष्टवानसि ? ।
लघुं मे भ्रातरं यक्ष, प्रत्यवोचन्न कुत्रचित् ॥२६५॥

अदत्तविभङ्गज्ञानोपयोगो यक्षराडसौ ।
पुरीस्थमपि नाऽज्ञासीच्छ्रीषेणमन्यथाऽभिधम् ॥२६६॥

इतश्च दत्तसङ्केतः, स नागो वटकोटरात् ।
नृपस्य घातकोऽभूदित्याकर्ण्य स्वाऽऽश्रयं ययौ ॥२६७॥

श्रीषेणं तत्र राजानमविद्वान् यक्षराडथ ।
हरिषेणयुतोऽचालीत्क्वाऽप्येनं वीक्षितुं ततः ॥२६८॥

अविद्यमानत्वात्ताभ्यां, श्रीषेणः क्वाऽप्यदर्शि न ।
स्वर्णद्वीपमुपेत्याऽऽह, हरिषेणं स यक्षराट् ॥२६९॥

त्वत्प्रतिज्ञाऽर्थमाधातुं, पुरस्याऽस्य महीपतेः ।
ग्रहीष्यामि सुतं पश्चान्न मोक्षाम्यन्यमान्त्रिकैः ॥२७०॥

राज्ञा पुत्रग्रहाऽऽर्त्तेन, वादितं डिण्डिमं स्पृशेः ।
मुञ्चन् हुङ्कारमागच्छेर्निर्भीर्नृपसुताऽन्तिकम् ॥२७१॥

त्वत्तो बिभ्यदिवाऽत्यर्थं, मोक्ष्ये राजसुतं ततः ।
यथा त्वत्सन्धा पूर्णा स्यात्तथा याचेर्नृपाद्वरम् ॥२७२॥

पश्चादहं तु यास्यामि, स्वस्थानमुत्कमानसः ।
विपक्षैर्मुक्तमुद्यानं, शून्यमास्ते विना हि माम् ॥२७३॥ [कुलकम्]

ततो गृहीते यक्षेण, राज्ञः पुत्रेऽथ भूभुजा ।
वादिते डिण्डिमे सर्वं, हरिषेणस्तथाऽकरोत् ॥२७४॥

तं मुक्त्वाऽऽशु गते यक्षे, जाते पुत्रे च नीरुजि ।
महामान्त्रिकोऽयमिति, तुष्टो राजा तमब्रवीत् ॥२७५॥

याचस्व यदभीष्टं ते, देशेभाऽश्वधनादिकम् ।
अथ विज्ञपयामास, हरिषेणोऽपि तं नृपम् ॥२७६॥

नृप ! तुष्टोऽसि सत्यं चेत्तदेकं शृणु मद्वचः ।
सर्वत्र सुलभैरेभिः, पूर्णं देशाऽऽदिभिः प्रभो ! ॥२७७॥

रङ्गशालायां मच्छत्रुः, सरित्पुत्रोऽस्ति भूपतिः ।
तस्योच्छेदं विधेहीति, याचे त्वामहमादरात् ॥२७८॥

स्मित्वोचे नृपतिः किं भो !, मदर्थो याचितस्त्वया ? ।
यदग्रेऽप्यभ्यमित्रीणीकृता सेनाऽस्ति तं प्रति ॥२७९॥

भव तर्हि त्वमेवाऽस्यां, सेनानीर्मानितो मया ।
मत्सैन्यं सकलं कर्तृ, त्वदाज्ञां मन्निदेशतः ॥२८०॥

स्ववैरं स्वामिकार्यं चेत्युत्साहविहिताऽऽदरः ।
गच्छाऽधुनैव तत्र त्वं, साधु साधय शात्रवम् ॥२८१॥

अस्याऽऽज्ञया वर्त्तितव्यमित्याज्ञाऽप्याऽऽत्मराजकम् ।
सेनाधिक्षांश्च राजाऽथ, हरिषेणं व्यसर्जयत् ॥२८२॥

अखण्डप्रयाणैः सोऽपि, रङ्गशालां पुरीं ययौ ।
सर्वाऽभिसारतस्तां च, परितः पर्यवेष्टयत् ॥२८३॥

उपदुद्राव बाह्यांश्च, तद्देशवासिनो जनान् ।
प्रवेशनिर्गमं यत्नादरक्षत्पूर्जनस्य च ॥२८४॥

सरित्पुत्रनृपस्याऽथाऽकुर्वतो राजपाटिकाम् ।
गत्वा विज्ञपयामासुर्नगराऽऽरक्षकास्ततः ॥२८५॥

नाथ ! शत्रुबलाऽम्भोधिर्वल्गदश्वोर्मिसङ्कुलः ।
अकालप्लावनं कर्तुं, व्यानशे परितः पुरीम् ॥२८६॥

पुरीलोकस्तथा नाथाऽऽक्रन्दत्येवाऽतिरोधतः ।
गोकुलं च यतो नाऽन्तरस्तीह प्रचुरं पयः ॥२८७॥

श्रुत्वेति प्रसरत्कोपकम्पमानाऽधरो नृपः ।
आदिशद्वप्रयन्त्राणि, ततो वाहयितुं नरान् ॥२८८॥

अथ गोपुरद्वारेषु, व्यलब्ध मण्डलेश्वरान् ।
वप्रे चाऽनपराद्धेषून्, धानुष्कानध्यरोपयत् ॥२८९॥

अहंयुत्वात्तथोपात्तबहिर्गतिनिषेधतः ।
सौध एव स्थितो राजा, पुरीरक्षापरोऽभवत् ॥२९०॥

प्राकारस्थबहिःस्थानां, भटानामितरेतरम् ।
ततश्चाऽभूद्द्विधा युद्धं, यन्त्रायन्त्रि शराशरि ॥२९१॥

वप्रयन्त्रप्रतीकारं, विधाप्य सुभटान् निजान् ।
प्राहिणोद्वप्रपाताय, हरिषेणः स्वयं पुनः ॥२९२॥

प्राकारस्थान् शरासारैस्ताडयामास तांस्ततः ।
लब्धेऽस्मिन्नन्तरे शूरा, वप्रपाते डुढौकिरे ॥२९३॥

चतुर्दिक्षु प्रतोलीषु, निजं बलमढौकयत् ।
शूराणां क्षिप्रकारित्वं, कार्मणं विजयश्रियः ॥२९४॥

ततश्चाऽलब्धप्रसरा, धीरा अपि भयस्पृशः ।
प्राकाराऽधिकृता राज्ञे, तत्स्वरूपं व्यजिज्ञपन् ॥२९५॥

तदैव च पुरीलोको, ज्ञात्वा ढौकं पुरीं प्रति ।
सम्भूयाऽऽगत्य निर्भीकश्चुक्रोश नृपमुच्चकैः ॥२९६॥

ततो वीक्ष्य पुरीलोकं, रुदन्तं सर्वतस्तथा ।
ज्ञात्वाऽरिबलभूयस्त्वं, प्रतिज्ञां स्वां विचिन्त्य च ॥२९७॥

क्षीणाऽन्यसकलोपायः, सरित्पुत्रनृपोऽस्मरत् ।
वरेणैकेनाऽधमर्णां, देवीं राज्यप्रदां ततः ॥२९८॥ [युग्मम्]

स्मृतमात्रैव सा देवी, समेत्य नृपतेः पुरः ।
बभाषे वत्स ! ब्रूहि त्वं, सज्जाऽस्मि करवाणि किम् ? ॥२९९॥

सरित्पुत्रस्ततः प्रोचे, देवीं प्रति कृताऽञ्जलिः ।
स्वभ्रातरं यदा द्रक्ष्ये, तदा यास्याम्यहं बहिः ॥३००॥

इति मत्प्रतिज्ञां श्रुत्वा, द्विषश्छलविलोकिनः ।
अरौत्सुर्मत्पुरीमेते, मय्यन्तः सति राजनि ॥३०१॥

सन्धानिगडितत्वेनाऽनभ्यमित्रेऽधुना मयि ।
देवि ! प्रसीद पूर्लोकं, पाहि द्विषदुपद्रवात् ॥३०२॥

अथ राज्यप्रदा प्रोचे, वत्साऽऽकर्णय मद्गिरः ।
मया प्रदत्तराज्यस्याऽऽज्ञासिद्धस्य बलं ह्यदः ॥३०३॥

स्मरति स द्वितीयस्ते, मत्प्रासादे तदाऽऽगतः ।
दृष्टिविषोरगाऽऽतङ्कान्नंष्ट्वाऽगाद्वृद्ध्या सह ॥३०४॥

त्वयाऽथ मारिते सर्पे, तत्रोपद्रवकारिणि ।
पूर्ववद्वसति द्वीपे, पुनर्दीपोत्सवोऽभवत् ॥३०५॥

तपत्त्रणि कुण्डेऽथ, झम्पा त्वमिव सोऽप्यदात् ।
साहसात्तस्य राज्यं च, स्वर्णद्वीपे ददे मया ॥३०६॥

यथा तव तथा तस्य, राज्यदाऽस्म्यहमेव हि ।
कथमुच्छेत्तुमर्हामि, राजंस्त्वमिव तद्बलम् ॥३०७॥

जगादाऽथ सरित्पुत्रो, देवि ! दर्शय मेऽद्भुतम् ।
मदीयं भ्रातरं पश्चादुच्छेत्स्यामि स्वयं रिपून् ॥३०८॥

उवाच देवता राजन्निदानीमुत्सुकाऽस्म्यहम् ।
अष्टापदगिरौ द्रष्टुं, चरणानर्हतां ततः ॥३०९॥

साऽङ्गोपाङ्गं निजभ्रातृरूपं क्वाऽपि त्वमालिख ।
अस्याऽनुसारात्तं वीक्ष्याऽऽनेष्यन्ति मम किङ्कराः ॥३१०॥

ततो राज्यप्रदाऽऽदिश्य, तमर्थं व्यन्तरान्निजान् ।
जगामाऽष्टापदे तेभ्यस्तथा कृत्वाऽऽर्पयन्नृपः ॥३११॥

बहिःस्थं वेत्ति तं देवी, परं नाऽकथयत्स्वयम् ।
क्रीडया वा तयोर्युद्धं, द्रष्टुं वा भावि वीक्ष्य वा ॥३१२॥

व्यन्तराः पटमादाय, भ्रेमुः सर्वत्र मेदिनीम् ।
नाऽद्राक्षुः पुरुषं कञ्चित्पटरूपाऽनुयायिनम् ॥३१३॥

व्यन्तरास्तमपश्यन्तो, निवृत्तास्तां पुरीं प्रति ।
नृपाऽरिसैन्ये पल्यङ्कसुप्तं तं ददृशुर्निशि ॥३१४॥

पटरूपसमं रूपमस्येत्यूचुः परस्परम् ।
स्वभ्रातुः सरित्पुत्रस्य, किमेष शत्रुतां ययौ ? ॥३१५॥

मोक्तव्योऽयं न तत्रैव, प्रेक्ष्य यद्युद्धमेतयोः ।
राज्ञे प्रदर्श्य शीघ्रं चाऽऽनीय मोच्योऽयमत्र हि ॥३१६॥

इत्यालम्ब्य हरिषेणशय्यामुत्पाट्य ते ततः ।
विद्युदुद्योतवद्राज्ञे, प्रदर्श्य मुमुचुस्तथा ॥३१७॥

राजाऽपि प्रत्यभिज्ञाय, ज्यायांसं भ्रातरं निजम् ।
भ्रातृदर्शनपर्यन्तां, सन्धां पूर्णाममन्यत ॥३१८॥

कुतोऽप्याऽऽनीय सुप्तोऽयं, नीतश्च व्यन्तरैः क्षणात् ।
न मेऽभूद्वचनाऽऽलापो, राजेति विषसाद च ॥३१९॥

अथ पूर्णसन्धो राजा, दूतेनोचे रिपूनिति ।
योद्धुं भवत सज्जा भो !, आयाम्येषोऽहमात्मना ॥३२०॥

दूतानुपदमेवाऽसौ, चचाल च रिपूनभि ।
सर्वाऽभिसारभारेण, शेषाऽहेर्नमयन् फणाः ॥३२१॥

निसृष्टाऽर्थः स दूतोऽपि, बहिःसैन्यमुपेत्य च ।
अभीर्विज्ञपयामास, हरिषेणं निजाऽऽप्तवत् ॥३२२॥

किमेतद्भवतारब्धमनात्मनीनमात्मना ।
आत्मोदयपरज्यानिक्षत्रनीतिं न वेत्सि किम् ? ॥३२३॥

शत्रुदेशो मया ग्रस्त, इति चेतसि मा विधाः ।
इदं नेपालकूटेन, मिश्रं मन्यस्व भोजनम् ॥३२४॥

सैन्याऽब्धिवेलयैषा पूर्मया प्लाव्यते चेन्मतिः ।
अगस्त्येन न किं पीतः, सवेलः सरिताम्पतिः ? ॥३२५॥

दीपवन्मयि शलभा, द्विषः स्युरिति दृप्यसे ।
न किं वेत्सि स दीपोऽपि, यन्निर्वात्यहिदर्शनात् ? ॥३२६॥

देवतादत्तराज्योऽयं, रङ्गशालापतिस्ततः ।
सर्वथा तव सैन्यानामसाध्योऽस्मन्महीपतिः ॥३२७॥

ततस्त्वं स्वाऽपराधस्य, दण्डं दत्त्वाऽस्य भूपतेः ।
प्रयाहि स्वस्य संहारमकाण्डे मा वृथा कृथाः ॥३२८॥

भ्रातुर्वियोगसन्धाऽऽर्त्तो, नाऽभ्यागात्त्वां पुरात्पुरा ।
दृष्टस्वभ्रातृकं सम्प्रत्यायातं पश्य भूपतिम् ॥३२९॥

यदि ते कुपितं दैवं, तद्योद्धुं प्रगुणीभव ।
पूर्ववन्नाऽधुनाऽप्येष, सोढा त्वद्दुर्नयान् खलु ॥३३०॥

श्रुत्वेति दूतवाक्यानि, तं प्रत्यकृतमत्सरः ।
हरिषेणश्चुकोपाऽथ, सरित्पुत्राय सिंहवत् ॥३३१॥

अधिसङ्गरमभ्येत्य, शिरश्छेत्स्यामि ते विभोः ।
उच्चैरुक्त्वेति सत्कृत्य, दूतं सोऽथ व्यसर्जयत् ॥३३२॥

ज्वलन्नग्रेऽपि वैलक्ष्याद्दूतेनोत्तेजितः पुनः ।
आदिशत्सैष राजन्यान्, द्रुतं सन्नह्यतामिति ॥३३३॥

एतैस्तथा कृते स्नात्वा, निजामभ्यर्च्य देवताम् ।
हरिषेणः समारोहदैरावणमिव द्विपम् ॥३३४॥

वादिते रणतूर्ये च, वीरेषूद्गतरोमसु ।
प्रावर्तत महायुद्धं, द्वयोर्नासीरयोस्तयोः ॥३३५॥

अन्योन्यं हन्यमानेषु, सुभटेषु बहुष्वथ ।
हरिषेणस्य सैन्यं तत्, प्रतिवीरैरभज्यत ॥३३६॥

जीवानादाय नश्यत्सु, राजन्येषु निजेषु सः ।
हरिषेणः स्वयं योद्धुमारेभे रिपुभिः सह ॥३३७॥

सरित्पुत्रस्य सैन्येन, वर्द्धिष्णूत्साहशालिना ।
घूकवत्काकयूथेन, हरिषेणस्त्ववेष्ट्यत ॥३३८॥

गताऽऽतङ्कस्तथाऽप्येष, कुर्वाणो युद्धमद्भुतम् ।
आहतो हृदि बाणेन, सरित्पुत्रपदातिना ॥३३९॥

तेन बाणप्रहारेण, छिन्नो मर्मणि कुञ्जरात् ।
पतितोऽथाऽरिसैन्यैस्तैरुत्पाट्याऽऽनीयतेस्म सः ॥३४०॥

मुक्तश्च सरित्पुत्रस्य, पुरतो मूर्च्छितः स तैः ।
मद्भ्राता हरिषेणोऽयमित्युपालक्षयत्स तम् ॥३४१॥

अरे ! पयः पयः शीतं, व्यजनं व्यजनं तथा ।
ब्रुवन्नेतत्पटाऽन्तेन, नृपं वीजयति स्वयम् ॥३४२॥

तथा शीताऽम्बुना तस्याऽभिषिच्य परितो वपुः ।
वीजयन्ति जलाऽऽर्द्राभिर्मुहुस्तं नृपसैनिकाः ॥३४३॥

किञ्चित्त्वपेतमूर्च्छोऽभूद्धरिषेणः परन्तु सः ।
प्रहारवेदनाऽऽक्रान्तो, नोन्मीलयति चक्षुषी ॥३४४॥

ततः सरित्सुतो राजा, मुञ्चन्नश्रूण्युवाच तम् ।
श्रीषेणोऽहं तव भ्राता, तत्प्रसीद दृशा मयि ॥३४५॥

त्वद्वियोगाग्निसन्तप्तमुत्थायाऽभिषजस्व माम् ।
एतावन्ति दिनान्यार्य ! न मेऽभूत्त्वां विना रतिः ॥३४६॥

हरिषेणस्तु नोवाच, विध्वस्तसकलेन्द्रियः ।
रणाऽऽवेशवशात्किन्तु, भूमिमाहन्ति निर्भरम् ॥३४७॥

अतिबाधोत्थदाहेनाऽवतप्तेन कुलस्थितिम् ।
आसादयन्तं तं वीक्ष्य, सरित्पुत्रो व्यचिन्तयत् ॥३४८॥

उत्कण्ठा द्रष्टुमन्योऽन्यमन्योऽन्यं योद्धुमुद्यमः ।
अन्योऽन्याऽज्ञातभ्रातृत्वाद्धिग् धिगज्ञानताऽऽवयोः ॥३४९॥

तदज्ञातस्वरूपत्वात्, मयैव किल शत्रुणा ।
शत्रोरिव निजभ्रातुरवस्था कीदृगाहिता ? ॥३५०॥

अहहाऽसारता कीदृक्, शरीरस्य शरीरिणाम् ? ।
यदामपात्रवत्स्यात्तु, स्तोकादपि च भङ्गुरम् ॥३५१॥

गत्वरेणाऽमुना चेत्स्यात्साधितं परमं पदम् ।
तन्मूढाः किं न गृह्णन्ति, लाभमस्य विनश्यतः ? ॥३५२॥

बाल्येऽकिञ्चित्करं गाढं, यौवने वार्द्धके जरत् ।
अलभ्यस्यैकरूपेण, विश्रम्भो वपुषोऽस्तु कः ? ॥३५३॥

वसन् शरीरदुर्गेऽपि, नाऽऽत्मा कातरतां त्यजेत् ।
रोगाऽरिवेष्टितो नंष्टुं, धर्मद्वारं य ईहते ॥३५४॥

आत्मनो नीयमानस्योत्तमर्णैः कर्मभिर्बलात् ।
रक्षाऽऽस्तां स्वजनैर्हस्ताज्ज्वाल्यते तद्वपुर्गृहम् ॥३५५॥

धिग् धिग् राज्यं च यस्मै हि, गृध्नवो मादृशा मिथः ।
अन्धा इव न पश्यन्ति, दुस्सहां नरकव्यथाम् ॥३५६॥

तदलं मे कुटुम्बाऽऽद्यैस्तत्स्नेहो वाससीव यत् ।
आत्मन्यत्युज्ज्वले लग्नो, रजोबन्धनिबन्धनम् ॥३५७॥

इति वैराग्यपूरेण, व्रताऽम्भोध्यनुयायिना ।
त्याजिताऽऽत्मपदस्थानो, राजाऽमात्यानथाऽब्रवीत् ॥३५८॥

भो ! भो ! मूलक्रमाऽऽयाता, मन्त्रिणः श्रूयतां वचः ।
नरकाऽऽर्त्तिफलेनाऽलं, राज्येन मम सम्प्रति ॥३५९॥

यद्येष जीवति भ्राता, हरिषेणो ममाऽग्रजः ।
तदाऽस्मै दीयतां राज्यमन्यथा मत्सुताय तु ॥३६०॥

ब्रुवन्नैतत्परित्यज्य, सतीं तां राज्यसम्पदम् ।
भ्रातर्यपि तथाऽवस्थे, सर्वथाऽपि हि निर्ममः ॥३६१॥

कुर्वन्नाऽन्तःपुरं चित्ते, स्निह्यन्नैव सुतेष्वपि ।
असंस्तुत इवाऽऽत्मीयवल्लभानप्यनाऽऽलपन् ॥३६२॥

लेप्यरूपमिवाऽऽश्चीयहास्तिकं गणयन्नथ ।
प्रत्यरीन् विस्मरत्कोपं, स्मरन्नाऽऽत्मानमात्मना ॥३६३॥

ऊर्ध्वबाहौ रुदत्येव, तस्मिन् राजपरिग्रहे ।
ज्वलत इवाऽऽत्मसैन्यान्, निस्ससार सरित्सुतः ॥३६४॥ [चतुर्भिःकुलकम्]

त्यक्तराज्यभार इव, लघु गच्छन्नतुच्छधीः ।
कस्मिंश्चिद्बहिरुद्याने, विवेश स महीपतिः ॥३६५॥

दयाऽऽदिभिर्धर्ममिव, यतिभिः परितो वृतम् ।
श्रीवर्द्धमाननामानं, तत्राऽऽचार्यं ददर्श सः ॥३६६॥

कटरे गुरुसंयोगः संविग्नस्य ममाऽभवत् ।
ध्यायन्निति तमाचार्यमुपेत्य प्रणनाम सः ॥३६७॥

स्वयं संविग्नमुत्प्रेक्ष्य, भूपमाचार्यपुङ्गवः ।
तन्मनोद्रुसुधाकुल्यामारेभे धर्मदेशनाम् ॥३६८॥

चेतः प्रेतसमं न मङ्गलशतान्यासादयत्तृप्यति,
प्रायः कायकुटी घटीव लकुटै रोगैर्भवेज्जर्जरा ।
गृद्धिः सिद्धिहरी दरीव तमसा चक्षुः परं मोहय-
-त्यायुर्वायुचलं कलङ्कयति भो ! जीवं मुहुर्जन्मभिः ॥३६९॥

देशनाऽम्बुभिरुत्पूरभूपचित्ताऽऽलवालकात् ।
आनन्दाऽश्रुमिषादक्षियन्त्रेणोर्ध्वमगात्पयः ॥३७०॥

आचार्यदेशनोत्फुल्लसंवेगोत्कलिकां दधत् ।
तदैव सूरिपादाऽन्ते, प्रव्रज्यामग्रहीन्नृपः ॥३७१॥

तप्यमानस्तपस्तीव्रमधीयन् श्रुतमादरात् ।
सहाऽऽचार्यैर्व्यहार्षीत् स, सहमानः परीषहान् ॥३७२॥

अधीती सर्वसिद्धान्ते, विदिती यतिकर्मसु ।
आश्रिती विनये चाऽथ, गीतार्थोऽभूत्सरित्सुतः ॥३७३॥

विनयः शासने मूलमिति निश्चित्य चेतसा ।
महात्मा स मुनिः सूरिपार्श्वे प्रत्यशृणोदिति ॥३७४॥

अतः प्रभृति साधूनां, पठतां जरतां तथा ।
तपस्यतां ग्लानिमतां, विधेयो विनयो मया ॥३७५॥

स्मरन्नप्याऽऽत्मनोऽष्टाङ्गप्रणताऽशेषभूपतेः ।
स आद्यदिनवच्चक्रे, यतीनां विनयं सदा ॥३७६॥

यतः— दानाऽऽदयो जपतपःप्रमुखा गुणा वा,
सन्तोऽप्यसन्त इव ते विनयेन हीनाः ।
नैवाऽङ्गनावपुषि कङ्कणकर्णपूर-
केयूरहारवलयैर्घुसृणाद्विना श्रीः ॥३७७॥

आचार्यसाधवोऽन्येऽपि, तद्वैनयिककर्मणा ।
सुखिनः सन्ति सिद्धान्तपाठाऽऽदिष्वेकचेतसः ॥३७८॥

अन्यदा व्यन्तरः कोऽपि, मिथ्यादृष्टिः सरित्सुतम् ।
आसक्तं विनये वीक्ष्य, तत्परीक्षां व्यधादिति ॥३७९॥

स क्रूरव्यन्तरः श्राद्धीभूय नत्वा यथाविधि ।
आचार्यान् व्रतिनोऽथैकं, बालं साधुमवन्दत ॥३८०॥

पाठव्यग्रः स बालर्षिर्धर्मलाभं ददौ नहि ।
सोऽथ कोपादिवोचे तं, धर्मलाभं ददासि न ? ॥३८१॥

प्रत्यभाषिष्ट बालोऽपि, साधुश्रावक ! मा कुपः ।
मूर्खत्वादेकचित्तेनोद्घोषन्न त्वां व्यलोकयम् ॥३८२॥

अषडक्षीणमाहैष, तं पाठोत्कण्ठितं मुनिम् ।
वितराम्यौषधं तेऽहमायाति पठतो यथा ॥३८३॥

अथ बालमुनिः पाठे, न्यक्कृतस्तुल्यपाठकैः ।
आहौत्सुक्यान्महाभाग !, देहि देहि ममौषधम् ॥३८४॥

अथ स व्यन्तरः श्राद्धोऽस्मै किमप्युग्रमौषधम् ।
कुर्याद्भुक्तोर्ध्वमित्युक्त्वा, तत्समर्प्य च सोऽगमत् ॥३८५॥

बालर्षिः क्षुधितोऽस्मीति, विचार्य स्वयमेव सः ।
कृत्वा ग्रासं जघासैतदौषधं मुखशुद्धिवत् ॥३८६॥

अथाऽस्य सन्ध्यासमये, पयोऽभ्येति मुखे मुहुः ।
गुरुभ्यो बिभ्यन्नाऽऽख्याति, निष्ठीव्यति भृशं तु सः ॥३८७॥

आचार्यास्तं तथा वीक्ष्य, पप्रच्छुर्वत्स ! किं न्विदम् ? ।
प्रभो ! किमपि नो वेद्मि, पयोऽभ्येतीति सोऽवदत् ॥३८८॥

इदानीं तर्हि माऽध्येष्ठा, गत्वा स्वपिहि निर्भरम् ।
आचार्यैः स्वयमित्युक्तः, सुष्वाप स लघुर्मुनिः ॥३८९॥

प्रतिक्रम्य स्वाध्यायाऽन्ते, सुषुप्सति यतिव्रजे ।
चक्रे विश्रामणां साधुः, सरित्पुत्रस्तपोभृताम् ॥३९०॥

आबालवृद्धसाधूनां, कुर्वन् विश्रामणां ततः ।
सैष संवाहनाऽर्थं तं, बालं साधुमुपागमत् ॥३९१॥

व्यन्तराऽधिष्ठितः सोऽथ, बालर्षिः प्राह तं मुनिम् ।
बाढं स्फुटति मे गात्रं, तत्संवाहय मां दृढम् ॥३९२॥

इच्छामीति भणित्वाऽसौ, सरित्पुत्रमुनिस्ततः ।
संवाहयितुमारेभे, महाप्राणेन तं लघुम् ॥३९३॥

शिरः पादौ भुजावंशौ, जङ्घे ऊरू च जानुनी ।
पृथग् मर्दयतस्तस्य, निशीथसमयोऽभवत् ॥३९४॥

सुप्तास्ते साधवः केचिज्जाग्रत्येके यथाविधि ।
अनुद्विग्नस्तथैवाऽस्थाद्बालर्षिं मर्दयन्नसौ ॥३९५॥

अथाऽऽह तं स बालर्षिर्हृदि मेऽम्भश्चटत्यथ ।
पृष्ठिं निष्ठुरपाणिभ्यां, साधो ! सम्भावयाऽधुना ॥३९६॥

प्रवृत्तः स तथाकर्तुं, तदौषधवशादथ ।
प्राहाऽऽकुलः स बालर्षिः, कदाचिन्मे वलिष्यति ॥३९७॥

तत्साधो ! भाजनं किञ्चित्, क्वाऽपि वीक्ष्य समानय ।
असौ बालर्षिणेत्युक्तो, लग्नः शोधयितुं हि तत् ॥३९८॥

भूमिं प्रमार्जयन् ध्वान्ते, रजोहरणतः शनैः ।
वसत्यन्तः किमप्येष, नैक्षिष्ट भाजनं ततः ॥३९९॥

महात्मन् ! किं विलम्बोऽयमेहि स्थातुं क्षमो न यत् ।
आर्त्तबालर्षिणेत्युक्तोऽभ्येत्य नाऽस्तीति सोऽवदत् ॥४००॥

अशक्तस्य बहिर्गन्तुं, संस्तरो मे भरिष्यति ।
इत्याकुलस्य बालर्षेरागादोत्कारिका ततः ॥४०१॥

सरित्पुत्रो महासत्त्वो, जुगुप्सादोषवर्जितः ।
गताऽन्योपायस्तद्वक्त्रस्याऽधः स्वप्रसृतिं न्यधात् ॥४०२॥

वम त्वमत्र निःशङ्कमित्युक्तस्तेन साधुना ।
बालर्षिश्चाऽवमत्तत्र, विनाऽन्नं केवलं पयः ॥४०३॥

स्थण्डिले प्रेक्षणं रात्रौ, न शुद्ध्यत्यन्धकारतः ।
कथमेतत्परिष्ठाप्यमिति तस्थौ तथैव सः ॥४०४॥

ततश्चक्रन्द बालर्षिः,क्रूरव्यन्तरपीडितः ।
अहो ! स्फुटति मे गात्रं, तन्मां मर्दय हे मुने ! ॥४०५॥

रुद्धहस्तेऽम्बुना साधौ, संवाहनमकुर्वति ।
नामभिः स मुनीनन्यानुत्थापयितुमारटत् ॥४०६॥

मयि सत्यपि साधूनां, मा भूदुज्जागरो हहा ! ।
बालर्षिर्बाध्यते चाऽयं, स्फुटता वपुषा च हा ! ॥४०७॥

प्रेक्षोत्प्रेक्षे विना भूमौ, पयस्त्यक्तुं न युज्यते ।
पानाऽऽहारप्रत्याख्यानान्नैतत्पातुं क्षमोऽस्म्यहम् ॥४०८॥

विमृश्येति बहूपायान्, निश्चिकाय धियेति सः ।
तैलेनेवाऽम्बुनाऽनेन, वपुः स्वं म्रक्षयाम्यहम् ॥४०९॥

नैवं जन्तुविघातो मे, न साधूज्जागरोऽपि च ।
रिक्तीभूतकरः पश्चाद्बालर्षिं मर्दयाम्यहम् ॥४१०॥

राज्ये कृतपूर्वीयक्षकर्दमाऽऽदिविलेपनम् ।
स कर्मक्षालनायेवौक्षद्गात्रं वमनाऽम्भसा ॥४११॥

तेनाऽम्भसोपशान्ताऽन्तःकर्म्माऽग्निरिव निर्वृतः ।
अजुगुप्सः सरित्पुत्रो बालं संवाहयत्यथ ॥४१२॥

अपूर्वविनयेनाऽस्य, मिथ्यादृगपि रञ्जितः ।
बालर्षिं व्यन्तरो मुक्त्वाऽवादीत्प्रत्यक्षतां गतः ॥४१३॥

साधु साध्वसि राजर्षे !, विनीतेषु शिरोमणे ! ।
अनुभूतराज्यः कोऽन्यो, विनयी स्याद्भवादृशः ॥४१४॥

इत्युक्त्वा व्यन्तरो नत्वा, सरित्पुत्रं स भावतः ।
वृथा कदर्थितं बालं, क्षमयित्वा तिरोभवत् ॥४१५॥

सर्वथाऽप्यकृतौद्धत्यः, सरित्पुत्रः पुरेव सः ।
साधूनां विनयं कुर्वन्, सिद्धान्तानध्यजीगपत् ॥४१६॥

षट्त्रिंशद्गुणपूर्णत्वाद्योग्यं सूरिपदस्य तम् ।
गणाऽभीष्टं सरित्पुत्रमाचार्यं सूरयो व्यधुः ॥४१७॥

विनयन्धर इत्याख्यां, तत्सूरेः सूरयो ददुः ।
स गुरुभिरनुज्ञो [ज्ञातो], व्यहरत्साधुभिर्वृतः ॥४१८॥

प्रबोध्य भविकान् क्ष्मायां, विनयन्धरसूरयः ।
गणं मुक्त्वा गिरौ क्वाऽपि, पादपोपगतिं व्यधुः ॥४१९॥

इतश्च हरिषेणोऽपि, शरप्रहारजर्जरः ।
अमात्यै रङ्गशालायां, नीतः पटुरभूच्चिरात् ॥४२०॥

ततस्तस्य यथावृत्ते, सचिवैः कथिते सति ।
स्वभ्रातृव्यं स्वयं राज्ये, हरिषेणो व्यधात्ततः ॥४२१॥

स्वयं दध्यौ कनीयांसं, निहन्तुं भ्रातरं मया ।
द्विरूपक्रान्तेऽपि न यत्, स हतस्तद्धि साध्वभूत् ॥४२२॥

उत्तमर्णस्याऽधमर्णादशक्तो वस्तु दापने ।
स्वयं ददन्न मिथ्या स्यात्, स्ववाचि प्रतिभूर्यथा ॥४२३॥

तथाऽहमपि स्वभ्रातुर्मृत्युमानेतुमक्षमः ।
तस्याऽहेरनृणीकुर्वे, स्वमात्मानं स्वमृत्युना ॥४२४॥

इति निश्चित्य चित्तेन, विषादाऽऽनन्दभागसौ ।
मन्त्रिभिर्वार्यमाणोऽपि, हरिषेणस्ततोऽचलत् ॥४२५॥

यस्मिन्नाऽस्ते गिरौ सूरिर्महात्मा विनयन्धरः ।
तत्रैव भृगुपाताय, हरिषेणस्ततोऽगमत् ॥४२६॥

मम भ्राता श्रीषेणोऽयं, यतीभूतस्तपस्यति ।
विनयन्धरमाचार्यं, वीक्ष्याऽनंसीन्मुदाऽथ सः ॥४२७॥

तस्य सम्भाषमाणस्य, सूरिर्नैवोत्तरं ददौ ।
अथाऽसौ चिन्तयामास, स्वचित्तेन सविस्मयः ॥४२८॥

न चलति न च ब्रूते, दृशौ नयति नाऽन्यतः ।
यदेतत्कष्टमारेभे, मुमुक्षुस्तन्ममाऽनुजः ॥४२९॥

तदलं भृगुपातेन, पन्थाः शरणमस्य मे ।
यन्मृत्युर्वाञ्छितो मे स्यादनेनाऽपि पथा खलु ॥४३०॥

आस्ते सूरिर्यथैवैष, निषण्णो भुवि निश्चलः ।
हरिषेणोऽप्यभूत्तद्वत्, तत्सूरेः प्रतिबिम्बवत् ॥४३१॥

इत्थं द्वावपि पादपोपगमनस्वीकारभारक्षमौ,
सिंहव्यालकरालकायकषणैर्नोपद्रवैर्न्यक्कृतौ ।
शुद्धध्यानविलीनकर्मनिगडौ संसारकारागृहान्निः-
सृत्याऽऽयुषि पूर्णताऽऽयुषि शिवं मृत्वाऽथ तौ जन्मतुः ॥४३२॥

इति सत्पुण्यविषये हरिषेणश्रीषेणकथा ॥ ग्रन्थाग्रम् ४३४॥

इति श्रुत्वा कथामेनामाश्चर्याद्धूनयन् शिरः ।
किञ्चिदुद्भूतनिद्रः सन्, सुष्वापाऽजासुतो नृपः ॥४३५॥

प्रातरुत्थाय देवाऽर्च्चां, कृत्वा सदस्युपाविशत् ।
अगात् सुबुद्धिमन्त्री च, तत्र पौरैः समावृतः ॥४३६॥

अजापुत्रस्य तत्सत्त्वं, विलोक्य सचिवोऽद्भुतम् ।
अन्योऽपि कोऽप्यभूदीदृक्, सत्त्वतत्त्वस्य भाजनम् ? ॥४३७॥

इति प्रष्टुं दर्शनिनः, कांश्चिदाजूहवत् क्षणात् ।
पृथक् पृथगपृच्छच्च, नृपसब्रह्मचारिणम् ॥४३८॥

यथाऽत्राऽयमजापुत्रः, सत्त्वसत्यैकमन्दिरम् ।
अन्तरात्मानमानन्दमानयच्चरितैर्निजैः ॥४३९॥

तथा कथयत स्वस्वदर्शनाऽनुस्मृतिस्पृशम् ।
भूतं वा भाविनं वाऽपि, सत्त्वे संवादिनं नरम् ॥४४०॥

अथाऽऽह बौद्धः प्रथमं, मन्त्रिराज ! किमुच्यते ? ।
सत्त्वक्रीतजगच्छ्लाघाऽऽढ्यं भविष्णुरजासुतः ॥४४१॥

सूरेष्वथ च सत्येषु, सात्त्विकेषु मनस्विषु ।
प्रतिभाषेत कोऽह्यन्यः, कथ्यमानोऽपि वाग्मिभिः ॥४४२॥

परं तथाऽपि प्रथितं, कथासु कथयाम्यहम् ।
चेत्पुनः संवदत्यत्र, भावी जीमूतवाहनः ॥४४३॥

जीमूतवाहनकथा

अस्ति श्रीकाञ्चनपुरं, मूर्ध्नि वैताढ्यभूभृतः ।
रत्नप्राकारकिरणैरश्रान्तोल्लिखिताऽम्बरम् ॥१॥

जीमूतकेतुस्तस्याऽभूद्विद्याधरपतिः पतिः ।
यस्याऽशेषस्य यशसः, प्रख्याता काऽप्यनन्तता ॥२॥

विद्याधरेन्द्रदुहिता, भार्याऽभूत्तस्य सम्मता ।
कान्ता कनकवत्याख्या, ख्यातिक्षेत्रं मनोभुवः ॥३॥

तेनाऽजनि सुतस्तस्यां, कल्पद्रुमवराद्वरः ।
जीमूतवाहनो नाम, समूहो गुणसम्पदाम् ॥४॥

तं सर्वगुणसम्पूर्णं, निजे राज्ये निधाय तु ।
कल्पवृक्षं क्रमाऽऽयातं, दत्त्वाऽगात्तपसे पिता ॥५॥

जीमूतवाहनो लब्धराज्यकल्पद्रुमोऽपि हि ।
पितृवियोगदुःखाऽऽर्त्तो, नाऽन्तःसौख्यमवाप सः ॥६॥

कान्ताकटाक्षविक्षेपचपलं यौवनं धनम् ।
जीवितं चेति स ध्यात्वा, तमचिन्त्य तरुं ददौ ॥७॥

तेन दारिद्र्यनाशाय, जगति प्रतिपादितः ।
हेम्ना सम्पूर्य निखिलं, क्षणात् सोऽन्तर्दधे द्रुमः ॥८॥

कुलक्रमाऽऽगते तस्मिन् कल्पवृक्षे व्ययीकृते ।
अपूर्वत्यागिना तेन, त्रिलोकी विस्मयं ययौ ॥९॥

ज्ञात्वा तं प्रतिसामन्ता, रहितं सुरशाखिना ।
तद्राज्यहरणोद्योगे, बभूवुः संहता मिथः ॥१०॥

जीमूतवाहनो ज्ञात्वा, विद्यया तद्विचेष्टितम् ।
तद्वधे कूणितमना, राज्यं तत्याज निःस्पृहः ॥११॥

तपस्यन्तं मलयाऽद्रौ, स्वपितरं समातरम् ।
शुश्रूषितुमगात्तस्मिन्नाकृष्टः पितृभक्तिभिः ॥१२॥

यत्र विद्याधरवधूमधुगण्डूषनिर्भरैः ।
जृम्भेवाऽऽरम्भि बकुलैः, पुष्पाऽऽननविकाशिभिः ॥१३॥

यत्रोद्धताऽऽलिपटलं, विलोक्य घनविभ्रमम् ।
नृत्यन्ति हेमकदलीकुञ्जेषु शिखियोषितः ॥१४॥

उत्कण्ठाः कोमलं यत्र, गीतं किन्नरयोषिताम् ।
शृण्वन्ति निश्चलाः साऽश्रुनयना हरिणाऽङ्गनाः ॥१५॥

नमन्नाश्लिष्य, सस्नेहात्, प्रोक्तः पित्रा विलोकय ।
क्वाऽपि स्थानं नवमिति, गिरौ बभ्राम तत्र तु ॥१६॥

ददर्श तत्र वैताढ्यशिखरस्फारविभ्रमम् ।
गङ्गायितपताकाऽङ्कं, दिव्यप्रासादमत्र च ॥१७॥

गौरीगर्भगृहेऽश्रौषीत्, गीतं वीणास्वनाऽऽश्रितम् ।
कन्यामपश्यत्संसारसारं सरसिजेक्षणाम् ॥१८॥

वदनाऽम्भोजभृङ्गाऽऽलीं, या बभाराऽलकाऽऽवलीम् ।
प्रशस्तिमिव कामेन, न्यस्तां सौभाग्यभूपतेः ॥१९॥

तां दृष्ट्वा विस्मयोत्फुल्ललोचनस्तन्मयोऽभवत् ।
क्षिप्रं नवाऽवतारेण, स्मरेण तरलीकृतः ॥२०॥

विस्तीर्णसुकृतप्राप्यं, तारुण्यसुरपादपम् ।
प्रशान्तविग्रहकथं, त्यक्तचापमिव स्मरम् ॥२१॥

लक्ष्मीविलासभुवनं, भुजस्तम्भविभूषितम् ।
साऽपि लावण्यनलिनी, राजहंसं विलोक्य तम् ॥२२॥

लज्जामज्जत्तनुलता, कम्पसम्पत्तरङ्गिता ।
असूत्रमौक्तिकलता, बभूव स्वेदबिन्दुभिः ॥२३॥ [त्रिभिर्विशेषकम्]

ततः सहेलं तामेत्य, प्राह जीमूतवाहनः ।
प्रागुपायनकर्पूरमिव दन्तांऽशुभिर्दिशन् ! ॥२४॥

आचाररुचिरः कोऽयं, क्रमस्ते चारुलोचने !? ।
सम्भाव्यते न यत्पूर्वं, स्वागतात् प्रणयीजनः ॥२५॥

उक्त्वेति तन्मुखाऽम्भोजन्यस्तलोचनषट्पदः ।
अपृच्छत्तत्सखीं कर्णे, कुण्डलोद्योतिताऽऽननाम् ॥२६॥

कुलाऽलङ्करणं कन्या, कस्येयं ललिताऽऽकृतिः ? ।
इत्युक्ता तेन सा प्राह, सखी प्रणयमन्थरम् ॥२७॥

विश्वावसोः सिद्धपतेर्वंशमुक्तालता सुता ।
इयं मलयवत्याख्या, नित्यं देवीस्तुतिव्रता ॥२८॥

निवेद्येति सखी क्षिप्रं, तद्वयस्यादथाऽशृणोत् ।
जीमूतवाहनकथां, प्राज्याऽभिमानशालिनीम् ॥२९॥

इयमालोक्यते दृग्भ्यां, तदेतज्जन्मनः फलम् ।
इति ब्रुवाणे साऽऽनन्दं, विद्याधरनराऽधिपे ॥३०॥

आहूता सा प्रतीहार्या, प्रतस्थे मातुरन्तिकम् ।
न्यस्तं त्वयि मनः पाल्यमिति वाग् नूपुराऽऽरवैः ॥३१॥

सुकुमारेण मनसा, वहन्ती तं महाभुजम् ।
निजमन्तःपुरं प्राप्य, निःश्वसन्ती श्लथांऽशुका ॥३२॥

पपात शयनोत्सङ्गे, दृष्टा मकरकेतुना ।
तस्याः प्रववृधे क्षिप्रं, स कोऽपि विरहाऽनलः ॥३३॥ [युग्मम्]

सा लज्जातरला प्राह, तां सखीं पार्श्ववर्त्तिनीम् ।
किं करोमि ? क्व गच्छामि ? कस्यैतत्कथयामि च ? ॥३४॥

अयं कन्याविरुद्धो मे, क्रमः कामेन निर्मितः ।
दूत्यादिशामि सन्देशं, प्रयामि स्वयमेव वा ॥३५॥

किञ्च सन्दिश्यते तस्मिन्, किञ्च वा स्वयमुच्यते ? ।
सर्वथाऽनर्थसार्थेऽस्मिन्, मरणं शरणं मम ॥३६॥

वयस्यामभिधायेति, तूष्णीकाऽभून्मृगेक्षणा ।
जीमूतवाहनोऽप्यस्मिन्, क्षणेऽभूद्विरहाऽऽतुरः ॥३७॥

तं ध्यानमूकमभ्येत्य, क्षामं मधुकरः सखा ।
उवाच विप्लवः कोऽयं, तवाऽपि मनसः सखे ! ॥३८॥

प्रत्यग्रचन्दनदलैः, कल्पिते सुहृदा ततः ।
निषण्णः शयने प्राप, न स सन्तापतानवम् ॥३९॥

अत्राऽन्तरे मलयवत्यभ्येत्य विरहाऽसहा ।
क्वाऽप्याऽऽश्रमतरुलताप्रान्ते पाशमकल्पयत् ॥४०॥

ततः प्रणम्य सा देवीं, हा ! तातेति विलप्य च ।
विधाय साऽश्रुनयनास्तत्र बालमृगाऽङ्गनाः ॥४१॥

जीमूतवाहनो भूयादन्यस्मिन्मे सुजन्मनि ।
पतिरित्यभिधायाऽभूत्, सा पाशाऽभिमुखी क्षणात् ॥४२॥ [युग्मम्]

तच्छ्रुत्वा सुहृदाहूतस्तूर्णं जीमूतवाहनः ।
छन्नस्तरुलताजाले, तच्छुश्राव ददर्श च ॥४३॥

देवी प्राह ततस्तुष्टा, पुत्रि ! मा साहसं कुरु ।
भविता चक्रवर्ती ते, भर्त्ता जीमूतवाहनः ॥४४॥

इति देवीवरं प्राप्य, सा ददर्श पुरःस्थितम् ।
जीमूतवाहनं हर्षलज्जामुकुलितेक्षणा ॥४५॥

तस्याः कण्ठस्थितं पाशबन्धं जीमूतवाहनः ।
चिच्छेद पाणिना दध्रे, करं पाशाऽपराऽधिनम् ॥४६॥

अत्राऽन्तरे समभ्येत्य, चेटिका तां व्यजिज्ञपत् ।
दिष्ट्याऽद्य वर्धसे देवि !, प्रस्तुतस्ते महोत्सवः ॥४७॥

त्वद्भ्रात्रा जनकाऽऽदेशादद्य विद्याधरेश्वरः ।
जीमूतकेतुपुत्रोऽसौ, वृतो जीमूतवाहनः ॥४८॥

तदेहि कल्पितोऽद्यैव, विवाहो जनकेन ते ।
इति श्रुत्वा च सा तूर्णं, प्रययौ चारुहासिनी ॥४९॥

जीमूतवाहनोऽप्याऽऽशु, समेत्य पितुरन्तिकम् ।
ततो महोत्सवाऽऽनन्दिविद्याधरशताऽनुगः ॥५०॥

परिणीय प्रियतमां, सोऽभूत् सम्भोगतत्परः ।
कदाचिदथ तद्भ्रात्रा, स मित्रावसुना सह ॥५१॥

चचाल जलधेर्वेलावनाऽन्तमवलोकयन् ।
ददर्श तत्र शिखराऽऽकारं ताराऽस्थिसञ्चयम् ॥५२॥ [त्रिभिर्विशेषकम्]

किमेतदिति ? तेनाऽऽशु, पृष्टो मित्रावसुस्ततः ।
उवाच गरुडेनाऽत्र, भक्षिता भुजगोत्तमाः ॥५३॥

सर्वक्षयभयात्ताार्क्ष्यस्ततोऽवासुकिनाऽर्थितः ।
विसृष्टं तेन वारेण, सदैकं नाऽगमत्त्यसौ ॥५४॥

अयमस्थिचयस्तेषामद्रिकूटसमुच्छ्रितः ।
उक्त्वेति जनकाऽऽहूतस्तूर्णं मित्रावसुर्ययौ ॥५५॥

जीमूतवाहनोऽप्येष, सर्पेषु करुणाऽऽकुलः ।
चचार तत्र संसारं, निःसारं कल्पयन् धिया ॥५६॥

ततो ददर्श करुणाऽऽक्रन्दशुष्काऽधराऽऽननां ।
वृद्धां स युवतिं चैकां, विलपन्तीं मुहुः शुचा ॥५७॥

आनन्दमिव साऽऽकारं, सन्तोषमिव जङ्गमम् ।
स्फुरत्स्फुटफणारत्नपुञ्जपिञ्जरिताऽम्बरम् ॥५८॥

संवीतरक्तवसनं, रक्तचन्दनचर्चितम् ।
नागकुमारमद्राक्षीच्छोष्यमानं तु वृद्धया ॥५९॥ [युग्मम्]

हा ! पुत्र ! नयनाऽऽनन्द ! सौन्दर्याऽमृतदीधिते ! ।
शङ्खपालमहावंशव्यक्तमुक्तामणिद्युते ! ॥६०॥

हा ! शङ्खचूड ! लावण्यनिधानमिदमेव ते ।
वपुर्गरुडचञ्चूग्रवज्रपातसहं कथम् ? ॥६१॥ [युग्मम्]

भीतेन नागराजेन, प्रेषितोऽसि गरुत्मते ।
द्विजिह्वासहस्रमध्यान्नैकयाऽप्यसि वारितः ॥६२॥

नाऽभूद्यत्र सुपुत्र ! प्राक्, क्लान्तिदुःखाऽर्त्तिरादितः ।
सुकुमारे शरीरेऽस्मिन् कस्ते त्राणं करिष्यति ? ॥६३॥

इति वदन्ती पुत्राऽऽस्यमाघ्राय विललाप सा ।
अथ युवतिरप्येवं, रुदत्यङ्गानि साऽब्रवीत् ॥६४॥

विनैनं नाथमधुनाऽञ्जनेनाऽलं दृशौ ! हि वाम् ।
शेखरेण शिरस्तेऽथ, केशाः ! पुष्पश्रिया च वः ॥६५॥

श्रवणौ ! कुण्डलाभ्यां वां, कण्ठ ! मुक्तास्रजा च ते ।
बाह्वङ्गदसुलक्ष्म्या वां, कङ्कणाऽऽद्यैश्च वां करौ ! ॥६६॥

विलीनं युवयोः पादौ !, नूपुराऽऽरवकौतुकम् ।
कौसुम्भाऽम्बरम्बऽशोभां च, दैवं क्षाम्यति नाङ्ग ! ते ॥६७॥

सखीभिः क्रीडनं दूरे, वसन्ताऽऽदिमहोत्सवे ।
कश्मीरजाऽङ्गरागोऽपि, स्मर्तव्योऽभूदतः परम् ॥६८॥

यतः कोऽप्यस्ति न त्राता, प्राणेशस्याऽन्तमीयुषः ।
रोदयन्ती लताकुञ्जं, सा रुरोद मुमूर्च्छ च ॥६९॥

जीमूतवाहनोऽभ्येत्य, द्रागुवाच कृपाऽऽकुलः ।
मातः ! स्थितोऽस्मि ते पुत्रपरित्राणकृते क्षणम् ॥७०॥

परोपकारः संसारे, निःसारे प्राप्यते कुतः ? ।
अयमेव सदाऽपाये, काये सारसमुच्चयः ॥७१॥

यत्प्रयाति पराऽपायत्राणसत्पुण्यपात्रताम् ।
इत्याकर्ण्य च सा त्रस्ता, सुपर्णाऽऽशङ्किनी ततः ॥७२॥

पुत्रमाच्छाद्य साऽऽशङ्का, सा पुनः प्रणनाम तम् ।
निजप्राणैरहं त्राता, तत्पुत्रस्येति सोऽभ्यधात् ॥७३॥

वृद्धाऽवदत्त्वं तनयः, शङ्खचूडाऽधिको मम ।
वह कल्पशतं धन्यां, पुत्र ! सौम्यामिमां तनुम् ॥७४॥

इति तस्या ब्रुवाणायां, शङ्खचूडोऽतिविस्मितः ।
तमभ्यधात् स्मितमुखो, ललाटरचिताऽञ्जलिः ॥७५॥

अभिनन्दितमेतत्ते, दर्शनं सत्त्वशालिनः ।
अहो ! यत्त्वं निजान् प्राणान्, मदर्थे दातुमुद्यतः ॥७६॥

सहामहे कथं नाम, तृणाऽर्थे रत्नविक्रयम् ।
न विना कौस्तुभं वाद्धौ, भाव्यन्यद्रत्नमुत्तमम् ॥७७॥

किन्तु माता मदीयाऽसावाश्वास्या भवता विभो ! ।
येन त्वं क्षणदृष्टोऽपि, साधुः सुचिरबान्धवः ॥७८॥

इति नागकुमारस्य, वचः श्रुत्वा कुलोचितम् ।
जीमूतवाहनः प्राह, बत ! चित्रं प्रभाषसे ॥७९॥

वृद्धेयं त्वां विना पुत्रं, कुलाऽलङ्कारणं सखे ! ।
कथं जीवति दुःखं हि, जननीनां सुदुस्सहम् ॥८०॥

एनां त्रातुं स्वमात्मानं, रक्ष त्वज्जीविता ह्यसौ ।
किञ्चैषा प्राणदयिता, किं जीवति विना त्वया ॥८१॥

द्वयोः प्राणपरित्यागे, विद्वन् ! मा कारणं भव ।
मदीयेन शरीरेण, त्रयं पाहि महामते ! ॥८२॥

इत्युक्त्वा शङ्खचूडस्य, पादयोर्निपपात सः ।
प्रार्थितो मातृभार्याभ्यामप्यमन्यत नाऽपरः ॥८३॥

अभ्येति गरुडो याहि, यामि गोकर्णदर्शने ।
उक्त्वेति मात्राऽनुगते, याते तस्मिन् क्षणादभूत् ॥८४॥

उच्चण्डाऽकाण्डकल्पाऽन्तवातव्याकुलितं जगत् ।
उत्तस्थुर्मकरोत्फुल्लकरालाः सागरोर्म्मयः ॥८५॥

आगतं गरुडं ज्ञात्वा, सूचितं पक्षमारुतैः ।
आरुरोह मुदा वध्यशिलां जीमूतवाहनः ॥८६॥

विवाहांऽशुकसञ्छन्नः, स्थितस्तत्र व्यचिन्तयत् ।
सत्त्वोपकाराय पुनर्जन्म भूयान्ममेति सः ॥८७॥

ततोऽदृश्यत दिग्दाहदारुणच्छविरम्बरे ।
प्रलयाऽग्निशिखालोलपक्षाऽऽक्षेपः खगेश्वरः ॥८८॥

ततः स तस्य धैर्याऽब्धेर्विद्याधरशिरोमणेः ।
जहार शिरसः खण्डं, चूडारत्नेन मण्डितम् ॥८९॥

पुनः शरीरमादाय, तस्य तुण्डेन खेचरः ।
गगने वलयाऽऽकारं, चकार गतिविभ्रमम् ॥९०॥

तच्चञ्चुक्रकचभ्रष्टं, रक्तधारापुरस्सरम् ।
अङ्के मलयवत्यास्तच्चूडारत्नमथाऽपतत् ॥९१॥

तद्दृष्ट्वा मङ्क्षु सम्भग्ना शिरीषलतिकेव सा ।
जीमूतकेतवे तन्वी, परित्रस्ता न्यवेदयत् ॥९२॥

स्वविद्यया परिज्ञाय, स्वसूनोर्जीवितव्ययम् ।
भार्यास्नुषाभ्यां सहितः, सौपर्णीं तां शिलां ययौ ॥९३॥

व्यावृत्तः शङ्खचूडोऽपि, निवर्त्त्य जननीप्रिये ।
वपुर्गरुत्मते दातुं, द्राग् तां वध्यशिलां ययौ ॥९४॥

तत्राऽपश्यन्नखमुखोत्खातस्खलितशेखरम् ।
विद्याधरेन्द्रमादाय, तार्क्ष्यमुत्पतितं दिवि ॥९५॥

तं वीक्ष्य साऽश्रुनयनो विना घातं विदारितः ।
आत्मानं तद्वधे मत्वा, कारणं विललाप सः ॥९६॥

हा ! सत्त्वविपुलौदार्यधैर्यगाम्भीर्यसागर ! ।
हा ! पूर्णकरुणाऽऽवास ! हा ! निष्कारणबान्धव ! ॥९७॥

इति शोचन् स पदवीमनुसर्त्तुं गरुत्मतः ।
जगाम जीवितत्यागदृढीकृतसुनिश्चयः ॥९८॥ [युग्मम्]

आस्वाद्याऽऽस्वाद्य तार्क्ष्योऽपि, गिरौ जीमूतवाहनम् ।
क्षिप्रं स्थगितसंरम्भः, प्रदध्यौ विस्मयाऽऽकुलः ॥९९॥

अहो ! नु सत्त्ववानेष, कोऽपि धैर्यमहोदधिः ।
भक्ष्यमाणस्य यस्याऽङ्गे, जायन्ते पुलकाऽङ्कुराः ॥१००॥

प्रसन्नवदनः क्षिप्तशेषजीवोऽपि वर्त्तते ।
चिन्तयित्वेत्यपृच्छत्तं, कोऽसीति विनिताऽऽत्मजः ? ॥१०१॥

स तं प्राह किमेतेन, तव भक्षय मामिति ।
अस्मिन्नवसरेऽभ्येत्य, शङ्खचूडस्तमब्रवीत् ॥१०२॥

हा हा !! मा मा कृथास्तार्क्ष्य !, साहसं किं न पश्यसि ? ।
अस्य विद्याधरेन्द्रस्य, स्वस्तिकाऽङ्कमुरस्तटम् ॥१०३॥

अहं स नागस्ते भक्ष्यः, पश्य जिह्वालताद्वयम् ।
विस्फूर्जद्विषहुङ्काररत्नस्फीताः फणाश्च मे ॥१०४॥

इत्युक्त्वा विपुलं वक्षः, प्रसार्योत्तानविग्रहः ।
तूर्णं मां भक्षयेत्याह, स सुपर्णं पुनः पुनः ॥१०५॥

ततोऽस्थिशेषं तं त्यक्त्वा, विषण्णे पन्नगेश्वरे ।
जीमूतवाहनवधूर्गुरुभ्यामाययौ सह ॥१०६॥

दृष्ट्वा मलयवत्यग्रे, प्राणनाथं तथाऽऽगतम् ।
मुमोहाऽपूर्वशोकाऽग्निधूमेनेवाऽन्धकारिता ॥१०७॥

जीमूतकेतुस्तनयं, विलोक्य सह जायया ।
पपाताऽऽमूलनिर्ल्लून, इव चन्दनपादपः ॥१०८॥

ताक्ष्र्येणाऽऽश्वास्यमानेषु, तेषु जीमूतवाहनम् ।
संस्पृश्य पाणिना माता, शुशोच करुणस्वनम् ॥१०९॥

मुहूर्त्तशेषजीवोऽपि, सोऽब्रवीज्जननीं शनैः ।
मातर्विनश्वरस्याऽस्य, किं शरीरस्य शोच्यते ? ॥११०॥

भवेऽस्मिन् पवनोद्भ्रान्तवीचिविभ्रमभङ्गुरे ।
जायते पुण्ययोगेन, पराऽर्थे जीवितव्ययः ॥१११॥

उक्त्वेति वेदनामूर्च्छामाजगाम महीपतिः ।
पतिमार्गमनुसृत्याऽमूर्च्छन्मलयवत्यपि ॥११२॥

सा मूर्च्छाऽन्तेऽथ सस्मार, देवीं तां स्ववरप्रदाम् ।
सा साक्षादेव भूत्वा च, तद्वल्लभमजीजिवत् ॥११३॥

चक्रवर्त्तिश्रियं चाऽस्मै, दत्त्वा क्षिप्रं तिरोदधे ।
ततो देवाः सगन्धर्वास्तस्य सत्त्वमपूपुजत् ॥११४॥

गरुडोऽप्यथ हृष्टाऽऽत्मा, वरदस्तेन याचितः ।
प्रददौ सर्वनागानां, पुण्यामभयदक्षिणाम् ॥११५॥

पितृभ्यां प्रेषितो हर्षात्, स्वराज्यस्योद्दिधीर्षया ।
स प्राप काञ्चनपुरं, व्योम्नैव दयितासखा ॥११६॥

जीमूतवाहनकथा समाप्ता ॥ ग्रन्थाऽग्रम् ११६॥

सत्यहरिश्चन्द्रकथा

इति बौद्धं वचः श्रुत्वा, राजा श्रीमानजासुतः ।
जहर्ष यत्प्रहृष्यन्ति, सात्त्विकाः सत्त्वदर्शनात् ॥१॥

सुबुद्धिसचिवेनाऽथ, वीक्षिते प्राह तापसः ।
मन्त्रिन् ! श्रीमदजापुत्रसत्त्वे कः स्यान्निदर्शनम् ? ॥२॥

सत्त्वं हि जीवितं नृणां, सत्त्वमेव हि कीर्त्तये ।
विना सत्त्वं पुमांसोऽपि, स्त्रीपङ्क्त्याऽऽसनभाजनम् ॥३॥

भाव्येवं श्रूयते जम्बूद्वीपेऽयोध्याऽस्ति पूर्वरा ।
सापत्न्यं यत्र दुःखेन, न सौख्यस्य वपुष्मताम् ॥४॥

जम्बूद्वीपस्थितिरिव, रम्यकविजयाऽन्विता ।
सदा यतिप्रशस्या च, नभःश्रीरिव या खलु ॥५॥

वेदपाठनिकेवाऽथ, सदा यज्ञोपशोभिता ।
विन्ध्याऽचलधरित्रीव, नानावंशोपसेविता ॥६॥

इतस्ततः स्वाऽवस्थानाऽदत्तसञ्चारमन्दिराः ।
दत्ता अप्यर्थिनेऽमर्षाद्यत्राऽऽयान्ति पुनः श्रियः ॥७॥

तस्यां पाति प्रजा राजा, हरिश्चन्द्रो महाभुजः ।
यन्नीतिदूतिका कीर्त्तिधर्मयोः सङ्गमं व्यधात् ॥८॥

यन्न्यायकोमलकरैः, स्पृष्टा पूस्तरुणी बहिः ।
रोमाञ्चोपचितेवाऽभूद्रत्नगेहप्रभाऽङ्कुरैः ॥९॥

अन्यदा रात्रिपर्यन्ते, सुखसुप्तो महीपतिः ।
स्वप्नेऽशृणोदिमामार्यां, सत्त्वाऽम्भोनिधिकौमुदीम् ॥१०॥

आर्या– सत्त्वं प्रतिभूः सम्पदमर्पयितुं तन्न तच्छ्लथं कार्यम् ।
मुखसौरभकारि यतः कर्पूरं रक्ष्यते यत्नात् ॥११॥

एनां श्रुत्वा पठन्नेव, जहौ निद्रां महीपतिः ।
पुनः पुनः परावृत्तेः, प्रशशंसाऽर्थगौरवम् ॥१२॥

यावत्तल्लीनहृदयो हरिश्चन्द्रः पठन्नभूत् ।
नभःस्थस्तावदूचेऽथ, तापसः कोऽपि भीतिभाक् ॥१३॥

महाराज ! हरिश्चन्द्र !, त्वयि शासति मेदिनीम् ।
नाऽभूद्भयाऽवकाशोऽपि, स्वस्थे चेतसि देहिनाम् ॥१४॥

परन्त्वकस्मादस्माकमाश्रमे सुतपस्विनि ।
पठल्लघुतरच्छात्रे, पात्रे फलितभूरुहाम् ॥१५॥

कुतश्चिदपि कोऽप्येत्य, वराहो विकटाऽऽकृतिः ।
इतस्ततः परिभ्राम्यन् मृद्नन्नास्ते लताद्रुमान् ॥१६॥ [युग्मम्]

ततस्त्रायस्व तस्मान्नस्त्यक्तशस्त्रांस्तपस्यतः ।
पुरामिवाऽऽश्रमाणां च, त्राता येन त्वमेव हि ॥१७॥

इति प्रोच्चैर्ब्रुवाणेऽस्मिन्, राजा ससम्भ्रमोत्थितः ।
एष हन्मि दुरात्मानं, क्रोडं प्रत्यशृणोदिति ॥१८॥

तडिद्वत्तापसः शीघ्रं, बभूवाऽगोचरे दृशोः ।
प्रातःकृत्यानि कृत्वाऽथ, राजा पर्याणयद्धयम् ॥१९॥

सन्नह्यदेवमुक्त्वाऽथ, सैन्यमुक्तमना नृपः ।
व्यापिपादयिषुः स्वेन, वराहं निरगात् पुरात् ॥२०॥

मनोजवमथाऽऽरुह्य, गच्छत्यश्वे स भूपतिः ।
अभिमुखाऽऽयातमिव, वनं तदासदत्क्षणात् ॥२१॥

अपश्यच्छरयूं क्रीडाकलहाऽऽकुलहंसकान् ।
पुत्रानिवाऽब्जशय्यायां, दोलयन्तीं करोर्म्मिभिः ॥२२॥

राजाऽपृच्छत् कपिञ्जलकुन्तलौ पार्श्ववर्तिनौ ।
क्व ? स वराहस्तावप्यूचतुर्नाथाऽयमग्रतः ॥२३॥

वराहस्तद्वचः श्रुत्वा, घुर्घुरायितमुच्चकैः ।
कुर्वाणोऽभिनृपं क्रोधाद्दधावे शौर्यपर्वतः ॥२४॥

लघुहस्तस्ततो राजा, रोमाञ्चाऽञ्चितविग्रहः ।
अलञ्चकार कोदण्डं, तच्छौर्यान्मानदण्डवत् ॥२५॥

रोदसी इव टङ्कारैः, पूरयंस्तद्वपुः शरैः ।
वराहं पातयामासाऽद्रिपक्षमिव वासवः ॥२६॥

ततः कपिञ्जलं प्राह, राजा पश्याऽग्रतः कियत् ।
लक्ष्यमेतच्चलं भिन्नं, सोऽप्युपेत्य तथाऽकरोत् ॥२७॥

स्वेनैत्य पश्य मित्रेति, प्रोक्तस्तेन नृपो द्रुतम् ।
ददर्श रुधिराऽऽक्लान्तं, तडित्वन्तमिवाऽम्बुदम् ॥२८॥

उवाच च नृपोऽत्रेयमतैरिश्ची यथाऽऽकृतिः ।
तथा मन्ये वराहेण, भाव्यं दिव्येन केनचित् ॥२९॥

कुन्तलः प्राह मित्रैष, द्वीपी च निहतः शरैः ।
कलाऽन्तरमिव मूलद्रव्यस्याऽभूदिदं खलु ॥३०॥

राजा प्राह पुनरिदं, किं ? स प्राहाऽस्त्वनीक्षितम् ।
गत्वाऽपश्यत्स्वयं राजा, लुठद्गर्भां हतां मृगीम् ॥३१॥

विषण्णः प्राह भूपो धिग्, मामेणीभ्रूणघातिनम् ।
अशक्तः शत्रुभिर्योद्धुं, पशून् निहन्ति मादृशः ॥३२॥

इयतः कल्मषाच्छुद्धिः क्व ? मे किं कुर्वतः ? कथम् ? ।
दुर्व्यापारजुषः कः स्यादाश्रयो मे विना मुनीन् ?॥३३॥

तद्व्रजाम्याश्रमं पुण्यं, यत्र सन्ति तपोधनाः ।
मोक्षाऽऽसक्तिलग्नके धर्मकर्मणि प्रवणा हि ये ॥३४॥

अब्जवासवशाद्भग्नकण्टकेवाऽस्थिरक्रमा ।
अम्भोधिजलसंसर्गान्नीचाऽभिगमलालसा ॥३५॥

हस्तिकुम्भस्थलाऽऽवासाद्दत्तरागा वपुष्मताम् ।
भटकृपाणसौहार्दान्मारणाऽन्ताऽऽपदाऽऽवहा ॥३६॥

श्रीरेषा कुलटेवाऽत्र, कं नाऽऽश्लिष्यति रागिणी ? ।
विरागिणी न कं क्रूरा, विडम्बयति मानवम् ॥३७॥ [त्रिभिर्विशेषकम्]

ईदृश्याऽप्यनयाऽऽकृष्टविवेकचक्षुषोऽधमाः ।
अन्धा इव न पश्यन्ति, कृत्याऽकृत्यपथं हहा !! ॥३८॥

मुनिभिः श्लाघितं मार्गमुत्सृज्य श्रियमिच्छवः ।
तदुपायमिवाऽन्यायं, पुरस्कुर्वन्ति धीजडाः ॥३९॥

इति मृगाऽङ्गनाघाताद्विरक्तो लोकवर्त्मनः ।
प्रविवेशाऽऽश्रमं पद्भ्यां, सखिभ्यां सह भूपतिः ॥४०॥

पठल्लघुतरच्छात्रघोषाऽपास्ताऽघपक्षिणम् ।
पुण्यैः फलिनमालोक्याऽऽश्रमं स मुमुदे नृपः ॥४१॥

दृष्ट्वा कुलपतिं राजा, सन्तोषात् प्रणनाम तम् ।
उद्गृणन्नाशिषं राज्ञः, पृष्ठे पाणिं न्यधान्मुनिः ॥४२॥

क्षत्रेणोऽपचिते प्रतापजलदोन्मीलद्यशःपाथसा,
पूर्णेऽपासितकण्टके स्वविषयक्षेत्रे महीशासन ! ।
लक्ष्मीशालिलताः खलेषु मिलतीरुन्मूल्य मूलादपि,
स्वेनाऽऽरोपयतस्तवाऽस्तु कृतिनः श्लाघैव तद्गोपिका ॥४३॥

इत्याशीर्मुखरे तस्मिन्, राजा पप्रच्छ सादरम् ।
कश्चित्तपसि वः क्षेमः ?, कौशलं मृगभूरुहाम् ? ॥४४॥

मुनिराह न नो विघ्नास्त्वयि पात्याऽऽश्रमान्नृप ! ।
किं स्तृणाति जगद्ध्वान्तमुदिते द्युतिमालिनि ? ॥४५॥

अस्मिन्नवसरे क्वाऽपि, जातः कोलाहलो महान् ।
सम्भ्रमान्मुनिना प्रोक्तः, शिष्यो ज्ञातुं जगाम तम् ॥४६॥

अभूच्च दूरेऽब्रह्मण्यमब्रह्मण्यमिदं वचः ।
श्रुत्वा च मुनिभूपालौ, किमेतदित्यवोचताम् ? ॥४७॥

पुनरार्त्तः स्वरो जज्ञे, स्त्रीणां शोकस्पृशामिति ।
मातश्चेन्मे मृगी मर्त्ता, करिष्येऽनशनं तदा ॥४८॥

माताऽपि प्राह चेद्वत्से ! करोष्यनशनं किल ।
तदाऽहमपि कर्त्ताऽस्मि, विना त्वां जीवितेन किम् ? ॥४९॥

श्रुत्वा कुलपतिश्चैतद्धृदयं स्फोटयद्वचः ।
किं नः प्राणप्रियापुत्री वञ्चनाऽनशनीयति ? ॥५०॥

इयं च निःकृतिर्नूनमस्मत्सद्धर्मचारिणी ।
वत्सामनुसरत्येतत्, प्रोचे किमसमञ्जसम् ? ॥५१॥

शिष्यो ज्ञात्वा ह्युपसृत्याऽऽख्यत् कर्णे निभृतं मुनेः ।
आः ! किमेतदित्यूचानः, स तापस्यावजूहवत् ॥५२॥

ततः प्रविशतस्तारं रुदती वञ्चना मुहुः ।
सास्रं प्रकुर्वती भूपं, निःकृतिः सान्त्वयन्त्यथ ॥५३॥

उवाच वञ्चनां मायी, मुनिः किं पुत्रि ! रोदिषि ? ।
साऽख्यद्दुरात्मकः कोऽपि, मद्वयस्यामहन्मृगीम् ॥५४॥

ऊचे कुलपतिः सास्रं, या किलाऽऽसीत् प्रजावती ।
हहा !! तां निघ्नता तेनाऽऽनीतोऽस्माकं कुलक्षयः ॥५५॥

विना मृगीं कथं जीवेद्वत्सा तज्जीविता ह्यसौ ? ।
न प्राणिति विना पुत्रीमस्मत्प्रणयिनी खलु ॥५६॥

विना सधर्मचारिण्या, कुतो मे तपसां विधिः ? ।
तपोविधिमृते मे स्याद्ब्राह्मण्यमनघं नहि ॥५७॥

आः ! किमस्मात्परं भावि ?, येनाऽराजन्वती मही ।
मृगयाव्यसनात्पापैर्हता यद्गर्भिणी मृगी ॥५८॥

विषीदन्तं स्वयं भूपमूचे कुलपतिस्ततः ।
ज्ञात्वा कुतोऽपि तं सार्धिं, राजन् ! येनाऽसि रक्षकः ॥५९॥

वञ्चना त्वाह मां तात !, चितामारोढुमादिश ।
किं न वेत्सि ममैण्या हि, मरणं क्रकचायते ? ॥६०॥

सानुतापं नृपः प्रोचे, मुने ! कुर्वेऽहमत्र किम् ? ।
परेषां दण्डमाधातुमलमेषोऽस्मि नाऽऽत्मनः ॥६१॥

सौत्सुक्यं च मुनिः प्रोचे, राजन् ! किमुक्तवानसि ? ।
मया व्यापादिता सैषा, त्वदेणी निशितैः शरैः ॥६२॥

पश्चात्तापात्स्वमात्मानं, प्रणिन्दति महीपतौ ।
पिधाय वाससा वक्त्रं, पूच्चक्रेऽथ स मायिकः ॥६३॥

ऊचे च क्रुधमारूढो, राजानं वहसीह भोः ! ।
शरधिं धनुश्च हन्तुं, त्यक्तशस्त्रांस्तपस्विनः ? ॥६४॥

निपत्य पादयो राजा, विनयान्मुनिमब्रवीत् ।
तमेकमपराधं मे, क्षमस्व त्वं क्षमानिधे ! ॥६५॥

मुनिः पराङ्मुखो भूत्वा, चुक्रोश नृपमुच्चकैः ।
भरतकुलचन्द्राऽङ्क !, व्रज व्रज ममाऽऽश्रमात् ॥६६॥

युष्मादृशां निर्घृणानां, श्रुता वागपि पाप्मने ।
किं पुनः कर्मचाण्डाल ! वाचाल ! सङ्गमस्त्वया ? ॥६७॥

राजा सविनयं प्राह, मुने ! ब्रूहि करोमि किम् ? ।
विशाम्यग्निं ? त्यजामि क्ष्मां ?, चरामि व्रतमेव वा ? ॥६८॥

सकोपं स मुनिः प्रोचेऽद्याऽपि श्रावयसे गिरम् ।
मायाविन् ! हरिणीभ्रूणघातपातकपङ्किलाम् ॥६९॥

ततोऽङ्गारमुखोऽवादीत्प्रसादं कुरु मा रुषः ।
तपस्तेजोनिधे ! नाऽयं, राजाऽपमानमर्हति ॥७०॥

किन्तु दुष्कर्मणोऽमुष्य, पवित्रीकारकारणम् ।
शास्त्राऽनुपाति यत् किञ्चित्तदेवाऽऽशु समादिश ? ॥७१॥

मुनिरूचेऽङ्गारमुख !, शुद्धिस्तदाऽस्य जायते ।
सर्वस्वं यद्यसौ दत्ते, दानं ह्यघनिवृत्तये ॥७२॥

सोच्छ्वासं नृपतिः प्रोचे, प्रसीद भगवन् ! मयि ।
सर्वस्वं मे गृहाण त्वं, विलयं यात्वघं मम ॥७३॥

किं न प्राप्तं मया त्रातः !?, शुद्ध्यामि यद्यतस्ततः ।
सग्रामाऽश्वेभकोशाभूर्दत्ता तेऽम्बुधिमेखला ॥७४॥

प्रणम्य मुनिमङ्गारमुखोऽवादीत्कृताऽञ्जलिः ।
राजा यदभिधत्तेऽसौ, प्रतिपद्यस्व तत् किल ॥७५॥

अथाऽपवार्य राजानमूचतुः सुहृदौ मृदु ।
अकाण्डे कोऽयमुत्पातो ?, राजन् ! विमृश मा मुह ॥७६॥

राजाऽवज्ञाय तद्वाचमूचे सप्रश्रयं मुनिम् ।
मदुक्तं भगवन्नस्तु, गृहाण वसुधामिमाम् ॥७७॥

क्षामाऽक्षरं मुनिः प्राह, दत्ताऽस्मभ्यं मही त्वया ।
नाऽर्हस्यतःपरं पृथ्व्या, भोगमामेति सोऽब्रवीत् ॥७८॥

हरिश्चन्द्रेण पृथ्वी मे, दत्तेत्यर्थे भवान् खलु ।
साक्षीति वाराणसीयं, कोटिल्यमादिशन्मुनिः ॥७९॥

कौटिल्योऽप्यवदद्राजन्नत्राऽर्थे साक्षिणो वयम् ।
ओमित्युक्ते नृपेणाऽगात्, स स्वस्थानं मुदं नृपः ॥८०॥

अथ व्यजिज्ञपत् कोऽपि, शिष्यो यावदियं मृगी ।
तिष्ठेद्विपन्ना तावन्न, पाठस्तत्क्रियतां किमु ? ॥८१॥

खेदात् कुलपतिः प्रोचेऽस्याः कारयाऽग्निसंस्कृतिम् ।
वञ्चनाऽऽह मया सार्धं, तस्याः स्यादग्निसंस्कृतिः ॥८२॥

राजा तां विनयादूचे, ममैकं दुर्नयं सह ।
अहं तुभ्यं हि दास्यामि, स्वर्णलक्षमसंशयम् ॥८३॥

कष्टादिव तयाऽप्योमेत्युक्ते प्राह मुनिस्ततः ।
दीयतां तर्हि हेमाऽस्यै, राजाऽऽहाऽऽयात मत्पुरे ॥८४॥

सन्ध्याविधिं विधायाऽऽशु, पश्यैते वयमागताः ।
इत्याकर्ण्य नृपोऽयोध्यां, यानश्रौषीदिमां गिरम् ॥८५॥

तेजोऽखिलभुजो वह्नेर्मुखे क्षिप्त्वा पदं निजम् ।
दत्त्वर्षिभ्यो निष्प्रतापोऽस्ताऽद्रिं हा ! याति गोपतिः ॥८६॥

न मङ्गलमिदं किं वा, नाऽन्यथा भावि भावि च ।
इति निश्चित्य राजा द्राग्, निजं धाम जगाम सः ॥८७॥

कुन्तलाज्ञातवृत्तान्तो, वसुभूतिर्व्यचिन्तयत् ।
अपर्यालोचितकार्या, राजानः स्वोपघातकाः ॥८८॥

ददता वसुधां तस्मै, तापसाय दुरात्मने ।
देशाद्देशे प्रवासो हा !, स्वीकृतो भूभुजा स्वयम् ॥८९॥

यदन्येनाऽदृष्टचरो, वराहं कोऽप्यवेदयत् ।
भूभुजे तत्प्रपद्येऽहं, दिव्यमेतद्विजृम्भितम् ॥९०॥

अविमृष्टाऽऽयतिर्भूपः, क्षीयते न्यायवानपि ।
अत एव विमृष्टारः, सन्निधेयाः सुमन्त्रिणः ॥९१॥

किं कुर्मो ? दुर्धियः कुर्युर्यत्किञ्चन महीभुजः ।
तत्तत्प्रतिक्रियाव्यग्रैः, क्लिश्यते सचिवैः पुनः ॥९२॥

विमृश्यैवं तदाऽमात्यः, सशल्य इव निःश्वसन् ।
विलासमण्डपेऽह्नाय, चिन्ताभाग् नृपतिं ययौ ॥९३॥

प्रणम्योपविष्टे तस्मिन्, मन्त्रिणं प्राह भूपतिः ।
वराहाऽऽवेदकस्याऽग्रे, प्रतिज्ञातमकृष्महि ॥९४॥

मन्त्री प्रोचे महीनाथ !, तद्वृत्तं ज्ञातवानहम् ।
वच्मीदं कृत्यविदुरप्रभुत्वं कस्य नो मुदे ? ॥९५॥

यस्मिन्ननुचरः स्तौति, ह्यकृत्यमपि कृत्यवत् ।
विजिज्ञपयिषुः किन्तु, किञ्चित् श्रोत्रकटु त्वहम् ॥९६॥

स्वैरं विज्ञपयेत्युक्तो, राज्ञा मन्त्र्याह नीतिवित् ।
नाथाऽयं वसुधात्यागो, नहि मे प्रतिभासते ॥९७॥

राजाऽऽह सत्यं सचिव !,किन्त्विदं चार्वचारु वा ।
प्रारम्भाद्युज्यते पूर्वं, निर्वाहोऽङ्गीकृते पुनः ॥९८॥

किञ्च यान्तु श्रियो नाशं, प्रयातु निधनं कुलम् ।
प्रवासो वास्तु निर्वाहः, प्रतिज्ञाते भवेद्यदि ॥९९॥

तदलमनया पूर्वकृतमीमांसयाऽधुना ।
स्वर्णलक्षं हि ढौकस्व, स्वेनाऽऽयाति मुनिर्यतः ॥१००॥

ततः सशिष्यः स मुनिः, कुर्वन्नाऽऽगान्नृपस्तुतिम् ।
अहो ! अगोचरे वाचां, राज्ञोऽस्य चरितं महत् ॥१०१॥

मायया सकोप इव, पुरोभूय नृपस्य सः ।
अययाचत्स्वशिष्येण, स्वर्णलक्षं महीपतिम् ॥१०२॥

नृपाऽऽदेशादथाऽऽदिक्षत्, स मन्त्री कुन्तलं ततः ।
सोऽपि स्वर्णं समादाय, नृपाऽग्रे मुमुचे ततः ॥१०३॥

राज्ञोक्तः सचिवस्तस्मै, तापसाय ह्युपानयत् ।
सोऽपि वीक्ष्य किमेतदित्यप्राक्षीन्नृपतिं मुनिः ॥१०४॥

राजाऽऽह वञ्चनास्वर्णं, कुत एतन्मुनिर्जगौ ।
अथाऽऽख्यन्नृपतिः कोशात्, बहिरन्तः स वा क्षितेः ? ॥१०५॥

इत्युक्ते मुनिना राजा, प्राह मध्ये क्षितेर्मुनिः ।
ब्रूते स्वामी क्षितेः कोऽत्र ?, राजाऽऽह त्वं न चाऽपरः ॥१०६॥

मुनिरूचेस्ततः कोऽयं, प्रकर्षः कौशलस्य ते ? ।
यन्मदीयेन हेम्ना मेऽनृणीभवितुमिच्छसि ? ॥१०७॥

विलम्बध्वं क्षणं यावदानयाम्यन्यदन्यतः ।
सकष्टमिव तस्थौ च, स मुनिर्भूभुजाऽर्थितः ॥१०८॥

ततो राजा मन्त्रिकर्णे, किमप्याचष्ट मन्त्र्यथ ।
केनचित्पुरुषेणाऽऽश्वाऽऽजूहवद्वणिजोऽखिलान् ॥१०९॥

मुनिना दिव्याशक्त्या ते, हरिश्चन्द्रे खलीकृताः ।
सम्भूय मन्त्रयामासुः, स्वामी नोऽतः परं मुनिः ॥११०॥

हरिश्चन्द्रस्य दत्तेन, किं द्रव्येण वृथाऽधुना ? ।
यो हि स्वामी पुरस्याऽस्य, देयोऽस्माभिः करोऽस्य तत् ॥१११॥

इति मन्त्रयतो मन्त्री, तानूचे रहसि स्थितः ।
राजा वोऽर्थयते स्वर्णमधमर्णो मुनेः स यत् ॥११२॥

पश्यतस्तान्मिथो वक्त्रं, स्वर्णदानेऽकृतोत्तरान् ।
हरिश्चन्द्रस्ततोऽभ्येत्य, स्वयमर्थयते स्म तान् ॥११३॥

हे पौरा ! वोऽञ्जलिर्बद्धो, दत्तस्वर्णं कियन्मम ? ।
कुतश्चिदपि याचित्वा, दास्ये वः काञ्चनं पुनः ॥११४॥

अल्पद्रव्या वयं स्वर्णलक्षं दातुं न शक्नुमः ।
इत्यूचिवांसो वणिजो, राज्ञाऽऽऽदिष्टा ययुर्गृहान् ॥११५॥

विलक्षो नृपतिर्दध्यौ, किं करोमि ? कुतः पुनः ।
समानयामि तत्स्वर्णं ?, हा धिक् कीदृगुपस्थितम् ? ॥११६॥

ततः कुलपतिः कोपकम्पमानाऽधरोऽवदत् ।
विलम्बः कोऽयमद्याऽपि ?, राजन् ! विसृज मां ततः ॥११७॥

वसुभूतिर्मुनिं प्राह, विश्वदृश्वा त्वमस्यथ ।
हरिश्चन्द्रसमः क्वाऽपि, दृष्टः किं कोऽपि सात्त्विकः ? ॥११८॥

सोपहासमुवाचाऽथाऽङ्गारवक्त्रो न मन्त्र्यपि ।
दृष्टोऽभूत्त्वादृशो नाऽपि, हरिश्चन्द्रसमो नृपः ॥११९॥

नृपं प्रति मुनिः प्रोचे, मायाविन् ! किं वृथोदितैः ? ।
विहंसि मध्याह्नसन्ध्यां, सत्त्वं सत्यं च ते ह्यदः ॥१२०॥

ऊचेऽङ्गारमुखो राजन् !, किं वाञ्छसि त्वमात्मनः ? ।
कुलस्य यशसो लोकस्याऽऽकस्मिकं क्षयं क्षणात् ? ॥१२१॥

प्रणम्योचे नृपो भीतस्त्वत्तः किं स्यात्क्षयोऽपि नः ? ।
उपपूर्वाऽचलं पश्य, ग्रहाणामुदयः खलु ॥१२२॥

निहन्ति पार्ष्णिना भूपं, मुनिर्ननाम तं नृपः ।
कोपे क्षान्तौ च तावेव, दृष्टान्तौ स्वस्य नाऽपरः ॥१२३॥

सरोषमङ्गारमुखो, भूपं प्राह नृपाऽधम ! ।
विप्लावयसि किं नस्त्वं, मृषाभाषामहोदधे !? ॥१२४॥

आहाऽङ्गारमुखं मन्त्री, विरोधस्ते मिथः कथम् ? ।
क्वेदृग् तपो ? रुषः क्वेमास्तन्मा ब्रह्म कलङ्कय ? ॥१२५॥

प्राहाऽङ्गारमुखः कोपादस्थापितमहत्तर ! ।
कोऽसि त्वं रे ! मम ब्रह्मचिन्तायां सचिवाऽधम !? ॥१२६॥

अरे राजन् ! त्वमेनं किमन्तराऽऽलापिनं बटुम् ।
न निवारयसि ? किं नोपनयसि च काञ्चनम् ? ॥१२७॥

कर्णेऽथ कथिते राज्ञा, ह्यानीयाऽऽभरणान्यपि ।
कुन्तलेनाऽर्पितान्येष, राज्ञोऽमूनीत्यपाकरोत् ॥१२८॥

कुन्तलो वसुभूतिश्चाऽऽहतुः कुलपते ! नृपः ।
यावद्ददाति ते स्वर्णं, तावदावां गृहाण भोः ! ॥१२९॥

मुनिराह त्वया जूर्णमार्जारेण करोमि किम् ? ।
अल्पेन कुन्तलेनाऽपि, कः स्वर्णं स्वमुपेक्षते ? ॥१३०॥

आदिक्षत् कुन्तलं राजा, देवीभूषणमानय ।
स ययाचे ततो देवीं, देव्याऽऽहैष्याम्यहं स्वयम् ॥१३१॥

तेनाऽऽदिश्यमानमार्गा, रोहिताऽश्वेन संयुता ।
आययौ सदसि क्षिप्रं, सुतारा साऽवगुण्ठना ॥१३२॥

प्रणम्यैषा मुनिं प्राह, गृहाणाऽऽभरणं मम ।
मुनिराह पितुर्भर्त्तुर्वैतानि ? साऽब्रवीत्ततः ॥१३३॥

आर्यपुत्रेण मे योग्यं, नेपथ्यमिदमार्य्यत ।
मुनिराह ततः केयं, दक्षता ते पतिव्रते !? ॥१३४॥

ऊचेऽङ्गारमुखः किं न, जानासि त्वमियं किल ।
कैतवाऽम्बुधिचन्द्रस्य, हरिश्चन्द्रस्य गेहिनी ? ॥१३५॥

या प्रदत्ते त्वदीयानि, तवैवेत्युदितेऽमुना ।
आबद्धभ्रकुटीभङ्गः, कुन्तलस्तु ततोऽवदत् ॥१३६॥

अरे तापस ! नो वेत्सि, देवीं सतीत्वशालिनीम् ।
तदेष त्वं न भवसीत्युक्त्वाऽथ सोऽवदन्नृपम् ॥१३७॥

विमृशाऽद्याऽपि मा मुह्य, किं स्यात्परिग्रहो यतेः ? ।
वाचश्चेमाः स्युरेते हि, मुनिव्याजेन राक्षसाः ॥१३८॥

ततः कुलपतिः क्रोधाद्गृहीत्वाऽम्भः कमण्डलोः ।
शृगालो भवेति भूमौ, मुमोचाऽञ्जलिवारि तत् ॥१३९॥

कुन्तलः शृगालो भूत्वा, शब्दं कुर्वन् ययौ क्वचित् ।
प्रसीद मा कुपः स्वामिन् !, मुनिमित्यनमन्नृपः ॥१४०॥

पादेनाऽऽहत्य परतः, क्षिपति क्ष्मापतिं मुनौ ।
रोहिताऽश्वो रुदन्नाह, मा स्म हन् पितरं मम ॥१४१॥

किन्तु मां हि गृहाण त्वमिति श्रुत्वा शिशोर्वचः ।
मुनिः साऽश्रुदृशीभूय, तुष्टाव हृदि तं शिशुम् ॥१४२॥

क्रूरीभूय ततः प्रोचे, सुतारां शिक्षितः शिशुः ।
त्वयाऽसौ साऽऽह कृत्येषु, नाऽयं शिक्षामपेक्षते ॥१४३॥

यतः– सहजस्फूर्तिसमृद्धो वृद्धोपास्ति विनाऽपि दक्षः स्यात् ।
विषमपहरति मणिर्यदि, तत्किमयं गारुडेऽधीती ? ॥१४४॥

राजाऽथ सास्रं दध्यौ च, यत् सजीवमजीवकम् ।
तद्दत्तं प्राग् भुवा सार्धं, ततः स्वर्णं ददे कुतः ? ॥१४५॥

विलम्ब्य काञ्चनं कृत्वा, कथञ्चिद्दातुमुत्सहे ।
इत्याह दैन्यात्स मुनिं, मासमेकं सहस्व मे ॥१४६॥

मुनिरूचे कथं पश्चाद्भिक्षयित्वा प्रदास्यसि ? ।
राजाऽऽहेक्ष्वाकवो भिक्षां, दातुं न लातुमर्थिनः ॥१४७॥

कुतस्तर्हीति तेनोक्ते, राजाऽऽह मुनिपुङ्गव ! ।
विक्रीय स्वमपीत्येतच्छ्रुत्वा मुनिर्विसिष्मये ॥१४८॥

वाचा तु प्राह कठिनः, पृथ्वीं मुञ्च ममाऽधुना ।
राजा प्राह क्व याम्यूचे, स यत्र नोपलक्ष्यसे ॥१४९॥

राजाऽऽह मे भुवं मुञ्च, त्वमितीदं कियद्वचः ? ।
हन्त ! पूरयितुं सन्धामिक्ष्वाकवस्त्यजन्त्यसून् ॥१५०॥

ततोऽपवार्य ते प्रोचुस्तापसा मुदिता मिथः ।
अहो ! सत्त्वमहो ! सत्यमहो ! सात्त्विकसूश्च भूः ॥१५१॥

विमृश्याऽऽह नृपो देवीं, गच्छाऽन्तःपुरमात्मनः ।
रोहिताऽश्वशिशुर्यस्मान्न सोढा खेदमध्वनः ॥१५२॥

साऽवष्टम्भं सुताराऽऽह, यद्भाव्यं तद्भवत्विह ।
आगमिष्याम्यहं सार्धं, त्वया छायेव निश्चितम् ॥१५३॥

पतिव्रते ! चलिताऽसि क्वेत्युक्ते मुनिनाऽऽह सा ।
प्रवासे ह्यार्यपुत्रेण, येन पत्यनुगाः स्त्रियः ॥१५४॥

ममाऽऽयत्तां हरिश्चन्द्रस्त्वां, नेष्यतीदमद्भुतम् ।
इत्युक्ते मुनिना प्राह, वसुभूतिः क्रुधा ज्वलन् ॥१५५॥

अये ! तापस ! नाऽसि त्वं, विज्ञो लोकस्थितेः खलु ।
विद्धीदानीं स्त्रियो भर्तृदेवता नाऽपराऽऽत्मिकाः ॥१५६॥

यत्प्राह व्यवहारज्ञस्त्वन्मन्त्री तत्र ते मतम् ? ।
इत्युक्ते तापसेनाऽऽह, नेति राजाऽपि सर्वदः ॥१५७॥

त्वं विस्रक्ष्यसि चेद्देवी, तदाऽऽयातु मया सह ।
देव्याह विसृज त्वं मां, मुने ! स प्राह याहि तत् ॥१५८॥

किन्तु मुक्त्वाऽऽभरणानि, यातेति मुनिनोदिते ।
राजाऽमुञ्चत् सुताराऽऽह, किञ्चिन्मेऽस्तु कुलोचितम् ॥१५९॥

मुनिराह हरिश्चन्द्रे, सत्यन्यत् किं कुलोचितम् ? ।
इति वाचि मुनौ सास्रा, सुताराप्यमुचत्ततः ॥१६०॥

मन्त्री प्राह मुनिं कोपादरे रे !!! ब्रह्मराक्षस ! ।
नृपो विज्ञो ददत्ते क्ष्मां, किमु गृह्णन्नितो भवान् ? ॥१६१॥

क्रुधा प्रोचे मुनिर्नाऽयं, कृत्येषु विदुरो नृपः ।
अहं विज्ञो न चाऽस्म्येष, विज्ञस्त्वं योऽन्तरायकृत् ॥१६२॥

कोपात्स निर्दशन्नोष्ठौ, गृहीत्वोज्झत् पयो भुवि ।
आह चाऽस्ति तपश्चेन्मे, तदा त्वं द्राक् शुको भव ॥१६३॥

ततश्च सचिवो भूत्वा, शुकोऽगान्नभसा क्वचित् ।
राजा तु सभयं नत्वाऽवोचदेष गतोऽस्म्यहम् ॥१६४॥

निवार्य रुदतो भूपः, पूर्लोकानन्वयप्रियान् ।
क्षमयित्वा स्वापराधान्, प्रतस्थे सप्रियासुतः ॥१६५॥

अनुरागाल्लुठद्बाष्पमनुयान्तं पुरीजनम् ।
कष्टान्निवर्तयामास, राजा स्नेहगिरा मृदु ॥१६६॥

चचाल सात्त्विकः पुत्रकलत्राभ्यां समन्वितः ।
कथं कथमपि प्रान्तमध्वनः प्राप भूपतिः ॥१६७॥

दूरमार्गपरिश्रान्ता, सुतारा नृपमब्रवीत् ।
कियदद्याऽपि गन्तव्यं ?, खिन्नान्यङ्गानि नाथ ! मे ? ॥१६८॥

उवाच नृपतिर्देवि !, मा ताम्य किं न पश्यसि ? ।
अभ्रंलिहगृहाऽकीर्णामाराद्वाराणसीं पुरीम् ॥१६९॥

अतीव यदि खिन्नाऽसि, वहन्ती पुत्रमात्मना ।
अनुगङ्गातटं रूढं, तदा चम्पकमाश्रयः ॥१७०॥

देव्या तथा कृते राजा, स्वेनैव समवाहयत् ।
यथासुखं तदङ्गानि, ततो देवी व्यचिन्तयत् ॥१७१॥

यदा हि सम्पदः पुंसां, तदा सर्वोऽनुगच्छति ।
इदानीमार्यपुत्रं यन्न कोऽप्यागादनुव्रजन् ॥१७२॥

यतः– स्तुत्यः स्तवीति सुखदं नमते नमस्यो,
मान्योऽपि मानयति कामयतेऽपि काम्यः ।
ब्रूमः किमन्यदनुगच्छति चाऽनुगम्यो,
यस्यां प्रसन्नदृशि नेच्छति कः श्रियं ताम् ॥१७३॥

स्वप्नदृश्या ततोऽभून्नः, सा सम्पद्यां विनाऽधुना ।
पद्भ्यां यानं क्षितौ शय्या, कदाहारो मनःक्लमः ॥१७४॥

इत्यूचाना पिधायाऽऽस्यं, रुरोदोच्चैर्नृपप्रिया ।
रोहिताश्वस्ततोऽरोदीद्भूत्वा साऽश्रु नृपोऽवदत् ॥१७५॥

मा रोदीर्भव धीरा त्वं, स्वीकुर्याः सात्त्विकव्रतम् ।
मा मा शोकपिशाचोऽस्मान्, गृह्णातु परितो भ्रमन् ॥१७६॥

रोहिताश्वस्ततः प्राह, पितर्बुभुक्षितोऽस्म्यहम् ।
राजाऽदिक्षदरे ! क्षिप्रं, देहि वत्साय मोदकम् ॥१७७॥

न कोऽपि यावदायाति, विलक्षो नृपतिस्ततः ।
किमिदमिति देव्योक्तः, पूर्वोऽभ्यासोऽब्रवीदिति ॥१७८॥

रोहिताश्वः पुनः प्रोचे, मातर्बुभुक्षितोऽस्म्यहम् ।
रुदती तारतारं सा, सुतारा पुत्रमब्रवीत् ॥१७९॥

चक्रवर्तित्वप्रतिभूलक्षणोपेतवर्ष्मणः ।
भरताऽन्वयजातस्याऽवस्था केयं तवाऽऽगता ? ॥१८०॥

अथ दध्यौ नृपः कीदृग्, राज्यस्य तादृशः फलम् ? ।
रुदतो यत्तनूजस्य, प्रातराशेऽप्यशक्तता ॥१८१॥

तावद्विनोदयाम्येनं, कौतुकप्रेक्षणाऽऽदिभिः ।
पश्येतः पुत्र ! गङ्गायां, मिथः क्रीडन्ति पक्षिणः ॥१८२॥

विप्रतारयति क्ष्मापे, रोहिताश्वं कुतूहलैः ।
आगादकस्मात्काऽप्येका, वृद्धा पाथेयमस्तका ॥१८३॥

पृच्छन्तं नगरीमार्गं, भूपं साऽहेदमद्भुतम् ।
चक्रिणो लक्षणान्यङ्गेऽवस्था च कथमीदृशी ? ॥१८४॥

कथा नः श्रूयमाणाऽपि, कातराणां भयाऽऽवहा ।
तन्मा पृच्छ पुरो गच्छ, राज्ञेत्युक्ता चचाल सा ॥१८५॥

मोदकं देहि मे मातः !, सुतारामिति भाषिणि ।
रोहिताश्वे ततो वृद्धा, निवृत्य तमढौकयत् ॥१८६॥

स्वयमलम्पटत्वेन, सात्त्विकाऽऽत्मजभावतः ।
बुभुक्षितोऽपि बालोऽपि, रोहिताश्वोऽग्रहीन्न तम् ॥१८७॥

नाऽनुकम्पप्रदानं ते, गृह्णीमो वयमध्वगे ! ।
प्रत्याख्यातेति राज्ञा सा, ययौ क्वाऽपि क्षणादपि ॥१८८॥

देवि ! चेद्गतखेदाऽसि, तदोत्तिष्ठ पुरीं प्रति ।
याम इत्थं नृपेणोक्ते, सुताराऽऽह सदद्गदम् ॥१८९॥

निजराज्यपरिभ्रंशलज्जासज्जमनाः कथम् ।
प्रवेक्ष्यत्यार्यपुत्रोऽत्र, वैरिपुर्यां स्थितद्विषि ? ॥१९०॥

साऽवष्टम्भं नृपः प्राह, का लज्जा सत्त्वशालिनाम् ? ।
पूर्णीकर्त्तुं निजां सन्धामापदो यदि तन्महः ॥१९१॥

सुताराऽऽह भवेद्दैवात्, सा काऽप्यापदतर्क्किता ।
यत्र स्वस्य पराभूतिर्वैरिवर्गस्य तूत्सवः ॥१९२॥

राजा प्रोवाच देवि ! त्वं, न विचार्य प्रभाषसे ।
लक्ष्म्या बलेन वा हीनः, स्यां चेत्ततः पराभवः ॥१९३॥

इदं पुरा कृतं कर्म, प्रभवत्केन वार्य्यते ।
तत्प्रभावाद्दशाऽस्माकं, यच्चैषा तद्द्विषां किमु ? ॥१९४॥

यतः— किं लब्धेन यतो जिहीर्षति ? किमु त्यक्तोन यद्दित्सते ?,
किं तुष्टेन यतो रुरोषयिषति ? स्नेहाऽनुकूलेन किम् ? ।

यद्द्विद्वेषयिषत्यतस्तनुभृतामिष्टं बलादन्यथा,
कुर्वाणं जयतीह कर्म न परस्तत्केन कीदृग्भवेत् ? ॥१९५॥

ततः प्रतिपुरीं राजा, प्रतस्थे प्रियया सह ।
तामाह स्यात्कुतः स्वर्णं, यदाऽऽसन्नोऽवधिर्मुनेः ॥१९६॥

मां विक्रीयाऽऽर्यपुत्राऽस्मै, तद्यच्छेति तयोदिते ।
राजाऽऽह विक्रयश्चेत्स्यात्, तत्सर्वेषां न कस्यचित् ॥१९७॥

रोहिताश्वोऽब्रवीत्तात ! मा विक्रेष्टाऽस्तु मां स्फुटम् ।
मातर्वारय तातं मां, विक्रीणानं पुरे धनैः ॥१९८॥

रुदत्याह सुतारा त्वं, चक्रवर्त्ती भविष्यसि ? ।
मा रोदीस्तिष्ठ वत्स ! त्वां, विक्रेष्यते न कश्चन ॥१९९॥

रोहिताश्वस्य वाचाऽथ, मनोमर्माविधा रुदन् ।
पुरीभूतकवीथ्यां स, तस्थौ श्रेण्या नृपस्ततः ॥२००॥

किञ्चिद्विमृश्य च क्षिप्रं, तृणान्यानीय भूपतिः ।
न्यस्य मूर्ध्नि सुतारोक्तः, प्राहैषा भृतकस्थितिः ॥२०१॥

रोहिताश्वं धुनानं स्वं, शिरः प्राह ततो नृपः ।
विधेहि मद्वचो वत्स !, तुभ्यं दास्यामि हस्तिनम् ॥२०२॥

दध्यौ सुतारा धिग् दैवं, भवे भवशतान्यथ ।
दत्ते यन्नः क्व सा लक्ष्मीः ?, क्वैषा विक्रयवाच्यता ? ॥२०३॥

राजाऽप्यचिन्तयद्दत्ता, न तथा कीर्त्तये मही ।
यथा ह्यकीर्त्तये पत्नीपुत्रयोरिह विक्रयः ॥२०४॥

विसृजामि सुतारां तत्सपुत्रां पितृवेश्मनि ।
यद्भाव्यं तदहं सोढा, ध्यात्वेत्यूचे स तां नृपः ॥२०५॥

देवि ! याहि पितृकुलं, पुत्रमादाय सम्प्रति ।
यथा तथाऽप्यहं स्वर्णं, दास्यामि मुनये खलु ॥२०६॥

साक्षेपं प्राह देवी तु, किं नु स्यात् प्रलयेऽप्यदः ? ।
विमुच्य त्वामहं यान्ती, सत्यं जाताऽस्मि दुर्जना ॥२०७॥

यतः— सम्पदि कस्कः श्रयति न विपदि तु मुञ्चन्ति गतघृणाः पुरुषम् ।
स्वं दर्शयत्यगस्त्यः पश्य भुवे फलितसस्यायै ॥२०८॥

किञ्च— वरमरिवरिवस्या पावके पावके वा,
पतनमतनुभिक्षाभाजनं भोजनं वा ।

सपदि विपदि दैवान्मज्जने सज्जने धीः,
पुनरभिगमसज्जाऽतीव लज्जाकरो मे ॥२०९॥

अपि च– विना कान्तं स कोऽप्यस्ति, यः स्त्रीणां प्रीणयेन्मनः ।
सुखाऽऽलापेष्वप्यलिषु, श्रीः काऽब्जिन्या विना रविम् ? ॥२१०॥

ततश्च ब्राह्मणः कोऽपि, वीक्ष्यमाण इतस्ततः ।
भृतिकां काञ्चिदायासीदुपभूपं स उन्मुखः ॥२११॥

दृष्ट्वा च भूपमापादमस्तकं चक्रिलक्षणम् ।
ऊचे कस्त्वं ? कथं देहं, श्रीगेहं भृतकीयसि ? ॥२१२॥ [युग्मम्]

शुचाऽऽत्तमौनं भूपालमालप्याऽऽगच्छदग्रतः ।
दृष्ट्वा सुतारां सास्रोऽभून्निनन्द दैवमुच्चकैः ॥२१३॥

एनां स्त्रियं ननु विधाय रिपो ! विधातस्त्वं मूढ ! किं नयसि दास्यविडम्बनां हा!।
दृष्ट्वाऽपि यद्वपुषि रूपगुणत्रपादीनत्यद्भुतान्निजगतैस्त्रपते रतिस्तैः ॥२१४॥

सुतारायाः पुरः पुण्यं, रोहिताश्वं सुलक्षणम् ।
दर्भाऽङ्कशिरसं प्रेक्ष्य, धिक् शास्त्रमित्युवाच सः ॥२१५॥

शास्त्रं सुलक्षणान्याह, यानि कानिचिदादरात् ।
तान्याधिक्यादमीषां यत्सत्याऽवस्था च कीदृशी ? ॥२१६॥

सानुभूतं नृपः प्राह, मास्मैवं हि द्विज ! ब्रवीः ।
शास्त्रं हि न मृषा भाषि, किन्तु मे कर्मवैभवम् ॥२१७॥

जन्मन्येव कृतः पूर्वे, ददतामदतां स्वयम् ।
श्रेयश्च कुर्वतामन्तरायः स इह भुज्यते ॥२१८॥

तद्वशादीदृशी चेन्नोऽवस्थैषा तच्छुचाऽत्र किम् ? ।
सर्वं विषहमाणो हि, कर्मभिर्मुच्यते जनः ॥२१९॥

किमस्या मूल्यमित्युक्ते, ब्राह्मणेन मुहुर्मुहुः ? ।
कथञ्चिद् रुद्धबाष्पोऽथ, राजाऽऽख्यदुचितं हि यत् ॥२२०॥

ततः स्वर्णसहस्राणि, पञ्चाऽस्या मूल्यमस्तु भोः ! ।
वदतीति द्विजे राजा, लज्जयाऽधोमुखोऽभवत् ॥२२१॥

अनिषिद्धमनुमतमिति तस्मिंस्ततोऽञ्चले ।
स्वर्णं बध्नाति राजाऽऽह, मोक्षोऽस्या द्विगुणेन भोः ! ॥२२२॥

धिग् जन्म धिक् प्रचुरजीवितमद्भुतश्रि,
धिग् धिग् महत्त्वपदमन्यवशस्य पुंसः ।
प्राप्याऽपि यो मनुजतां स्फुटशर्म्महेतोः,
स्वेच्छारसाद्विघटयत्यपि जीवितं स्वम् ॥२२३॥

इति ध्यायन् द्विजः प्राह, सुतारामग्रतो भव ।
वलितायां सुतारायां, रोहिताऽश्वोऽञ्चलेऽलगत् ॥२२४॥

रुदती तं सुताराऽऽह तिष्ठ त्वं पितुरन्तिके ।
आनेतुं मोदकं तुभ्यं, यान्त्यस्मि वत्स ! तिष्ठ तत् ॥२२५॥

अमुञ्चत्यञ्चले तस्मिन्, मुहुर्मात्राऽपि बोधिते ।
भृतिके किं विलम्बोऽयमिति कुद्धो द्विजोऽवदत् ॥२२६॥

सुतारां सभयं यान्तीं, यावन्मुञ्चति नाऽर्भकः ।
तावद्द्विजेन भूमौ स, पादेनाऽऽहत्य पातितः ॥२२७॥

राजा सास्त्रं ततो दध्यौ, धिगापदमिमां मम ।
इन्द्रस्याऽप्यङ्कलाल्योऽयं, पदा विप्रेण हन्यते ॥२२८॥

पतितं विपदि पुमांसं परितो वृण्वन्ति परिभवसहस्राः ।
श्वभिरभिदष्टो निहतो व्याधैः श्रितवागुरः क्रोडः ॥२२९॥

ततः प्रोचे द्विजं राजा, न तिष्ठेन्मातरं विना ।
शिशुः किमपि ते कर्म, कर्त्ता क्रीणीह्यमुं ततः ॥२३०॥

मुधिकयाऽपि गृह्णामि, नैनमेतद्द्विजो ब्रुवन् ।
राज्ञोक्तः स्वर्णसहस्रं, दत्त्वाऽथादाय तौ ययौ ॥२३१॥

राजा दध्यौ न लप्स्येऽहं, पुरे वासं ततो मुनिः ।
यद्येति स्वर्णमेतस्मै, दत्त्वा स्यामकुतोऽभयः ॥२३२॥

ततः कुलपतिः कुर्वन्नाज्ञामिव समाययौ ।
कोपात्पराङ्मुखीभूय, प्रोचे द्राग् देहि हेम नः ॥२३३॥

कियदपि गृहाणेदमित्युक्ते भूभुजा मुनिः ।
प्रोचे किमवधौ पूर्णे, पूर्णं स्वर्णं ददासि न ? ॥२३४॥

राजाऽऽह धिगधमर्णमुत्तमर्णस्य दुर्गिरः ।
यः सहन्नपि भूयोऽपि, तं प्रीणयति चाटुभिः ॥२३५॥

क्रोधात्कुलपतिः प्राह, ग्रहीष्येऽल्पं न काञ्चनम् ।
विक्रीय दयितापुत्रौ, यत्प्राप्तं तत्समर्पये ॥२३६॥

वदत्येतन्नृपेऽङ्गारमुखः प्राहाऽर्थयस्व भोः ! ।
चन्द्रशेखरमत्रत्यं, किं विक्रीत प्रियासुतौ ? ॥२३७॥

राजाऽऽह किमिदं ब्रूषेऽनुचितं सत्त्वशालिनाम् ? ।
शतशोऽपि पराभूतान्नाऽहं प्रत्यर्थिनोऽर्थये ॥२३८॥

प्रतिज्ञाभ्रष्ट ! वाचाट !, पुरो नः स्वं विकत्थसे ।
इत्युक्ते मुनिना राजा, प्राह मुनीन्द्र ! मा कुपः ॥२३९॥

चण्डालस्याऽपि कर्माऽहं, कृत्वा दुष्करमप्यथ ।
दास्ये स्वर्णमिति राज्ञोक्तेऽभूद्रोमाञ्चितो मुनिः ॥२४०॥

ततः कौपीनवासास्तु, लघुपिङ्गकचोच्चयः ।
दृढयष्टिकरो वृद्धो, निषादः कोऽपि चाऽगमत् ॥२४१॥

राजानं वीक्ष्य स प्रोचे, रे ! त्वं कर्म करोषि किम् ? ।
कर्मकृद्भवसि त्वं मे, तेनेत्युक्तो नृपोऽस्मरत् ॥२४२॥

रविरस्तङ्गतो लोकः, क्रायको नाऽस्ति नो मुनिः ।
क्षमते तन्निषादस्य, कुर्वे कर्मेति सम्प्रति ॥२४३॥

करिष्ये कर्म तेऽवश्यं, राज्ञेत्युक्तेऽथ सोऽवदत् ।
किं किं कर्त्ताऽसि मे कर्म ?, राजाऽऽहाऽऽदिशसीह यत् ॥२४४॥

रक्षितव्यं स्मशानं चाऽऽदातव्यं मृतकाऽम्बरम् ।
अर्धदग्धानि काष्ठानि, ग्राह्याणि च चिताचयात् ॥२४५॥

यत्तत्रोत्पद्यते तस्याऽर्धं हि गृह्णाति भूपतिः ।
अन्यस्याऽर्धस्य भागौ द्वौ, ममैकस्ते तथा नृप ! ॥२४६॥

यदादिशामि कर्तव्यं, तच्च कार्यं त्वया सदा ।
गङ्गासव्यस्मशानेशः, कालदण्डाऽभिधोऽस्म्यहम् ॥२४७॥ [युग्मम्]

इति श्रुत्वा नृपः प्राह, तं त्वदाज्ञाकृदस्म्यहम् ।
यदत्र मां प्रति स्यात्तद्दीयतां मुनये खलु ॥२४८॥

अपवार्य मुनिः प्रोचे, नमस्ते सत्त्वशालिने ।
नमस्ते सत्यसन्धाय नमस्ते धैर्यसद्मने ॥२४९॥

कालदण्डोऽपि तद्वाचं, प्रपद्य मुनये ततः ।
हरिश्चन्द्रेण सार्धं च, ययौ स्मशानमात्मनः ॥२५०॥

इतश्च पुर्यामेतस्यामकस्मादपि देहिनाम् ।
वपुर्वाप्याजीविताऽम्भो मृत्युर्जग्राह रुग्गुणैः ॥२५१॥

ततश्च परितः प्रोद्यदाक्रन्दध्वनिभिर्जितः ।
निलीयाऽस्थादिव क्वाऽपि, नगरे मङ्गलध्वनिः ॥२५२॥

मृत्योर्भीता जना रक्षां, विदधत्यात्मनो यथा ।
प्रेरितस्तु तथा मृत्युस्तान् गृह्णाति सहस्रशः ॥२५३॥

श्रुत्वाऽथ दुःसहं लोकाऽऽक्रन्दं मरणजं पुरे ।
आह्वत्सत्यवसुं भूपो, मन्त्रिणं चन्द्रशेखरः ॥२५४॥

राजाऽऽदेशात्समायान्तं, सचिवं कोऽपि पूरुषः ।
अन्तरामिलितः कीरपञ्जराऽग्रकरोऽनमत ॥२५५॥

कलहंस ! क्व कीरोऽयं, लब्धस्त्वयेति मन्त्रिणा ।
पृष्टे स प्राह चम्पाया, वने ह्येनमवाप्नुवम् ॥२५६॥

चन्द्रशेखरराजाय, सदाप्रियविपश्चिते ।
सर्वशास्त्रनदीष्णत्वादिहाऽऽनैषं शुकोत्तमम् ॥२५७॥

इति तद्वचनं शृण्वंस्तेनैव सह मन्त्रिराट् ।
ययावुपनृपं नत्वा, यथास्थानमुपाविशत् ॥२५८॥

सखेदं प्राह भूपालो, मन्त्रिन् ! पश्य पुरीजनः ।
सङ्कोचिताऽऽयुर्दैवेन, प्रयात्यस्तं प्रतिक्षणम् ॥२५९॥

न वयं दुर्नया नाऽपि, श्लथधर्मः पुरीजनः ।
नृणामकालमृत्युश्च, तदन्वेषय कारणम् ? ॥२६०॥

ततश्च सुम्भली काचित्, पुत्रीमरणविह्वला ।
उरस्ताडसनिःश्वासा, राजानं प्राह सा क्रुधा ॥२६१॥

सदैवाऽन्यायकारी त्वं, सदा पीडयसि प्रजाः ।
सदाऽपि पापनिष्ठोऽसि, तेनाऽयं म्रियते जनः ॥२६२॥

मत्पुत्री नामतोऽनङ्गसुन्दरी स्मरमञ्जरी ।
प्रक्रीड्य सुखशय्यायां, सुप्ताऽकस्मान्मृताऽस्ति हा ! ॥२६३॥

अहो ! कर्कशता ह्यस्या, अहो ! निर्लज्जता गिराम् ।
इति ध्यायन् नृपेणोक्तो, मन्त्री किं क्रियतामिति ? ॥२६४॥

मन्त्र्याह भूपमत्राऽर्थे, प्रगल्भन्ते हि मान्त्रिकाः ।
राजा प्राहाऽऽगतोऽस्तीहोज्जयिन्या मान्त्रिको महान् ॥२६५॥

तत आकार्यतामेष, इत्युक्ते मन्त्रिणा नृपः ।
आजूहवत्तदैवैनं, सोऽप्यागत्य समाविशत् ॥२६६॥

राजाऽऽह मान्त्रिकं किं नः, पुर्यां मारिविजृम्भितम् ? ।
हठान्नयति पूर्लोकं यमसद्मनि दूतवत् ॥२६७॥

मान्त्रिको नाटयन् ध्यानं, ज्ञात्वैवाऽऽह महीपतिम् ।
राक्षसीललितं ह्येतद्राजन् ! जानीहि नाऽपरम् ॥२६८॥

वृद्धवेश्याऽऽह साश्वासं, मान्त्रिकेश ! सुता मम ।
मृताऽधुनैव स प्राह, जीवयिष्यामि तां खलु ॥२६९॥

सा वस्त्राऽञ्चलमादाय, भ्रमं भ्रमं शिरस्यधात् ।
मदाशिषः प्रभावेन, चिरं त्वं जीव मान्त्रिक ! ॥२७०॥

ततो दासी समागम्य, कुट्टिन्ये समचीकथत् ।
मातस्त्वं वर्द्धसे दिष्ट्या, यतो जीवति मे स्वसा ॥२७१॥

ततः प्रत्ययितो राजा, सादरं प्राह मान्त्रिकम् ।
आनेतुं प्रभवस्येनां, राक्षसीमथ सोऽब्रवीत् ॥२७२॥

राजन् ! किं मां न जानासि, महाप्रभावसप्रभम् ? ।
यद्देवयोनयः सर्वा, मदादेशकृतस्ततः ॥२७३॥

लङ्कामेव समानयामि सदनं या रक्षसां किं तव,
व्रातैरप्सरसामलङ्कृतमिह स्वर्भूपतिं दर्शये ? ।
द्यामृक्षैः फलितामधः किमु दधाम्युच्चेतुमुत्कोऽसि चेत्,
कल्लोलोर्जितगर्जिना जलधिना पृथ्वीं किमु प्लावये ? ॥२७४॥

यद्यस्ति कौतुकं तत्त्वं, सामग्रीमुपढौकय ।
माषसर्षपलवणान्युत्खड्गानष्टपूरुषान् ॥२७५॥

क्षणात्तथाकृते राज्ञा, मान्त्रिको मण्डलं व्यधात् ।
तदन्तरुपविश्याऽथ, किञ्चिद्ध्यानमनाटयत् ॥२७६॥

दिक्पालाऽऽह्वाननासज्जान्, मन्त्रानुच्चैरथोच्चरन् ।
मान्त्रिको राक्षसीं मन्त्रैराचकर्ष विहायसा ॥२७७॥

आयान्ती सानुगान् प्राह, रे ! ग्रासः क्वचिदीक्ष्यताम् ।
येनाऽस्मि सुचिरादेव, क्षामकुक्षिर्बुभुक्षया ॥२७८॥

मण्डले मन्त्रशक्त्याऽथ, सनिर्घातं पपात सा ।
सर्वेऽप्यबिभयुस्तस्या, मार्जार्या इव मूषकाः ॥२७९॥

सविस्मयं नृपः प्राह, मन्त्रोत्कर्षाऽवधिर्ह्ययम् ।
य एनां राक्षसीं मन्त्रिन्नाऽऽनैषीत् पश्यतां हि नः ॥२८०॥

मान्त्रिकः प्राह कर्त्तव्यमस्माभिः कृतमेव हि ।
यदुचितं कुरु त्वं तन्निग्रहे त्वमसि प्रभुः ॥२८१॥

साक्षेपमादिशद्राजा, मन्त्रिन् ! श्वपचमाह्वय ।
कलहंसं तमाह्वातुमादिक्षत्सचिवस्ततः ॥२८२॥

कलहंसोऽपि तत्रैव, विमुच्य शुकपञ्जरम् ।
जगामाऽथ नृपोऽवादीन्मन्त्रिन् ! किमस्ति पञ्जरे ? ॥२८३॥

मन्त्री प्राह महाराज !, शुकराजोऽस्ति सर्ववित् ।
उपश्लोकय राजानं, तेनेत्युक्ते शुकोऽपठत् ॥२८४॥

क्ष्माप ! त्वच्छरपातितानपि समित्क्षेत्रेऽसृजा पङ्किले,
पद्भारै रणकाङ्क्षिणः पुनरिभाः शत्रूनधो रोपयन् ।
स्वर्गे तत्क्षणमुद्गतान् दितिसुतानिन्द्रेण युद्धोद्धतान्,
जित्वैरावणमप्यतुच्छसमरक्रीडारसं ते व्यधुः ॥२८५॥

मान्त्रिकः प्राह भो राजन् !, राक्षसी वोऽन्यचेतसाम् ।
प्रभविष्यति तत्कोऽयं, विलम्बोऽस्या विनिग्रहे ? ॥२८६॥

ततश्चाऽऽगाच्च चाण्डालो, हरिश्चन्द्रेण संयुतः ।
हरिश्चन्द्रं शुको दृष्ट्वाऽभूदुत्फुल्लाऽक्षिमानसः ॥२८७॥

प्राह च स्वस्ति ते नाथ !, भरताऽन्वयभूपते ! ।
हरिश्चन्द्र ! नमद्भूपमौलिरत्नाऽङ्कितक्रम ! ॥२८८॥

सरोषं प्राह राजाऽपि, किमबद्धं प्रभाषसे ? ।
क्व साकेतपतिर्ह्यत्र ?, कीर ! त्वं विह्वलोऽसि किम् ? ॥२८९॥

अथाऽऽह स्वपचं मन्त्री, कुर्वन्नाच्छादनामिमाम् ।
हरिं सोऽपि समादिक्षत्, कृत्वा सोऽपि तथैव ताम् ॥२९०॥

प्रत्यभिज्ञासीत्किं नाम, सुतारा देव्यसौ ? हहा !! ।
किमेतेन हि देवेन, हन्तव्या वयमेव हा !? ॥२९१॥

नाऽस्मिन् कर्मणि देव्येषा, कारणं स्यात्कथञ्चन ।
किन्तु कोऽपि मद्दुष्कर्मप्रेरितः कुरुते ह्यदः ॥२९२॥

प्रविश्याऽग्निं ततो देव्या, दोषमाशु हराम्यहम् ।
अथवाऽरिसभायां मे, नाऽऽत्मा योग्यः प्रकाशितुम् ॥२९३॥

मुनिभ्यः पृथिवी दत्ता, विक्रीता ससुता प्रिया ।
यत्करिष्यति दैवं तद्धरिश्चन्द्रः सहिष्यति ॥२९४॥

दृष्ट्वा तां बाह्यनेपथ्यैरदूषितवपुर्लताम् ।
मन्त्रिणे पृथिवीनाथः, स्वं वितर्कं न्यवेदयत् ॥२९५॥

वक्त्रं चन्द्रमपाकरोति च दृशावम्भोजलक्ष्मीं वचः,-
पीयूषं कचसञ्चयोऽप्यलिरुचं वर्णः सुवर्णं खलु ।
अङ्गैर्मे विजितं जगत्पृथगतः शृङ्गारवर्मश्रमं,
कृत्वा कं विजयेदतो लवणिमैवाऽस्याः प्रियं मण्डणम् ॥२९६॥

शुकोऽप्यथोपलक्ष्यैनां, ननाम नतमस्तकः ।
उसीनरसुते ! देवि ! सुतारे ! स्वस्ति ते सति !? ॥२९७॥

राजाऽऽह किं मुहुः कीर !, प्रलपस्येवमुच्चकैः ? ।
क्व सात्रोसीनरसुता ?, किं त्वं कीरोऽसि मद्यपः ? ॥२९८॥

सावष्टम्भं शुकः प्राह, हरिश्चन्द्रोऽयमस्य तु ।
पत्नीयमित्ययमर्थोऽन्यथा स्याद्ब्रह्मणाऽपि न ॥२९९॥

राज्ञा पृष्टो हरिर्ब्रूते, हरिश्चन्द्रो भवामि न ।
किन्त्वहं स्वपचस्याऽस्य, द्रव्यक्रीतोऽस्मि कर्मकृत् ॥३००॥

राज्ञा पृष्टाऽङ्गना प्राह, न सुताराऽस्म्यहं खलु ।
किन्तु द्विजन्मनो वज्रहृदयस्याऽस्मि दास्यहम् ॥३०१॥

अरे ! विप्लावयस्यस्मानित्युक्तो भूभुजा शुकः ।
किं स्वं प्रकाशयेदेष, त्वदग्रेऽत्रेति सोऽब्रवीत् ॥३०२॥

मन्त्री प्राहाऽऽकृतावस्यां, राक्षसीकर्म किं भवेत् ? ।
ततो विचार्य कर्तव्यं, स्वामिना यद्यथोचितम् ॥३०३॥

पृष्टश्च श्वपचो राजा, प्राहाऽयं मम कर्मकृत् ।
इति निश्चित्य राजाऽमुं, रासभाऽऽनयनेऽब्रवीत् ॥३०४॥

हरिं सोऽपि समादिक्षदानैषीत्सोऽपि रासभम् ।
शक्तोऽपीष्टोऽपि किं कुर्यात् ? परतन्त्रः पुमान् खलु ॥३०५॥

विचार्य कार्यमाचर्यमिति मन्त्रिशुकाऽऽदिभिः ।
वार्यमाणोऽपि राजा तामारोपयच्च रासभम् ॥३०६॥

अहो ! अकृत्यमकृत्यमित्याक्रन्दन् शुकोऽवदत् ।
राजन् ! विज्ञापनामेकां, शृणु नीत्यनुयायिनीम् ॥३०७॥

राजाऽऽह ब्रूहि रे ! स्वैरं, कीरः प्रोवाच यद्यसौ ।
सुतारा राक्षसी स्यात्तद्विशाम्यग्निं पुरस्तव ॥३०८॥

सदैन्यं प्राह सर्वोऽपि, सभालोकः शुकस्य गीः ।
अस्तु प्रमाणमामेति, राजाऽप्यूचेऽनुरोधतः ॥३०९॥

सोत्साहं प्राह कीरोऽपि, मन्त्रिन् ! कारय तच्चिताम् ।
तथा तेन कृते कीरः, स्नात्वाऽगमच्चितां प्रति ॥३१०॥

ततो दिग्नायकानाह, यद्येषा राक्षसाऽन्वया ।
भवेन्नृपसुता तन्मां, प्रदहत्वाशु हव्यवाट् ॥३११॥

इत्युक्त्वा पश्यतामेव, तेषां गतभयः शुकः ।
झम्पामादाच्च विध्मातोऽग्निश्चाऽस्थादक्षतः खगः ॥३१२॥

आश्चर्यमिदमाश्चर्यमित्यूचुरुच्चकैर्जनाः ।
सतीयं राक्षसी न स्यादित्यदुः शुद्धितालिकाम् ॥३१३॥

मन्त्र्यूचे नाथ ! मन्येऽहं, मान्त्रिकस्य विजृम्भितम् ।
तत्केनाऽप्यपदेशेन, मान्त्रिको द्राग् विसृज्यताम् ॥३१४॥

तथेमां रासभादाशु, समुत्तारय सम्प्रति ।
इत्युक्तो मन्त्रिणा भूपः, सविस्मयमदोऽवदत् ॥३१५॥

किं कुर्मः ? किमु जानीमः ?, कस्येदं कैतवं महत् ? ।
सन्दिग्धाऽर्थे किलैतस्मिन्, विचारं कुर्महे च किम् ? ॥३१६॥

इत्यन्तस्तापकोपाभ्यां, संश्लिष्टो नृपतिः स्वयम् ।
व्यसृजन्मान्त्रिकं कीरं, पञ्जरे तु न्यधापयत् ॥३१७॥

उदतारयदेनां च, रासभाद्वनितां ततः ।
इति सर्वं विसृज्याऽथ, नृपः पल्यङ्कमासदत् ॥३१८॥

हरिश्चन्द्रोऽपि सूर्याऽस्ते, चण्डालस्य नियोगतः ।
व्रजन् स्मशानं दध्यौ स, कीदृग्दुर्दैवनाटकम् ? ॥३१९॥

देव्याः कर्मकरित्वेन, जाताया विप्रसद्मनि ।
राक्षसीवचनं दैवदत्तं न्यवर्तयच्छुकः ॥३२०॥

दैवमेव ततो मन्ये, बलवान् नाऽपरः पुमान् ।
यत्तेन विहिता ह्यापत्, तेनैव हि निवर्त्यते ॥३२१॥

सूचीभेद्येऽपि हि ध्वान्ते, प्रविशन् गतभीर्हरिः ।
ददर्श भीषणाऽऽकारं, श्मशानं निशि सर्वतः ॥३२२॥

क्वचित्फेरण्डफेत्कारं, क्वचिद्राक्षसडम्बरम् ।
क्वचिद्विभीषिकोद्योतं, क्वचित्कौशिकवासितम् ॥३२३॥

क्वचित्प्रेतपरित्रस्तशबसंस्कारकृज्जनम् ।
क्वचिच्च डाकिनीमुक्तप्रोद्यत्किलिकिलाऽऽरवम् ॥३२४॥

क्वचित्तुन्दपरिमृजनिद्रायमाणकुक्कुरम् ।
क्वचिद्योगीन्द्रसंसिद्ध्यत्साध्यविद्यावरस्वरम् ॥३२५॥

क्वचित्कापालिकैर्गृह्यमाणसत्पुण्यमस्तकम् ।
सर्वतोऽपि च दुर्गन्धपूरपूरितनासिकम् ॥३२६॥

उपर्युपरिपर्यस्तमुण्डखण्डस्खलज्जनम् ।
इतस्ततः श्मशानं स, पश्यन् शुश्राव दुर्ध्वनिम् ॥३२७॥ [पञ्चभिः कुलकम्]

अहो ! आर्त्तध्वनिः सैष, मृतपत्याः स्त्रियः खलु ।
रुदन्तीं वारयाम्येनामित्यगात्तत्पुरो हरिः ॥३२८॥

उवाच च शुभे ! किं ते, कारणं परिदेवने ? ।
साह पश्याऽग्रतो गत्वा, न्यग्रोधे कारणं यतः ॥३२९॥

हरिर्गत्वा ततोऽपश्यत्पुमांसं पूर्णलक्षणम् ।
ऊर्ध्वपादमधोवक्त्रं, वटशाखानियन्त्रितम् ॥३३०॥

अन्तर्मनः स दध्यौ च, दत्ता भूर्मुनये मया ।
मुनिकन्याधनोपाये, विक्रीतौ दयितासुतौ ॥३३१॥

जीवितस्याऽस्य निर्विण्णः, स्वयमेव पुराऽस्म्यहम् ।
कृत्वा पराऽर्थं तद्गच्छेच्चेत् किं नाऽऽत्तं फलं मया ? ॥३३२॥

इति ध्यात्वा हरिः प्रोचे, तमुद्बद्धं नरं मृदु ।
कोऽसि त्वं भोः !? कथं चेयमवस्था ते सुदुस्सहा ? ॥३३३॥

जानन्नस्मि न शक्योऽयमुद्बद्धेन प्रभाषितुम् ।
परं त्वदाकृतिः पुण्या, प्रयुङ्क्ते प्रष्टुमत्र माम् ॥३३४॥

तदाऽऽख्याहि न शक्नोमि, द्रष्टुं ते दुस्सहां दशाम् ।
इति तत्प्रणयं दृष्ट्वा, प्रोवाचोद्बद्धपूरुषः ॥३३५॥

नाऽहमेतां दशां दीनां, निवेदयामि कस्यचित् ।
यच्छ्रोता वेत्ति यन्मत्तः, किं परित्राणमीहते ? ॥३३६॥

परन्त्वन्यभवस्नेहाऽनुबन्धाद्वा तथोत्तमात् ।
उपकारपरत्वाद्वा, पृच्छते कथयामि ते ॥३३७॥

अहं काशीपतेश्चन्द्रशेखरस्याऽऽदिमः सुतः ।
विद्याधर्याऽस्मि पल्यङ्कादानीतोऽत्र प्रियायुतः ॥३३८॥

किमर्थमिति तेनोक्ते, नरः प्राहाऽत्र सम्प्रति ।
मन्मांसेन महाहोमं, विद्याधरी करिष्यति ॥३३९॥

क्व गता साऽधुना विद्याधरीति हरिणोदिते ।
स्नातुं गङ्गानदीं व्योम्ना, जगामेति जगौ स हि ॥३४०॥

ततो दध्यौ हरिर्हर्षाद्गत्वरैश्चेन्ममाऽङ्गकैः ।
विद्याधर्या भवेत्सिद्धिर्जीवितं चाऽस्य चारु तत् ॥३४१॥

तमुवाच हरिः स्नेहात्, प्रार्थये त्वां किमप्यहो ! ।
स प्राहाऽवस्थापतितं, किं त्वं प्रार्थयसेऽत्र माम् ॥३४२॥

हरिः प्राह दातुमलं, यत्प्रार्थ्यसे तदेव हि ।
ततः स प्राह याचस्व, यदभीष्टं नरोत्तम ! ॥३४३॥

हरिः प्राह प्रयाहि त्वं, स्वं राज्यं स्वीकुरु क्षणात् ।
यत्कार्यं तत्करिष्यामि, विद्याधर्याः स्ववर्ष्मणा ॥३४४॥

पुरुषः प्राह किं ब्रूषेऽनात्मनीनमिदं खलु ।
मूर्खः कश्च स यः स्वार्थे, परप्राणान् व्ययिष्यति ? ॥३४५॥

तद्याहि त्वमतः स्थानाद्विद्याधर्येति सम्प्रति ।
तेनेत्युक्तो हरिर्ब्रूते, भूतलन्यस्तमस्तकः ॥३४६॥

मा मा मे प्रार्थनां व्यर्थां, कुरुष्व पुरुषोत्तम ! ।
स्वेनाऽप्यहं हि भो ! कष्टान्मर्त्तुकामोऽस्मि तद्यदि ॥३४७॥

त्वादृशस्योपकृत्याऽथ, म्रिये स्यां सफलस्तदा ।
उपकारः परो धर्म, इत्याम्नासिषुरागमाः ॥३४८॥

इत्येवं बहुशोऽभ्यर्थ्य, स्वयमुन्मोच्य बन्धनात् ।
याहीति प्रेषितस्तेन, स जगाम प्रियायुतः ॥३४९॥

नूपुरक्वाणकल्पद्रुपुष्पस्रक्सौरभाऽऽदिभिः ।
ज्ञात्वा विद्याधरीमारादायान्तीं स हरिः क्षणात् ॥३५०॥

बद्ध्वा न्यग्रोधशाखायां, स आत्मानमधोमुखम् ।
गतमृत्युभयस्तस्थौ, स एव किल नाऽपरः ॥३५१॥ [युग्मम्]

ततो विद्याधरी व्योम्नोऽवतताराऽऽर्द्रचीवरा ।
अग्निकुण्डत्रये वह्निमुज्ज्वालं समचीकरत् ॥३५२॥

सज्जीकृत्य च पूजादि, विद्याधर्याह पार्श्वगान् ।
चित्राङ्गद ! समीक्षस्व, किं लक्षणधरो नरः ? ॥३५३॥

चित्राङ्गद उपसृत्य, हरिश्चन्द्राऽङ्गलक्षणम् ।
वीक्ष्योचे देवि ! मोदस्व, येनाऽयं चक्रिलक्षणः ॥३५४॥

विद्याधरी समुत्थायाऽऽनर्च सर्वाऽङ्गमप्यमुम् ।
ऊचे च स्मर किञ्चित्त्वं, देवं यत्राऽसि भक्तिमान् ॥३५५॥

भवेश्च सात्त्विको येन, विद्या सिद्ध्यति मेऽधुना ।
यत्त्वन्मांसैर्हुतैः सा स्यात्, प्रीता च वरदा च भोः ! ॥३५६॥

हरिश्चन्द्रस्ततोऽवादीदात्मैव देवता स्मृता ।
स्मृतेन येन सत्त्वं स्यादीदृक्कार्यसमर्थकम् ॥३५७॥

ततस्त्वं मा विलम्बस्व, होमः स्याद्बहुविघ्नभूः ।
स्वेनैवोत्कृत्य मांसं स्वं, यच्छाम्येष गृहाण तत् ॥३५८॥

साऽऽहाऽभूदेव मन्त्रस्य, सिद्धिर्येन त्वमुत्तम ! ।
मत्तोऽप्युत्साहवानीदृक्, समवायो हि पुण्यतः ॥३५९॥

ततः प्रवृत्ता कुण्डेषु, ज्वलज्ज्वालाऽनलेषु सा ।
हरिश्चन्द्राऽर्पितं मांसं, प्रक्षेसुं मन्त्रपूर्वकम् ॥३६०॥

ऊचे च परितः खड्गहस्तान् विद्याधरोत्तमान् ।
मा दत्ताऽत्र प्रवेशं भोः !, श्वापदस्य नरस्य च ॥३६१॥

कियत्यपि कृते होमेऽभूत्प्रादुर्देवतामुखम् ।
हर्षान्मांसं हरिर्दत्ते, स्वमुत्कृत्य जुहोति सा ॥३६२॥

ततो गोमायुरटितं, कुण्डानि परितोऽभवत् ।
विषादार्त्ता ततो विद्याधर्यूचेऽयं निवार्यताम् ॥३६३॥

सर्वैः स नाश्यमानोऽपि, प्रत्युताऽगात्समीपगः ।
जजागार ततश्चाऽऽरादाश्रमात्तापसः क्षणात् ॥३६४॥

किञ्चित्किञ्चित्ततो विद्यामुखमधो ममज्ज च ।
हा हा !!! हताऽस्म्यपर्याप्तहोमा तत् किं करोम्यहम् ? ॥३६५॥

सावष्टम्भं हरिः प्राह, मा विषीद गृहाण मे ।
छित्त्वा शिरोऽपि पर्यन्ताऽऽहुतिहोमं समापय ॥३६६॥

विद्याधर्याह क्रमशो, होमः स्यान्ननु नाऽक्रमात् ।
क्रमं च क्षमते नैष, तापसः क्रोधमावहन् ॥३६७॥

अरे ! किमेतदारब्धमस्मदाऽऽश्रमभूमिषु ? ।
इत्याक्रोशन् प्रविष्टोऽत्र, तापसः क्रोधसिन्धुरः ॥३६८॥

ममज्ज तन्मुखं देव्या, मध्ये कुण्डाऽग्निसत्वरम् ।
भीता विद्याधरी चाऽपि, क्वाऽप्यगात्सपरिच्छदा ॥३६९॥

ततः क्रोधात्परिभ्राम्यंस्तापसस्तत्र जग्मिवान् ।
यत्राऽऽस्ते कृत्तसर्वाऽङ्गः, शाखाबद्धो हरिः श्वसन् ॥३७०॥

क्षणेन तापसः किञ्चिदुपलक्ष्याऽऽह विस्मयात् ।
अरे ! भवान् हरिश्चन्द्रः, सोऽवोचदोमिति स्फुटम् ॥३७१॥

तमाह तापसः क्रुद्धः, स्वर्णं कुलपतेरदाः ? ।
हरिः प्राह दिनैः कैश्चित्पूर्णीभविष्यति प्रभो ! ॥३७२॥

त्वं मामभिजानासीति, पृष्टस्तेन हरिर्जगौ ।
कौटिल्यस्त्वं महीदाने, साक्षी कुलपतेरसि ॥३७३॥

ततो माऽभून्मुनेः स्वर्णहानिरस्मिन् मृते त्विति ।
औषध्या व्रणरोहिण्या, स्वेनाऽलिम्पत्स तद्वपुः ॥३७४॥

अभूच्च तत्क्षणादेव, रूढव्रणवपुर्हरिः ।
ययौ च तापसः स्थाने, स्वे दध्यौ हरिरप्यथ ॥३७५॥

नाऽपूर्णं मेऽभवत्किञ्चित्, सर्वस्वं ददतो मुनेः ।
विद्याधर्या न यत्सिद्धिर्जातेति तद्दुनोति माम् ॥३७६॥

अरे ! क्व त्वं गतोऽसीति, प्राहूतः श्वपचेन सः ।
उपसृत्याऽऽह कर्तव्यं, मम स्वामिन् ! समादिश ? ॥३७७॥

स आहैष मृतः कोऽपि, समायाति ततो भवान् ।
वस्त्रं गृह्णातु गत्वेति, प्रेषितोऽगाद्धरिस्ततः ॥३७८॥

अशृणोच्छब्दमेकस्याः, करुणाऽऽर्तं सुतव्ययात् ।
हा ! पुत्र ! क्व गतोऽसीति ?, मूर्च्छन्त्याश्च स्त्रिया मुहुः ॥३७९॥

अहो ! दैवेन निर्मुक्तकरुणेन किलाऽङ्गजम् ।
व्यापादयिता निर्भाग्याऽभीष्टाऽपत्या त्वसौ हता ॥३८०॥

अहो ! असारः संसारो, मर्त्यवाचामगोचरः ।
यदिष्टं देहिनां तत्तु, ग्राह्यत्येव यो यमात् ॥३८१॥

कथं चाऽहं ग्रहीष्यामि, बालस्योर्ध्वात् किलाऽम्बरम् ? ।
इति मन्दपदः प्रोक्तः, श्वपचेनाऽऽशु गच्छ रे ! ॥३८२॥

सभयं परिचक्राम, हरिश्चन्द्रः सुतं स्मरन् ।
न शुद्ध्येद्यदि देवी मे, तदा वत्सो म्रियेत सः ॥३८३॥

ततः शुश्राव करुणं, रुदन्तीं वनितामिति ।
निर्भाग्यशेखराया मे, मृतो वत्सो हताऽस्मि हा ! ॥३८४॥

वत्सो मृत इति वाचं, प्रतिघ्नन् मङ्गलोक्तिभिः ।
वामाऽक्षिस्पन्दनेनाऽथ, बभूवाऽऽशङ्किमानसः ॥३८५॥

सर्वस्वं मुनये दत्तं, विक्रीतौ दयितासुतौ ।
चाण्डालकर्मकृच्चाऽहं, किं वा मे भाव्यतः परम् ? ॥३८६॥

इति चिन्ताऽऽतुरो यावन्नग्रे गच्छेद्धरिस्ततः ।
चाण्डालपतिना प्रोक्तो, व्याघुट्येति व्यजिज्ञपत् ॥३८७॥

आगतोऽस्ति मृतो बाल, इति वस्त्राऽऽहृतौ त्रपा ।
स्वाम्याह का त्रपाऽस्माकमाचारोऽयं गृहाण तत् ॥३८८॥

निवृत्याऽथ हरिर्दध्यौ, धिग् लोभं यद्वशाज्जनः ।
वेत्ति कृत्यमकृत्यं वा, नैव दैवहतो हहा !! ॥३८९॥

यदादिशति मे स्वामी, तत्कर्तव्यं मया खलु ।
स्वामिना स्वयमुक्तस्य, न विचारोऽनुजीविनाम् ॥३९०॥

गच्छन्निति स शुश्राव, नारीविलापमुच्चकैः ।
हहा !! पुत्र ! त्वमेको मे, तन्मे मृत्युस्त्वया सह ॥३९१॥

त्वं ममैवाऽसि कुपितं, रे दैव ! यत्पतिर्मम ।
बभूव कर्मकृन्नीचगेहेऽहमपि तादृशी ॥३९२॥

परमस्य सुपुत्रस्य, भरताऽन्वयशालिनः ।
आलम्बनेन जीवन्त्याः, का गतिस्तन्ममाऽधुना ? ॥३९३॥

हरिश्चन्द्रोऽपि विज्ञाय, सुतारां त्वरितो व्रजन् ।
मुञ्चन्नश्रूण्यथाऽवादीन्निन्दन्नात्मानमात्मना ॥३९४॥

निर्भाग्यशेखरे ! देवि !, वज्रघातः क एष नौ ? ।
वनिता वीक्ष्य भर्तारं, तारतारं रुरोद सा ॥३९५॥

हरिश्चन्द्रोऽप्यरोदीच्च, धैर्यं कस्य सुतव्यये ? ।
रोहिताश्वं हरिर्मोहादाश्लिष्यत् किल पूर्ववत् ॥३९६॥

सुतारां प्राह देवि ! त्वं, किं रोदिषि तथा कथम् ? ।
वत्सो मां भाषते नैव, भवत्या रोषितः किमु ? ॥३९७॥

किं त्वया मोदको नाऽस्मै, दत्तः ? किं परिधापितः ? ।
नोद्यद्रत्नाऽङ्कितं हारं, किं हस्ती नाऽर्पितो मया ? ॥३९८॥

क्षमस्व वत्स ! लाहि त्वं, स्वेच्छया यत्तु रोचते ।
इत्यनुकूलयन् पुत्रं, देव्याऽसौ परिदेवितः ॥३९९॥

किं न पश्यसि मूढ ! त्वं, गताऽसुं तनयं निजम् ? ।
गताऽसुश्च कथं पश्येदाश्लिष्येन्निगदेद्धसेत् ? ॥४००॥

किमारब्धं त्वया सार्धं, नार्या ? किं नैषि वेगतः ? ।
इत्युक्तः श्वपचेनाऽसौ, भयाच्चैतन्यमासदत् ॥४०१॥

अज्ञासीच्च मृतं पुत्रं, चेष्टयाऽथाऽश्रुलोचनः ।
पप्रच्छ सुतारां पुत्रवृत्तान्तं साऽप्यचीकथत् ॥४०२॥

अद्याऽयं प्रातरेवाऽऽगात्समित्पुष्पकृते वने ।
मदभाग्यादसौ दष्टो, दुष्टेन भुजगेन हा ! ॥४०३॥

विनाऽऽत्मीयान्न कोऽप्यस्य, विषस्योत्तारणं व्यधात् ।
आत्मेव हि विना धर्माच्छून्यं बन्धुं विना जगत् ॥४०४॥

हरिश्चन्द्रस्ततो दध्यौ, धिग्मां व्यसनपातिनम् ।
एकत्र श्वपचः क्रुद्धोऽन्यत्र पुत्रव्ययक्लमः ॥४०५॥

कथं मे वक्ष्यतो हस्तौ, पुत्रवस्त्राऽऽहृतौ हहा !!? ।
स्वाम्यादेशमकर्तुं यन्नैवोजस्वि मनो मम ॥४०६॥

अथवा मे पुत्रमृत्यौ, को विचारो ? यदस्म्यहम् ।
श्वपचाऽधीनदेहस्तद्यद्वक्ति स करोमि तत् ॥४०७॥

अन्यथा स्यां प्रतिज्ञातभ्रष्टः सत्त्वकलङ्कितः ।
सत्त्वैकतानवृत्तीनां, नाऽपत्याऽऽद्यनुरागता ॥४०८॥

इति सत्त्वाऽनिलोद्भूताऽपत्याऽऽबन्धः स सात्त्विकः ।
भूत्वा पराङ्मुखोऽशक्तो, याचितुं स्फुटया गिरा ॥४०९॥

अर्पयाऽऽच्छादनमिति, सञ्ज्ञया प्रतिपादयन् ।
हस्तं प्रसारयामास, हरिश्चन्द्रः प्रियां प्रति ॥४१०॥

सुताराऽपि च तदभिप्रायं स्फुटमजानती ।
उच्चिक्षेप करे दातुं, रोहिताऽश्वं मुहुस्ततः ॥४११॥

अगृह्णति हरिश्चन्द्रे, पुत्रं साऽऽह ब्रवीषि किम् ? ।
न जानामि तवैतां हि, सञ्ज्ञां त्वं ब्रूहि तत्स्फुटम् ॥४१२॥

धैर्यसन्दंशकाऽऽकृष्टवचनः सात्त्विकोऽवदत् ।
देवि ! तिष्ठतु वत्सोऽयं, वत्साऽऽच्छादनमर्पय ? ॥४१३॥

ततः कल्पद्रुमोद्भूतपुष्पवृष्टिरभूद्दिवः ।
अहो ! सत्त्वमहो ! सत्त्वमिति गीश्च व्यजृम्भत ॥४१४॥

राजाऽप्यपश्यदात्मानमयोध्यायां निजौकसि ।
अलङ्कृतमहासिंहासनं स्वसदसि स्थितम् ॥४१५॥

रोहिताश्वमपश्यच्च, क्रोडे क्रीडन्तमात्मनः ।
अश्रान्तकान्तिरत्नाऽङ्कहारस्फारश्रियं मुदा ॥४१६॥

मुनिशापवशात्कीरशृगालत्वं पुराऽऽगतौ ।
कुन्तलं वसुभूतिं च, पुरोऽद्राक्षीत् कृताऽञ्जलिम् ॥४१७॥

यमनिकाऽन्तरे चैव, द्रष्टुं नाटकमागताम् ।
सुतारां भाषमाणां च, सखीं शुश्राव भूपतिः ॥४१८॥

पुरतश्च सुसङ्गीतरसनिर्मग्नचेतसाम् ।
नृपाऽमात्यप्रभृतीनामद्राक्षीत्संसदं निजाम् ॥४१९॥

प्रतिमन्दिरमैक्षिष्ट, क्रियमाणं च नागरैः ।
नृत्यत्पुरन्ध्रिविश्राण्यमानदानं महोत्सवम् ॥४२०॥

प्रतीहारमुखप्राप्तविजिज्ञपयिषून् जनान् ।
दूरतो नमतः प्रेक्ष्य, किमेतदित्यचिन्तयत् ॥४२१॥

किं नु स्वप्नो मया दृष्टः ?, किं वा मे मनसो भ्रमः ? ।
किं वा कस्याऽपि दिव्यस्य, चित्रमेतद्विजृम्भितम् ? ॥४२२॥

ततश्च तापसो व्योम्नि, दत्ताऽऽशीरभवत्पुरा ।
यथाऽसि वासवेनोक्तस्तथा दृष्टोऽसि सात्त्विक ! ॥४२३॥

अनुभूतं त्वया यच्च, तत्सर्वं हि कृतं मया ।
तत्क्षमस्व चिरं जीयाः,स्वसत्त्वेन महीपते ! ॥४२४॥

अनपेक्षो यद्यपि त्वं, परदत्तश्रियं प्रति ।
तथाऽपि त्वयि प्रयुक्तकष्टाऽर्जिताऽऽघशुद्धये ॥४२५॥

ददामि तपसा स्वेन, त्वन्नाम्नाऽस्तु पुरी तव ।
अन्तरिक्षे भवांस्तत्र, क्रियात्साम्राज्यमद्भुतम् ॥४२६॥

इत्युक्त्वा तापसो दिव्यशक्त्याऽथ क्वचिदप्यगात् ।
पूर्ववच्च हरिश्चन्द्रो, निजाः पालयति प्रजाः ॥४२७॥

इति तापसनिर्दिष्टां, हरिश्चन्द्रकथां तथा ।
श्रुत्वाऽथ मुमुदे श्रीमानजापुत्रो महीपतिः ॥४२८॥

इति हरिश्चन्द्रकथा ॥

श्रीवज्रायुधकथा

अथ प्रणम्य राजाऽऽह, जैनाऽऽचार्यान् कृताऽञ्जलिः ।
जैनसात्त्विकवृत्तान्तं, समादिशत मां प्रति ॥१॥

स्वचित्ते दध्युराचार्या, यदस्मानेष भूपतिः ।
पप्रच्छ साञ्जसं नत्वा, तत्प्रबोधं समेष्यति ॥२॥

सम्यक्त्वमूलचारित्रज्ञानाऽधिगमभाग्यवान् ।
जिनधर्मश्रुतिश्रद्धां, स्वयमेत्यल्पकर्मकः ॥३॥

राजानं प्रोचुराचार्याः, शृणुत श्रद्धया ननु ।
दयादानक्षमानाथां, वज्रायुधकथां, प्रथाम् ॥४॥

प्राग्विदेहे समस्तीह, नगरी रत्नसञ्चया ।
या सद्विवेकसम्पत्त्योः, पाणिग्रहणवेदिका ॥५॥

प्रजानां न्यायतः क्षेमकारः क्षेमङ्करो नृपः ।
तत्राऽस्ति पृथिवी तन्व्या, यज्जीवितेन जीवितम् ॥६॥

तस्य चाऽस्ति सती धर्मनरेन्द्राऽऽस्थानमण्डपा ।
जगन्मित्रं कलत्रं तु, रत्नमालेति नामतः ॥७॥

सुस्वप्नसूचितः प्राज्यसाम्राज्यप्रभुताऽऽस्पदम् ।
तयोर्जज्ञे सुतो वज्रायुधो वज्रं महीभृताम् ॥८॥

यो बाल्यादपि विज्ञातकर्तव्यक्रमसङ्गमः ।
साक्षिमात्रं कलाऽऽचार्यमाधायाऽध्यैष्ट सत्कलाः ॥९॥

स्वीकुर्वन् यौवनं रम्यं, स्वीकृतो रूपसम्पदा ।
ऊरीकुर्वन् गुणग्रामं, विद्वद्भिरुररीकृतः ॥१०॥

अङ्गीकुर्वन् महादानं, यशसाऽङ्गीकृतो मुदा ।
त्यजन् दोषकुलं दूरात्, सन्त्यक्तो व्यसनैरपि ॥११॥

गृह्णन् परगुणान् काले, माहात्म्येनाऽप्यगृह्यत ।
कुर्वन् परप्रशंसां च, चक्रे ख्यातः प्रशंसया ॥१२॥

आश्लिष्यन् विक्रमं स्नेहादाश्लिष्टो विजयश्रिया ।
पोषयन्न्यायमेवोच्चैर्नानाश्रिभिरपोष्यत ॥१३॥

शुश्रूषमाणः स्वगुरून्, शुश्रूषितः किलोत्तमैः ।
शृण्वानो धर्मशास्त्राणि, गीयमानश्रुतो जनैः ॥१४॥

अनिच्छन् परकलत्राण्यनिष्टो दुर्गतेरभूत् ।
रक्षयन् सर्वभूतानि, रक्षितस्त्रिदशैरपि ॥१५॥

विदधद्देवपूजां च, धर्मेण विदधेऽर्चितः ।
मान्यांश्च मानयन् भक्त्या, मानितः शत्रुभिः स्वयम् ॥१६॥

सात्त्विकानां चक्रवर्ती, सत्यानां पुनरग्रणीः ।
आश्रितानां च कल्पद्रुर्लीलाकौतुकपर्वतः ॥१७॥

दोषैककण्टकक्षेत्रे, गुणग्रामाऽब्जिनी हिमे ।
यौवनेऽपि क्रमाच्चक्रे, स पुमर्थत्रयं सदा ॥१८॥

यतः— धर्माऽर्थकामत्रिपदीगतः स्यादुद्यौवने यः पुरुषोत्तमः सः ।
योऽक्ष्णामिवैषां त्रितयस्य मध्यादेकेन हीनः स किमीश्वरः स्यात् ? ॥१९॥

एवं गुणाऽनुरूपाऽङ्गः, कुमारो लोकजीवितम् ।
यौवराज्यं प्रपेदानः, प्राप वज्रायुधो यशः ॥२०॥

इतश्च स्वर्गे द्वितीये, त्विन्द्रः सामानिकाऽऽवृतः ।
अप्सरोभिर्गीयमानगुणग्रामः शचीयुतः ॥२१॥

प्रतिष्ठापात्रैर्गीर्वाणैर्विदधत्सत्कथां सताम् ।
दातॄणां सात्त्विकानां च, सत्यानां भुवि देहिनाम् ॥२२॥

उवाच शक्रः स्वर्गेभ्यः, पातालेभ्योऽपि भूर्वरा ।
यदियं सात्त्विकक्षेत्रं, सात्त्विके स्युर्गुणाः परे ॥२३॥ [त्रिभिर्विशेषकम्]

तन्न सत्त्वं हि देवानां, दैत्यानां व्यन्तराऽऽत्मनाम् ।
ज्योतिष्काणां च यत्सत्त्वं, मनुष्याणां निरर्गलम् ॥२४॥

तत्राऽपि तारतम्येन, प्रोत्सर्पत्सत्त्वमुच्चकैः ।
प्राप वज्रायुधे निष्ठां, सत्त्वं नाऽतः परं यतः ॥२५॥

तत्र स्थितं च तत्सत्त्वं, वज्रे रेखेव नाऽन्यथा ।
कर्त्तुं हि पार्यते देवैरप्यवार्यपराक्रमैः ॥२६॥

ततश्चाऽसहमानस्तत्प्रशंसां कोऽपि निर्जरः ।
अनुवज्रायुधं सत्त्वधुरीणा इति कोपवान् ॥२७॥

देवानां पुरतो मर्त्याः, शस्यन्त इति हास्यवान् ।
धिक् प्रभुत्वं न यत्राऽस्ति, विचार इति खेदवान् ॥२८॥

कुर्वे छत्रं महीं दण्डं, मेरुमित्यवलेपवान् ।
एषोऽहं चालयाम्येनं, सत्त्वादित्यनुबन्धवान् ॥२९॥

वीक्ष्यमाणः क्रुधा शक्रं, सभायां विक्षिपन् दृशम् ।
क्षोभयंश्च सुरीवर्गं, निर्ययौ संसदो बहिः ॥३०॥

वयस्येन किलैकेनाऽन्वीयमानः सुरः स तु ।
उवाच प्रथमं शौर्ये, परीक्ष्योऽयं मया पुमान् ॥३१॥

दैवाच्च तत्र निर्व्यूढो, वीक्ष्यः सत्त्वे श्लथोऽभवन् ।
द्विःपरीक्षितुमारब्धो, निर्वाहं याति कोऽपि किम् ? ॥३२॥

इति मित्रेण निश्चित्याऽवततार भुवस्तले ।
परीक्षाऽवसरं वज्रायुधस्य स व्यलोकयत् ॥३३॥

इतश्च स कुमारोऽपि, वज्रायुधो युधि स्थिरः ।
उद्यानपालकेनाऽथ, विज्ञप्तो रचिताऽञ्जलिः ॥३४॥

देवाऽगात्कामदेवस्य, वयस्यस्त्रिजगज्जये ।
मानिनीमानमुद्राणां, भङ्गेऽधिकारवान् मधुः ॥३५॥

क्रीडन्ति मधुमासे च, युवानः कामिनीसखाः ।
उद्याने मधुरोद्गानप्रीताऽन्तःकरणस्थिराः ॥३६॥

ततश्चाऽऽशु कुमारेण, कृतदर्शनकौतुकात् ।
आरामः सफलीकार्यः, फलितोऽपि निजैः फलैः ॥३७॥

इति तेन सविज्ञप्तः, कुमारः सपरिच्छदः ।
चचाल कृतसङ्केतः, प्रियया सह कानने ॥३८॥ [युग्मम्]

अतः परं नाटकच्छायया कथ्यते कथा ।

(ततः प्रविशति वज्रायुधकुमारो गुणाभिराम-बुद्धिनिवासप्रभृतिकश्च परिवारः ॥)

कुमारः— (सहर्षं सर्वतो विलोक्य) गुणाऽभिराम ! रामणीयकेनाऽतिक्रान्तनन्दनोद्यान-मुद्यानमिदमीक्ष्यते । पश्य—

यातं भूमितले फलेग्रहितरोः शाखाभिराषाटिनो-
ऽप्येणप्रेरणकर्मणि प्रणिगदन्त्येते वचस्तापसाः ।
नृत्यत्केकिविलोकनाच्छिखिशिशुर्लास्याय पश्याऽऽकुलः
स्पर्द्धाबन्धमधीयते च निपुणं गीर्वाणवाचः शुकाः ॥

गुणः— देव ! इदमित्थमेव । किञ्च अकृतराज्याऽभिषेकोऽपि सर्वगुणोत्कृष्टत्वादुक्ति-शोभाऽर्थमत्र त्वं राजेति व्यपदिश्यसे ।

यतः—

पश्चादपि चक्रवर्ती राजा त्वं भविष्यसि, ततो भवतामत्र प्रदेशमलङ्कुर्वता-मुद्यानलक्ष्मीः मङ्गलाय प्रेक्षणकोत्सवमिव प्रचक्रमे । तथाहि—

चूतः कोकिलकामिनीकलरवैः प्रारब्धगीतध्वनि-
र्वंशं पूरयति क्वणन्मधुकरश्रेणिच्छलात्केतकः ।
वातोद्धूतशिखामिषादनुकलं दत्ते लता हस्तका-,
नातोद्यं वितनोति पर्वतपतद्वाचालवारिस्वरः ॥

राजाः— बुद्धिनिवास !

द्रष्टव्यं वस्त्वभीष्टाय, प्रदर्श्य स्वयमीक्ष्यते ।
नाऽदृष्टमरुणेनैष, जगत्पश्यति भास्करः ॥

ततो यावद्देवी क्रीडोद्यानमलङ्करोति तावदस्मिन् देववेश्मनि क्षणं प्रतीक्षामहे, पश्चात्सम-मेवाऽऽरामलक्ष्मीमवलोकयिष्याम इति ।

(सर्वे तथा नाटयन्ति)

राजा— (देवताऽऽयतनाऽभिमुखमालोक्य) कथमादितीर्थङ्करप्रतिमेव दृश्यते ? (सहर्षं सहसाऽपसृत्योपस्तौति)—

आदौ यो वितितान मानवभवभ्राजिष्णुविष्णुप्रिया-
सम्पद्धेतुकलाकलापभवनावज्ञानदीनाऽऽत्मनि ।
किञ्चाऽमुत्र पवित्रवाक्यरचनाधर्मोपदेशाद्दौ,
शश्वन्मोक्षसुखं स नाभितनुजः श्रेयांसि पुष्णातु नः ॥

(नेपथ्ये)

[१]इंदो इदो देवी लच्छीवई ।

लक्ष्मीवती— चंदा[२]ऽऽणणे ! जदो पभुदि मे पुत्तो **सहस्साउहो** अज्जउत्तेण नियजुवरायपए निवेसिदो तदो पभुदि य्येव मे अंगाणि तथाविहनिव्वुइभायणत्तणं पत्ताणि ।

चन्द्राऽऽनना— [३]देवि ! एवं नेदम् ।

---

१. इत इतो देवी लक्ष्मीवती ।
२. चन्द्राऽऽनने ! यतः प्रभृति मे पुत्रः सहस्राऽऽयुध आर्यपुत्रेण निजयुवराजपदे निवेशितः, ततः प्रभृत्येव मे अङ्गानि तथाविधनिर्वृति-भाजनत्वं प्राप्तानि ।
३. देवि ! एवमेतत् ।
पूर्वं राजवध्वः स्वपुत्रपदप्राप्तिप्रार्थनसनाथाः ।
पदनिर्णये सौख्यं एकस्याः परासां रणरणकः ॥

पुव्वं रायवहूओ, सपुत्तपयपत्तिपत्थणसणाहा ।
पयनिण्णयंमि सोक्खं, एगाइ पराण रणरणओ ॥

उद्यानपालकः— (उच्चैःस्वरं) देव ! त्वर्यतां त्वर्यताम्, अत्र स्थिता युष्मान् प्रतिपालयति देवी ।

(राजा तदाकर्ण्य सत्वरं गमनेन देवीमुपसर्पति)

राजा— देवि ! इतस्तावत्कृताऽर्थीकुरु चक्षुषी ।

केतक्यां बकुलेभ्योऽभ्यागच्छद्भृङ्गाऽऽवलिच्छलात् ।
अन्याऽभिष्वङ्गभङ्गाय, मिथः सन्दानमेतयोः ॥

गुणः— देव ! इतः पश्य ।

जनितद्विजिह्वभीतिः, शशिविशदकलाकलापसम्पूर्णः ।
सहचर्या सह चर्यामत्र करोति त्वमिव केकी ॥

(नेपथ्ये स्वगतम्)

यतः प्रारभ्य देवत्वेनाऽहमभवं ततः प्रभृति क्षुण्णमीक्षमाणस्य ममाऽधुनाऽमुना प्रत्यर्थिना दृष्टिपथमवतीर्णम्, भवतु तावत्, दुरात्मानमेनं वज्रायुधं व्यापाद्य प्रस्तुतमाचरिष्यामि (इति सत्वरमुपक्रामति । उच्चैःस्वरं च)

अरे प्राग्जन्माऽरे ! त्वमनुभव तावत्सहचरी-
परीरम्भाऽऽरम्भात्सुखमभिसहे यावदधुना ।
मृगेन्द्रे निस्तन्द्रे खरनखरकोटिक्षतशिरा,
वराको निःशङ्कं प्रभवति न रन्तुं गजपतिः ॥

किञ्च रे !

विमुञ्च त्वं क्रीडां भज सुभटभावं भव मया,
नियुद्धश्रद्धालुर्वद मदकिरः सङ्गरगिरः ।
न चेदित्थं दारव्यतिकरपरिष्कारमधुरो,
भवानावासेऽभूदतिथिपथपान्थोऽन्तकपतेः ॥

राजा– (ससम्भ्रममूर्ध्वमवलोक्य) बुद्धिनिवास ! किमेतच्छब्दायमानं ज्योतिरागच्छति ? ।

बुद्धिनिवासः– देव ! यथैतत्कठिनवचनान्याचष्टे तथा जानेऽकाण्डकुपितः कश्चनाऽपि देवो भवन्तं योधयितुकामः समभ्येति ।

(ततः प्रविशति तेजःपरीतशरीरो विद्युद्दंष्ट्राऽभिधो देवः ।)

राजा– (तत्राऽवज्ञां नाटयन्) देवि ! पश्य ऋतुसार्वभौमवसन्तस्य प्रभावम् ।

स्वयं मानं मुक्त्वा पतिचरणमूले निपतिता,
सखीहासत्रासाद्युवतिरियमूर्ध्वीभवति न ।
पतिस्त्वीषत्प्रेङ्खत्स्मितविततदन्तद्युतिगुरू–,
दरः सारङ्गाक्षीमयमदयमालिङ्गतितराम् ।

चन्द्रानना– (संस्कृतमाश्रित्य राजानं प्रति) देव ! इतः पश्य–

प्रियया प्रियस्य चित्तं, भिन्नं दूरादचेतनं तत्सः ।
बहिराकृष्टुमिवाऽस्याः, पुरतो वदनेऽङ्गुलीः क्षिपति ॥

देवः– (सरोषं किञ्चित्समीपीभूय) अरे वज्रायुध !

न यावत्प्रादुःष्यान्मदसिगरुडस्तावदपरे,
नरेशव्यालाः स्युर्बहलगरलोद्गारगुरवः ।
स्थिते त्वस्मिन् साक्षाद्गिरिकुहरवल्मीकशरणा,
भवेयुः खल्वेते त्वमिति मयि रीढां द्रढयसि ॥

तन्न साम्प्रतम् । यतः–

युधि विजयसे यत्त्वं भूपानुपाधिरुपासक–
स्तव तदखिलक्ष्माभृच्चक्राऽपमानकचक्रिता ।
प्रभवति न सा दैवत्वान्मे न किञ्चन मन्यसे,
जगदपि यया तन्माऽस्मान् रे ! मदादवजीगणः ॥

किन्तु–

बाहूबाहविशक्तिश्चेत्तद्बाहुं स्वं प्रदर्शय ।
अथाऽस्यसि तथाऽपि त्वं करवालं करे कुरु ॥

राजा– (सक्रोधम्)–

आः कालेन कटाक्षितः किमसि ? किं त्वत्पत्रमुत्क्षिप्तव-
दैवं दृष्टिविषोरगं किमगमः ? किं मर्त्तुकामः स्वयम् ? ।
मिथ्यौजस्विमहीश्वर ! श्वयथुवद्दोर्दण्डकण्डूच्छिदे-
ऽस्माभिः सम्प्रति शस्त्रकर्मनिपुणैर्यद्युद्धबुद्धिर्भवान् ॥

बुद्धि०– (राजानं प्रति)–

ये तावत्पृथिवीभुजः समभजंस्त्वत्खड्गधाराव्रतं,
मर्त्यत्वादधिकश्रियः समभवंस्ते देव ! देवा दिवि ।
देवोऽयं स्पृहयन् दिवस्पतिपदं त्वं शस्त्रहस्तो भवे-,
त्याह त्वां तदिदं कुरून्नतिकृतिख्याता हि युष्मादृशः ॥

देवः– (बुद्धिनिवासं प्रति) अरे भृत्याऽपसद! न जानीमस्तमुपायं येनाऽस्मादस्मानमरानपि मारयिष्यसि (इति वदन् क्रोधाऽऽध्मातः क्रीडाशैल-मुत्पाट्य मुञ्चति ।)

(विना राजानमन्ये काकनाशं नश्यन्ति ।)

लक्ष्मीः– (नाऽतिदूरं प्रदेशाऽन्तरमाश्रित्याह) अज्जउत्त[1] ! हा वसुधाधरणे-क्कमल्ल! देहि मे पडिवयणं (इति मूर्च्छति ।) (ततश्च चिरेण किञ्चिल्लब्धचैतन्या आकाशे परिजनं लक्षीकृत्याऽऽह ।)

वसणे सामिय ! मेक्कं, चयित्तु किं जीवियेण तुम्हाण ? ।
पिच्छह चन्दग्गहणे, हरिणेण न एस परिचत्तो ॥

(पुनर्विमृश्य) 'सव्वोऽपि जणो परस्स दोसग्गहणे निउणत्तणं पत्तो न उण अत्तणो' त्ति लोयवयणं सच्चगं य्येव संजायं । जेण भत्तुणो । पायमूलं परिचईय परियणो अहंपि नट्ठा, तओ कहमहं परं परियणमुवलभामि ? । न उण सामिसिणेहविवरीयकारिणमप्पाणं ति (पश्चात् परिक्रामति ।)

---

१. आर्यपुत्र ! हा वसुधाधरणैकमल्ल ! देहि मे प्रतिवचनम् ।
व्यसने स्वामिन् ! मामेकां त्यक्त्वा किं जीवितेन युष्माकम् ? ।
प्रेक्षध्वं चन्द्रग्रहणे हरिणेन न एष परित्यक्तः ॥
'सर्वोऽपि जनः परस्य दोषग्रहणे निपुणत्वं प्राप्तो न पुनरात्मन' इति लोकवचनं सत्यकमेव सञ्जातम् । येन भर्त्तुः पादमूलं परित्यज्य परिजनोऽहमपि नष्टा, ततः कथमहं परं परिजनमुपलभे ? । न पुनः स्वामिस्नेहविपरीतकारिणमात्मानमिति ।

(नेपथ्ये)

देवि ! त्वर्यतां त्वर्यतां सौधगमनाय । यतः—

प्रत्यङ्गमङ्गीकृतमौषधीभिः, स्वमुष्टिभिः पिष्टवतो नगेशम् ।
दृष्ट्वाऽपि तच्चूर्णमसौ तदैव, देवस्य वश्यस्त्रिदशो बभूव ॥

लक्ष्मीः— (दिक्षु चक्षुषी निक्षिप्य) [१]को उण एस सुराहमउइण्णतत्ततऊअयसमाणवयणप्प-वेससंताविआण मे कण्णउडाण पीऊससेयणं करेदि ? । (क्षणमिव स्थित्वा) कहं पुण एस अत्थो सम्मं सवित्थरो सुणेयव्वो ? ।

(प्रविश्य पटाऽऽक्षेपेण)

चेटी०— [२]जयदु जयदु भट्टिणी ।

लक्ष्मीः— (विलोक्य) [३]किं एस अज्जउत्तकुसलवुत्तंतमवगच्छिय पडिनियत्ता पिअंवया ? । भोदु दाव, पुच्छिस्सं । हला **पियंवए** ! जं दाणिं अज्जउत्तस्स देवो वसंगउ त्ति केण वि निवेइयं तं किं तवावि कण्णकुहरे निवडिदं ? ।

प्रियंवदा— [४]सामिणि ! नाणाविहदंडयुद्धपराजितो **देवो** देवस्स वसंगउ त्ति सच्चगं य्येव । किञ्च-अवरं पि किं पि मए सुदं ।

लक्ष्मीः (ससम्भ्रमम्) [५]सावहाणम्मि, कहेहि तं मे जं तए सुणिदं ।

प्रियंवदा— [६]अट्ठमीपमुहधम्मतिहीसु धम्मसालाए ठिओ निच्चलमणा सामी किं पि ज्झाएदि त्ति एवं जाणादि सामिणी ।

लक्ष्मीः— (सस्मितम्) [७]सव्वलोयप्पसिद्धं खु एदं, विसेसं कहेहि ।

---

१. कः पुनरेष सुराधमोदीर्णतप्तत्रपु-अयःसमानवचनप्रवेशसन्तापितयोर्मम कर्णपुटयोः पीयूषसेचनं करोति ? । कथं पुनरेष अर्थः सम्यक् सविस्तरं श्रोतव्यः ? ।

२. जयतु जयतु स्वामिनी ।

३. किं एषा आर्यपुत्रकुशलवृत्तान्तमवगम्य प्रतिनिवृत्ता प्रियंवदा ? भवतु तावत्, प्रक्ष्यामि । हला **प्रियंवदे** ! यदिदानीमार्यपुत्रस्य देवो वशङ्गत इति केनाऽपि निवेदितं, तत् किं तवाऽपि कर्णकुहरे निपतितम् ? ।

४. स्वामिनि ! नानाविधदण्डयुद्धपराजितो **देवो** देवस्य वशङ्गत इति सत्यमेव । किञ्च-अपरमपि किमपि मया श्रुतम् ।

५. सावधानाऽस्मि कथय तत् मम यत्त्वया श्रुतम् ।

६. अष्टमीप्रमुखधर्मतिथिषु धर्मशालायां स्थितो निश्चलमनाः स्वामी किमपि ध्यायति इति एवं जानाति स्वामिनी ।

७. सर्वलोकप्रसिद्धं खल्वेतत्, विशेषं कथय ।

प्रियं०— [१]अज्जेव अट्ठमीदिणं ति नाऊण जुज्झोवज्जियपावस्स सोहिं काउं इओ ट्ठाणओ बाहिरबाहिरो य्येव धम्मसालाए गओ सामी । तओ तत्थट्ठियस्स सामिणो तक्खणे च्चेय आगासाउ मणोवेगेण ओयरिय भयभीयमाणसो कंपमाणसव्वंगो संकोचिदक्खंधबंधो 'ताएहि मं, ताएहि मं'ति मणुस्सभासाए भासमाणो एगो **पारेवओ** तिहुयणिक्कसरणं चरणमूलमल्लीणो ।

लक्ष्मीः— [२]अहो ! कंदलिदभयकोदूहलो कहारसो । तदो तदो ? ।

प्रियं०—[३]तओ गरुडुव्व भुयंगमस्स तस्स मग्गाणुसारी खुहाकरालकुक्खी अणवट्ठियअक्खी 'मम भक्खमप्पेहि, मम भक्खमप्पेहि'त्ति भासंतो एगो **होलाहिओ** समागदो त्ति मए सुदं । अओ वरं किं पि भविस्सदि त्ति न याणामि ।

लक्ष्मीः— (क्षणमिव ध्यात्वा) [४]पियंवए ! हुंते वि बहुंमि पलायणट्ठाणे अणेगलोग संकुले तत्थ आगच्छिय सो **पारेवओ** अज्जउत्तस्स पायमूले निसन्नो, तं ण खु मे सुरूवं पडिहादि। किञ्च अस्सुदपुव्वं खु एदं, जं **सउणावि** पुरुसभासाए भासंति त्ति ।

प्रियं०— [५]देवि ! जुत्तं भणासि, जओ ममावि मणो वियारवई संवट्टदि ।

सच्चत्तेण किमेस सेणभयओ **पारेवओ** नट्ठवं ?,
सं रूवं परिवत्तिऊण किमयं **विज्जाहरो** कीलदि ?,
किं वा सत्तपरिक्खणाय पहुणो सग्गा समुत्तिण्णओ
देवो को वि भवे ?, मयच्छि ! इय नो सम्मं वियाणीयदि ।

---

१. अद्यैव अष्टमीदिनमिति ज्ञात्वा युद्धोपार्जितपापस्य शोधिं कर्तुं इतः स्थानाद्बाह्य बाह्य एव धर्मशालायां गतः स्वामी । ततस्तत्र स्थितस्य स्वामिनः तत्क्षण एव आकाशाद् मनोवेगेन अवतीर्य भयभीतमानसः कम्पमानसर्वाऽङ्गः सङ्कोचितस्कन्धबन्धः 'त्रायस्व माम्, त्रायस्व माम्' इति मनुष्यभाषया भाषमाण एकः पारापतस्त्रिभुवनैकशरणं चरणमूलमालीनः ।

२. अहो ! कन्दलितभयकुतूहलः कथारसः । ततस्ततः ? ।

३. ततो गरुड इव भुजङ्गमस्य तस्य मार्गानुसारी क्षुधाकरालकुक्षिः अनवस्थिताऽक्षी 'मम भक्ष्यमर्पय, मम भक्ष्यमर्पय' इति भाषमाण एकः श्येनः समागत इति मया श्रुतम् । अतः परं किमपि भविष्यति इति न जानामि ।

४. प्रियंवदे ! भवत्यपि बहुनि पलायनस्थानेऽनेकलोकसङ्कुले तत्र आगत्य स पारापत आर्यपुत्रस्य पादमूले निषण्णः, तन्न खलु मम सुरूपं प्रतिभाति । किञ्च अश्रुतपूर्वं खल्वेतत्, यच्छकुना अपि पुरुषभाषया भाषन्त इति ।

५. देवि ! युक्तं भणसि, यतो ममाऽपि मनोविचारवर्ति संवर्त्तते ।
सत्यत्वेन किमेष श्येनभयतः पारापतो नष्टवान् ?,
स्वं रूपं परावृत्य किमयं विद्याधरः क्रीडति ?,
किं वा सत्त्वपरीक्षणाय प्रभोः स्वर्गात् समुत्तीर्णो
देवः कोऽपि भवेत् ?, मृगाक्षि ! इति नो सम्यग् विज्ञायते ।

लक्ष्मीः— (हस्तन्यस्तकपोलतला तूष्णीमास्ते ।)

प्रियं— (स्वगतम्)

इट्ठे[1] जणे धुवमुवद्दवसंसएवि, सेओविवज्जयमई अवरो वि भोदि । एसा पुणो पणयणी पइणो मणंमि, लद्धासणा णणु भविस्सदि किं न एवं ॥

(सनिःश्वासं च) कहं पुण सामिणीए मणो विणोयइस्सं ।

(प्रविश्य)

क्षेमङ्करा दासी— सामिणि[2] ! सामिणि ! सरणीकिददेवपायमूलस्स पारेवयस्स थंभनिज्जूहयनिसण्णस्स **सेणस्स** य निरक्खणत्थं मिलिदो सव्वो वि णयरजणो त्ति, अज्जा तुहमं पि हक्कारेदि ।

(लक्ष्मीः— ससम्भ्रममुत्थाय सखीभ्यां सह सौधाय परिक्रामति ।)

(ततः प्रविशति यथा निर्दिष्टो **राजा श्येनः पारावतः अमात्य-पुरुषोत्तम-सहस्त्रायुध**प्रभृतिकश्च परिवारः) ।

पारापतः— (स्वगतं) अहो ! स्वैरप्रलपितेषु मानोर्ध्वं पाण्डित्यमाखण्डलस्य—

आस्ते कश्चन काञ्चनप्रतिकृतिर्मर्त्यः पृथिव्यां स चा-,
चाल्यः स्वर्गनिवासिनामपि वपुश्छेदेऽपि मानाद्ध्रुवम् ।
किञ्च प्रत्युत मण्डनं स भविता तेषामपीति ब्रुव-
न्नीशानाऽधिपतिस्ततान न मनः कस्य प्रकोपाऽऽकुलम् ? ॥

किमन्यदुच्यते ?,

अयमहमधुना कृतवानेव मोघं मघोनस्तद्वचनम् । अथवा—

आत्मानं ख्यापयेद्विद्वान्नानिष्पन्नप्रयोजनः ।
राहुर्गृहीतचन्द्राऽर्को दृश्यते दिवि नाऽन्यदा ॥

---

१. इष्टे जने ध्रुवमुपद्रवसंशयेऽपि श्रेयोविपर्ययमतिरपरोऽपि भवति ।
एषा पुनः प्रणयिनी पत्युर्मनसि लब्धासना ननु भविष्यति किं नैवम् ? ॥
कथं पुनः स्वामिन्या मनो विनोदयिष्यामि ? ।

२. स्वामिनि ! स्वामिनि ! शरणीकृतदेवपादमूलस्य पारापतस्य स्तम्भनिर्यूहकनिषण्णस्य श्येनस्य च निरीक्षणार्थं मिलितः सर्वोऽपि नगरजन इति आर्या युष्मानपि आकारयति ।

(प्रकाशं) क्षत्रियाऽवचूल ! राजन् !

यानाश्रित्य पराक्रमो विजयते दिग्मूलकूलङ्कषः
सङ्ग्रामेषु विधाय तानपि परोलक्षान् विलक्षान्नृपान् ।
व्योमाऽन्तर्गतभानुनेव भवता विश्वैकराजेन भू-
राक्रान्ता स्वकरैस्ततः किमनयध्वान्तेन विस्फूर्ज्यते ? ॥

अपि च, (सदैन्यमिव)—

शूरस्त्वं यदसि प्रतापवसति**र्जिष्णु**र्यदिष्टः श्रिया,
ईशानो यदुमाप्रियो **विधिर**सि त्वं यत्प्रजानां पतिः ।
श्रीदो यन्निधिनायकस्त्वमसि **चाऽर्हन्** यत्क्षमारक्षिते-
त्येवं देवमयोऽसि **देव** ! तदतः **श्येना**ऽधमात् पाहि माम् ॥

राजा— अरे पक्षिन् ! मा भैषीः, मा भैषीः । अयमहमस्मि कीनाशाऽऽस्य-कुहरादपि भवतस्त्राता ।

पारा०— (साऽऽनन्दमिलाताललुलितभालतलो राजानमानम्य) महाप्रसादः (इति वदन् अपत्यमिव पितुरुत्सङ्गं राज्ञः समारुह्य किञ्चित्स्वास्थ्यमिवाऽभिनीतवान् ।)

(परिजनः परस्परमुपर्युपरि स्थितिमाधाय चरणफणाऽवस्थानेन सकौतुकमवलोकयति ।)

श्येनः— (साऽवष्टम्भम्) राजन् !

ममैतद्भक्ष्यमित्येवं, प्रसिद्धं जगतीतले ।
तदर्पयैनमात्मानं, तर्पयामि यथाऽऽतुरम् ॥

राजा— (सस्मितम्) पक्षिराज !

अप्यात्मनाशे शरणाऽर्पणाय, किं स्यान्मनः क्षत्रियवंशपुंसः ।
नागस्त्यपीतादपि मेनकायाः, सुतं समुद्राज्जगृहे महेन्द्रः ॥

किञ्च—

न युज्यते श्येन ! तवैतदेतत्, प्राणैर्निजप्राणितपोषणं यत् ।
भुक्तेऽप्यमुष्मिन् क्षणमेव तृप्तिः, स्यात्ते ह्यकालेऽस्य तु कालरात्रिः ॥

अपि च–

भीतिर्यथा ते मरणात्परेषां, हे श्येनिकावत्स ! तथाऽवगच्छ ।
अप्यन्यभोज्याद्व्रजति क्षुधाऽर्त्तिर्न नारकाऽर्त्तिः सहनाद्विना ते ॥

तद्भो ! मा मुह, मा मुह, किन्तु दूरत एव मुञ्च देहिग्रसनदुर्व्यसनम् ।

श्येनः– (सोपहासम्) राजन् ! यथाविहितमभिदधासि, अहमप्येवं वेद्मि–

यदुत प्राणिवधात्प्राणी नरकेषूत्पद्यते । परन्तु–

यो जन्तुजीवातुकुले भवेत्तं, प्रत्येष दोषः खलु दोष एव ।
अस्मादृशां प्राणिवधप्रधानमानस्पृशां प्रत्युत मण्डनं सः ॥

ततश्चाऽऽत्मकुलपारवश्येनाऽन्यकुलाऽपेक्षया निन्द्यमप्याचरतो न दोष इत्येतस्याऽर्पणेन मां प्रीणयितुमर्हसि (इति ब्रुवन् सरभसं किञ्चिदग्रतः सरति)

(पारा० सभयमिव राज्ञः क्षौमाऽम्बरमध्ये प्रविश्याऽऽत्मानं गोपयति ।)

राजा– (हस्तेनैनं संस्पृश्य) अरेरे !!! कान्दिशीक ! मा त्वमङ्गीकृता-ऽस्मच्चरणशरणोऽपि भैषीः ? । नाऽहमस्मै प्राणसन्देहेऽपि त्वामर्पये ।

श्येनः– नृपतिलक !

निर्विशेषं महान्तः स्युः, शरण्याः शरणाऽर्थिनाम् ।
जाड्यं नो कस्य शीताऽऽर्त्तस्याऽग्निस्पर्शात् प्रशाम्यति ।

ततो यथा त्वमेतस्मै मुहुर्मुहुः 'मा भैषीः' वचनानि प्रयच्छसि तथा मामपि क्षुधा-यास्त्रातुमर्हसि । कालक्षेपाऽसहिष्णवो हि मत्प्राणास्तव पश्यत एव प्रयान्त्येते ।

राजा– (ससम्भ्रमम्) कोऽत्र भोः सूपकारेषु ? ।

(प्रविश्य)

चुन्दलकः– अयमस्मि, समाज्ञापयतु देवः ।

(राजा– चुन्दलकस्य कर्ण एवमेव)

(ततश्चुन्दलको निष्क्रम्य गृहीतदिव्यमोदकस्थालीकः प्रविशति ।)

विदूषकः— (स्वगतम्) ही[1] ही भो ! जम्मकालमारंभिय अज्जेव मे पुव्वकयसुकयकम्मेहिं फलिदं, जं दाणि ममगोत्तेण वि अदिट्ठा दिव्वमोयगा दीसंति (सोच्छ्वासं च) न केवलं दीसंति केण वि उवाएण रायस्स पासाओ मग्गिय भक्खिस्सं च । (प्रकाशं राजानं प्रति) वयस्स ! अज्ज दाव अईव कुविदाए भट्टिणीए पिट्टिय घराओ निस्सारिदो म्हि ।

राजा— (सस्मितम्) कदाचिद्भो ! मोदकान् याचितुमयमारम्भः । ततस्ततः—

विदू०— (सहासम्) तंओ[2] मे खुहाकिलिण्णस्स मोअगा दावेसि ? ।

राजा— (सस्नेहम्) एवं करिष्यते ।

(चुन्द०— मोदकस्थालीं राज्ञे समर्पयति ।)

(विदू०— स्पृहोत्कलिकां नाटयन् राज्ञो हस्तान्मोदकस्थालीमाच्छिद्य तान् सत्वरमास्वादयति ।)

(अन्ये सर्वे हसन्ति ।)

(राजा— सकोपस्मितं भ्रूभङ्ग्या विदूषकमधिक्षिपन् पुनस्तदाऽऽनयनाय चुन्दलकमादिशति ।) (चुन्द०— तथा करोति)

(राजा स्वहस्ते मोदकमेकमादाय श्येनाय प्रयच्छति ।)

श्येनः— (सकौतुकमिवाऽवलोक्य) वदान्यमूर्धन्य ! किमेतत् ? ।

राजा— मोदकोऽयम् ।

श्येनः— (अजानन्निव) राजन् ! मोदक इति कः शब्दार्थः ? ।

राजा— मोदयति क्षुधातुरमित्यर्थः ।

श्येनः— ज्ञातम्, परं विनाऽस्मादृशान् पक्षिण इत्यनेन सोपाधिकमिदं वचः । अस्मादृशा हि क्रव्यादा न तदात्वोत्कृत्तपललाद्विना तृप्यन्ति । तदलमनेन, एनमेवाऽर्पय मद्भक्ष्यम् ।

---

१. ही ही भो ! जन्मकालादारभ्य अद्यैव मम पूर्वकृतसुकृतकर्मभिः फलितं, यदिदानीं मम गोत्रेणाऽप्यदृष्टा दिव्यमोदका दृश्यन्ते । न केवलं दृश्यन्ते, केनाऽप्युपायेन राज्ञः पार्श्वाद् मार्गयित्वा भक्षयिष्यामि च । वयस्य ! अद्य तावदतीव कुपितया भट्टिन्या कुट्टित्वा गृहान्निस्सारितोऽस्मि ।

२. ततो मम क्षुधाक्लान्तस्य मोदकान् दापयसि ? ।

(परा०— वेपमानवपुः क्षितिपतिमुखमीक्षते ।)

राजा— (स्वगतम्) आः ! का गतिः ? ।

त्रातव्यः कान्दिशीकोऽयं, शकुनिः प्राणरक्षणात् ।
त्रातव्यश्च क्षुधाऽऽर्त्तोऽयं, शकुनिः प्राणरक्षणात् ॥

पुरुषोत्तमः— (जनाऽन्तिकं राजानं प्रति)

उपाध्यायाऽवाप्तेर्भृशमसकृदभ्यासवशतो,
वचोभिर्देवानां शुकशकुनिरेव प्रवदति ।
अभीक्ष्णं यत्त्वेतौ धरणिधर ! धीरं प्रलपत-
स्ततो मन्ये कोऽपि त्रिदशपतिरेवं व्यवसितः ॥

राजा— अमात्य ! अयं देवो वा भवतु अन्यः कोऽपि वा भवतु । केवलमस्माभिस्तावत् स्वप्रतिज्ञानिर्वाह एव विधातव्यः ।

श्येनः— (सकोपमिव) ननु दूयेऽप्राप्तस्वभक्ष्यः कालक्षेपेण ।

राजा— (स्वगतम्)

श्येनो विना न तुष्यति, मांसात् पारापतस्तु पातव्यः ।
दोषोऽन्यमांसदाने, ददे तदेतन्निजं मांसम् ॥

(प्रकाशम्)

पक्षिन् ! अक्षमे दातरि वस्तुव्यत्ययेन लोकेऽपि व्यवहारः प्रवर्तते । ततो यदि भवतः प्रतिभासते तदहं पारापततुलितानि निजवपुर्मांसशकला-न्युत्कृत्योत्कृत्य तुभ्यं प्रयच्छामि ।

परा०— (सरोमाञ्चं स्वगतम्) भगवान् **पाकशासनः** समीचीनवचन इव सम्पत्स्यते ।

श्येनः— (क्षामाऽक्षरम्) एवं भवतु ।

राजा— (सोत्साहम्) कोऽत्र भोः !? ।

(प्रविश्य)

राजाऽध्यक्षः— अयमस्मि, समादिशतु महाराजः ।

(राजा— राजाऽध्यक्षस्य कर्णे एवमेव ।)

राजाऽध्यक्षः— आदेशः प्रमाणम् (इति निष्क्रम्य तुलामानीय च राज्ञे समुपनयति ।)

(राजा— तुलामुपरि संयमय्य एकस्मिंस्तुलाभाजने स्वहस्तेन पारापतमा-रोपयति, साहंकारं च शस्त्रिकया निजोरुमांसलस्थानान्युत्कृत्योत्कृत्या- ऽपरस्मिंस्तुलाभाजने प्रक्षिपति ।)

(नेपथ्ये तुमुलध्वनिः)

श्येनः— (सास्रम्) नमो नमस्तुभ्यमहङ्कारवीराय ।

पुरु०— (सखेदम्) **देव** ! कोऽयमस्थाने साहसोत्कर्षः ? ।

शरीरेणाऽमुना नाथ !, त्रातव्यानि जगन्ति ते ।
एकस्य पक्षिणः कार्ये, तदेतद्युज्यते किमु ? ॥

किञ्च—

मायावी कोऽपि देवोऽयमिति तुभ्यमचीकथम् ।
एतदद्याऽपि विज्ञाय, मानिन् ! मुञ्चाऽतिसाहसम् ॥

(राजा— अमात्यवचनमवगणय्य हर्षोत्कर्षं नाटयन् पुनः मांसशकलान्युत्कृत्य प्रक्षिपति ।)

लक्ष्मीः— (सबाष्पम्) अमच्च[१] ! कोऽयमम्हाणमकण्डे वज्जनिवाओ ? ।

अमात्यः— स्वामिनि !

चिह्नमेतद्विजानीहि, दैवस्याऽलङ्कृतक्रुधः ।
वृद्धाज्ञां यदवज्ञाय, कार्यमाचर्यते जडैः ॥

लक्ष्मीः— (साक्षेपं राजानं प्रति)

हा[२] ! अज्जउत्त ! तुमए, पारद्धं सत्तसालिणा किमिणम् ? ।
तुह अङ्गेसु वहन्ती, छुरिया दारेइ मह हिययम् ॥

सहस्राऽऽयुधः— (सैदन्यम्)

यथा यथा क्रव्यमतीव सत्त्वाच्चिक्षेप भूपः स्वतनुं निकृत्य ।
तथा तथाऽङ्गेषु बभार भारं, पारापतो हा ! भविता किमत्र ? ॥

---

१. अमात्य ! कोऽयमस्माकमकाण्डे वज्रनिपातः ? ।

२. हा ! आर्यपुत्र ! त्वया प्रारब्धं सत्त्वशालिना किमिदम् ? ।
तवाऽङ्गेषु वहन्ती क्षुरिका दारयति मम हृदयम् ॥

अथवा किं भाव्यर्थजिज्ञासया ? ।

ग्राह्यस्तनूजो हि पितृणवैरैस्तत्स्वाऽङ्गमांसप्रतिमानखण्डैः ।
सम्पूरयंश्चेलकमात्मपित्रा, कृतां प्रतिज्ञां लघु पूरयामि ॥

(इति यावत्सहस्राऽऽयुधः सज्जो बभूव तावद्राजा सावष्टम्भं किमनया मुहुर्मुहुर्वपुःकर्त्तन-कदर्थनया स्वयमेव तावत्तुलामारुह्य प्रीणयामि पक्षिणमिति तथैव करोति ।)

(कुसुमवृष्टिदुन्दुभिनादाऽनन्तरं आकाशे)

तुलामारोहतः स्वेन, श्रीवज्राऽऽयुधचक्रिणः ।
माने दाने च सत्त्वे च, कस्तुलामधिरोहति ? ॥

(ततः प्रविशति गगनादवतरणं नाटयन् देवः ।)

राजा– (विलोक्य ससम्भ्रमम्) किमेतत् ? ।

(देवः प्रणम्योपविशति)

राजा– (स्वगतम्)

एतौ कुत्रगतौ विहङ्गमवरौ ? रिक्ता किमेषा तुला ?,
मांसोत्कर्त्तनसव्रणा तनुरियं जाता कथं वा पटुः ? ।
कोऽयं दिव्यविभूषणाऽतिसुभगस्तेजः परीतः पुमान् ?,
किं वा सर्वमिदं मम भ्रमवतश्चित्तस्य विस्फूर्जितम् ? ॥

देवः– महासत्त्वाऽवतंस ! अलममुना विस्मयेन, अस्मत्कृतमिदं कपटनाटकम् ।

त्रस्तः **पारावतः** कुद्धः, **श्येनश्च** तमनुव्रजन् ।
युष्मत्सत्त्वपरीक्षाऽर्थं, सर्वमेतन्मया कृतम् ॥

(राजा सव्रीडमधोमुखस्तिष्ठति)

देवः–

नाऽस्त्येव वज्राऽऽयुधचक्रिणोऽन्यः, कुत्राऽप्यहो ! सत्त्ववतां धुरीणः ।
श्लाघामिमामिन्द्रमुखान्निशम्य, क्रोधात्कृतं यत्तदिदं क्षमस्व ॥

(सपश्चात्तापं च)

गुणाऽनुरागिणः केऽपि, गुणिनं ख्यापयन्त्यलम् ।
अधमाः केऽपि निन्दन्ति, तद्गुणानसहिष्णवः ॥

महासत्त्वचूडामणे ! स भगवान् गुणाऽनुरागी **दिवस्पतिः** स्वमुखेन मध्येदेवसभं भवतः सत्त्वस्तुतिमकरोत् । अहं तु त्वत्सत्त्वस्याऽनभिज्ञत्वाद-सहिष्णुरेवमकार्षम् । तदेतदज्ञानस्य मे क्षमस्व ।

राजा– पुरन्दरोऽप्यस्मच्छ्लाघां करोतीति महान् विस्मयः ।

देवः– भूमिवासव ! मैवमाशङ्किष्ठाः । यतोऽस्माभिरपरस्त्वमिन्द्रो मन्यसे ।

राजा– (सविलक्षस्मितम्) वज्रायुधेतिनामसाम्यान्मामपीन्द्रेण तुलयन्तु भवन्तः ।

देवः–

वज्रायुधस्त्वमेवाऽसि, न पुनः स्वर्गिणां पतिः ।
सपक्षान् भूभृतोऽभैत्सीः, पक्षानेव स भूभृताम् ॥

(राजा– सवैलक्ष्यं स्मयते)

देवः– नृपतितिलक ! भवत्सत्त्वाऽनुरञ्जितोऽहं,कथय किं ते प्रियमादधामि ? ।

राजा– त्रिदशपुङ्गव !

अशक्यं कर्तुमन्येन, स्वं सत्त्वं ख्यापितं भुवि ।
कृतश्च सत्यवागिन्द्रः, प्रियं मे किमतः परम् ? ॥

देवः– तथाऽपीदमस्तु,

श्यामां सोमघटीपटीयसितमःश्रीमस्तकानिग्रतीं,
प्राच्यात् पश्चिममद्रिवंशशिखरं स्वर्दण्डरज्ज्वाश्रयात् ।
भास्वत्कुम्भशिरा निराश्रयदिनश्रीवंशपुत्रीयुधे,
यावन्नाभिमुखीं करोति नृपते ! तावद्भवान्नन्दतात् ॥२२०॥

॥ इति श्रीवज्रायुधकथा ॥

श्रुत्वेति सात्त्विकाऽऽख्यानान्याऽऽनन्दमन्थराशयः ।
अजापुत्रो नरकाणां, स्थितिं पप्रच्छ तान् पुनः ॥१॥

आख्यन्नविदुरा बौद्धतापसाः स्वस्वकल्पितम् ।
यथा दृष्टाऽसंवादित्वादजासूर्नाऽभ्यमन्यत ॥२॥

सोऽथ पप्रच्छविनयाज्जैनाचार्यान् कृताऽञ्जलिः ।
राज्ञा दृष्टा यथा तेऽमी, कथितास्ते तथैव हि ॥३॥

ततः प्रत्ययितो राजा, त्रैलोक्यस्थितिवेदिषु ।
जैनाचार्येषु श्रद्धालुर्गुरुबुद्धिं बबन्ध सः ॥४॥

पप्रच्छ च ततो धर्मं, गुरुभ्यः श्रद्धया नृपः ।
मूलं धर्मस्य तेऽप्याख्यन्सम्यक्त्वं मोक्षसौख्यदम् ॥५॥

मृत्युसहाया विषया, नरकोपायास्तथा कषायाश्च ।
भवदासो गृहवासः, स्नेहः सुखगेहदायादः ॥६॥

आयुःसद्मनि बाल्ययौवनपरीणामत्रिभूमौ
क्रमादज्ञानान्मदनाद्रजश्च कुनयोन्मादव्यथावक्रयान् ।
गृह्णन् लोभवशान्न तं क्षणमहो ! मूढः करोति क्वचिद्यस्मिन्
लब्धपदस्थितिः कियदपि स्वीयो वृषः पोष्यते ॥७॥

उन्मीलन्ति यतः श्रियो न हि रुचिस्तस्मिन् सुधर्मे
क्वचित्प्रादुःष्यन्ति यतः सुखानि नियमात्तस्मिन्नदाने स्पृहा ।

क्लेशः स्याद्यत एव तत्र न गृहाबन्धे विरक्तिः परा,
यस्मान्मृत्युरुपैति कुप्यति जडस्तस्मै न दुष्कर्मणे ॥८॥

कापुरुषो विषयसुखाऽभिमतिमुखात्स्वीकरोति दुःखानि ।
करभाऽधिरोहणोऽपि क्लमताम्यद्गात्रभङ्गाऽऽर्त्तिः ॥९॥

क्व न विषयो विषयाणां वचसामिव सत्कवेः परं पश्य ।
जितमनसि तेऽपि कुण्ठा दवदहना विगतसमिधीव ॥१०॥

क्रूरग्रहो हि विषयो नक्षत्रं किं न पीडयत्येष ? ।
न भविष्यति गुरुदर्शनमिह यदि बाढं न शस्तः स्यात् ॥११॥

संसाराऽऽरम्भरतोऽप्यनधिगतज्ञानचरणभावोऽपि ।
सम्यक्त्ववशीभूतो वशयति सिद्ध्यङ्गनां जीवः ॥१२॥

श्रुत्वेति गुरुवाक्यानि, भक्त्याऽजातनयस्ततः ।
जग्राह च गृहस्थानां, द्वादशाऽपि व्रतान्यसौ ॥१३॥

पुनः प्रणम्य स गुरून्, पप्रच्छ ज्ञानभास्करान् ।
कीदृशो मे भवः पूर्वश्चक्रे तत्र मया च किम् ? ॥१४॥

पुरस्तादिव पश्यन्तो ज्ञानेन गुरुवस्ततः ।
पूर्वजन्मकथां तस्य, यथावृत्तामचीकथन् ॥१५॥

जयराजकथा

अस्ति पूः शैलिका नाम, यत्राऽस्ति धनदो जनः ।
सर्वोऽपि तेन जिग्ये सा, तयैकधनदाऽलका ॥१॥

तत्राऽभूद्भूपतिर्नाम्ना, लक्ष्मीबुद्धिः प्रतापवान् ।
यस्याऽऽज्ञादूतिका नित्यमुपनिन्ये रिपुश्रियः ॥२॥

जिनशासनकल्पद्रोः, स करोति प्रभावनाम् ।
तद्भावादर्जयत्येष, मोक्षप्रतिभवं शुभम् ॥३॥

सोऽन्यदा दिव्यपल्यङ्के, निद्रावशीकृताऽऽत्मकः ।
दूरतो रुदतीं तारं, नारीं काञ्चिदथाऽशृणोत् ॥४॥

तत्तारंरुदितश्रुत्या, समुत्तस्थौ महीपतिः ।
सम्यग् विज्ञातुमागाच्च, पुरतो मणिकुट्टिमे ॥५॥

विज्ञाय महतीं रात्रिं, स नक्षत्राऽनुसारतः ।
कैषा रोदिति दूरस्था ?, कथं वाऽपीत्यचिन्तयत् ॥६॥

तत्पृच्छामि स्वयं गत्वा, करुणाऽऽक्रन्दकारणम् ।
नेदृग्दीनविलापाः स्युर्महादुःखं विना क्वचित् ॥७॥

इत्यन्धकारपटकं, प्रावृत्य नृपतिस्ततः ।
चचाल सौधाद्यामिकदृशं दूरेण वञ्चयन् ॥८॥

शब्दाऽनुसारतो गत्वा, खड्गमित्रोऽब्रवीच्च ताम् ।
किं रोदिषि ? शुभे ! ब्रूहि, निश्येका किं बिभेषि न ? ॥९॥

मुहुश्च पृच्छति नृपे, रुदती नोत्तरं ददौ ।
किन्तु सा रोदिति भृशं, रोदयन्ती तरूनपि ॥१०॥

ततः सखीद्वयं तस्याः, समागादथ तन्मिथः ।
प्रोचे भगिनि ! पश्यैते, कृतघ्नाः कीदृशा नराः ? ॥११॥

न सुकृतान्न च स्नेहात्प्रणयान्न तु दैन्यतः ।
भवन्ति हि किलाऽऽत्मीयाः, पुमांसः कृतनाशिनः ॥१२॥

यद्भाव्यं तद्भवितैव, किन्त्वावाभ्यामिमां निशाम् ।
सखि ! निर्गमयितव्या, यथाऽनिष्टं करोति न ॥१३॥

प्रातश्चाऽस्याः पिता मात्रा, दैन्यादभ्यर्थितः स्वयम् ।
समेत्य प्रतिपाद्यैनां, गुर्विणीमपि नेष्यति ॥१४॥

इत्युक्त्वा ते उभे सख्यौ, तां कुत्राऽप्युपवेश्य च ।
तस्या मनोविनोदाय, प्रारेभाते मिथः कथाम् ॥१५॥

राजाऽपि तां कथां श्रोतुमुन्मनीभूय कौतुकात् ।
आरात्तासामुपविश्य, स्थितः शृण्वन्ननुक्तिमान् ॥१६॥

कुब्जिका प्राह सङ्केशपुरे राजाऽस्ति नामतः ।
जयराजोऽन्यदा स्वप्नेऽपश्यत्क्वाऽपि पुरे स्त्रियम् ॥१७॥

प्रत्यक्षामिव तां वीक्ष्य, समुत्तस्थौ जयो नृपः ।
स्वप्नदृष्टस्त्रियाऽऽश्लिष्टमाशिश्लेष रतिर्न तम् ॥१८॥

ततः कष्टादुद्गतेऽर्के, राजाऽऽह्वन्मन्त्रिमण्डलीम् ।
आख्याय स्वप्नमादिक्षद्वीक्षध्वं तदिमां क्वचित् ॥१९॥

ततश्च वेश्मवेश्माऽनुप्रवेशं सकले पुरे ।
वीक्ष्यमाणाऽपि नाऽदर्शि, चर्मचक्षुभिरात्मवत् ॥२०॥

तस्या अदर्शनाद्राजा, नाऽघसन्नाऽपिबच्छुचा ।
बुद्ध्या यथातथं वीक्ष्य, नृपं प्रोचुश्च मन्त्रिणः ॥२१॥

स्वप्नदृष्टस्त्रियं क्वाऽपि, तिष्ठन्तीं वेत्ति कः प्रभो !? ।
तद्वृत्तान्तपरिज्ञानोपायस्तु क्रियते ह्ययम् ॥२२॥

नगराद्बहिरुद्यानेष्वनिवारितभोजनात् ।
नानाभोज्यानि सत्राणि, कार्यन्ते सर्वतस्ततः ॥२३॥

यत्पुराऽवस्थिता सा स्त्री, दृष्टा स्वप्ने तदत्र हि ।
सत्रे तन्नगरं सा स्त्री, लेख्यते चित्रकः स्फुटम् ॥२४॥

नानादेशाऽऽगताः पान्था, वीक्ष्येदं चित्रमत्र ते ।
चेत्पुनः सपुरामेनां, केऽपि जानन्ति दैवतः ॥२५॥

राजाऽप्येतन्निशम्याऽथ, युक्तमित्यभिमन्य च ।
परितो नगरं सत्राण्यतिरम्याण्यचीकरत् ॥२६॥

ततश्च सर्वतः पान्थाः, श्रुत्वा तत्सत्रमाययुः ।
कृतस्नानाश्च भुक्त्वा ते, तच्चित्रं वीक्ष्य यान्ति च ॥२७॥

अन्यदा पथिकः कोऽपि, विशन् सत्रं ददर्श तत् ।
चित्रं स तदभिज्ञाय, मुञ्चन्नश्रूणि तस्थिवान् ॥२८॥

सत्राऽमात्यस्तथा दृष्ट्वा, तं पप्रच्छं कथं नु भोः ! ।
पान्थ ! रोदिषि ? स प्रोचे, चित्रं मे नगरे ह्यदः ॥२९॥

देशाद्देशं परिभ्राम्यंश्चिराच्चित्रगतं पुरम् ।
तदवस्थं विलोक्याऽहं, मुदितो ममतावशात् ॥३०॥

सत्राऽध्यक्षस्ततो राज्ञे, तं गत्वाऽऽशु न्यवेदयत् ।
राजाऽपि हि चिरादुत्को, वेगात्सत्रमुपागमत् ॥३१॥

स्वयं पप्रच्छ तं पान्थं, किमिदं दृष्टवानसि ? ।
क्वाऽऽस्तेऽध्वनि कियत्यास्ते, चित्राऽनुसारि तत् पुरम् ? ॥३२॥

पान्थः प्राह महाराज !, पुरेऽवात्सं पुराऽत्र हि ।
दारिद्र्योपद्रुतः किन्तु, देशाद्देशं व्रजाम्यहम् ॥३३॥

प्रासादाऽट्टगृहश्रेणिवापीकूपसरोवरैः ।
यथा निवेशनैर्ज्ञातं, पुरमेतद्रमालयम् ॥३४॥

दक्षिणस्यां दिशि ख्यातं, रमालयपुरं ह्रदः ।
इतः पुरादिदं भावि, योजनानां शताऽष्टके ॥३५॥

सभायामुपविष्टोऽयं, चन्द्रचूडो नृपोत्तमः ।
इदमन्तःपुरं ह्यस्य, तस्यैते सचिवाऽऽदयः ॥३६॥

नानाक्रीडाभिरानन्दात्, क्रीडन्तीयं नृपाऽङ्गजा ।
अनङ्गसुन्दरी नामाऽन्तरे यौवनबाल्ययोः ॥३७॥

पुरुषद्वेषिणी त्वेषा, पितृभ्यामर्थिताऽपि हि ।
नेहते यौवनाऽऽरम्भोत्फुल्लश्रीकान् नृपानपि ॥३८॥

इति सर्वं मया यादृग्, दृष्टं स्वपुरचेष्टितम् ।
तत्तादृशमिदं सर्वं, चित्रेऽस्ति नृपसत्तम ! ॥३९॥

स्वप्नदृष्टाऽङ्गनाऽस्तित्वहर्षादुत्फुल्ललोचनः ।
सा पुंद्वेषेति श्रुत्वा तु, राजाऽभूच्चिन्तयाऽऽवृतः ॥४०॥

ततः पान्थाय पाथेयं, काञ्चनं भूर्यदापयत् ।
मनसिकृत्य वृत्तान्तं, ततो राजाऽगमद्गृहम् ॥४१॥

ततश्च सकलं राज्यं, समर्प्य मुख्यमन्त्रिणे ।
सार्धमेकेन मित्रेणाऽचालीद्रमालयं प्रति ॥४२॥

वसन्तसमयेऽन्येद्युरासाद्योद्यानमध्वनि ।
आतपाऽऽक्लान्तसर्वाऽङ्गो, वृक्षमेकमशिश्रियत् ॥४३॥

विद्यमानेव प्राग् तत्र,निद्रा श्रममपानयत् ।
स्वपत्रव्यजनैश्चक्रुः, कदल्यः सुखमारुतम् ॥४४॥

भृङ्गीरुतललद्गीतिं, केतक्यो विदधुर्मुदा ।
ननृतुर्जलयन्त्रोद्यद्ध्वनिमाद्यच्छिखण्डिनः ॥४५॥

ततश्च स्वस्वनै राज्ञो निद्रां पिक्यो विचिच्छिदुः ।
मरुत्केलिपतत्पक्वफलान्याढौकयन् द्रुमाः ॥४६॥

आसन्नवेणीमूर्द्धस्थं, वाप्योऽम्भः समचारयन् ।
स्वागतं पुण्यपूर्णानां, कुर्वन्त्यचेतना अपि ॥४७॥

फलान्यास्वाद्य पीत्वाऽम्भः, ससखो वनमीक्षितुम् ।
भ्राम्यन् ददर्श नाभेयचैत्यमेकं नृपोऽद्भुतम् ॥४८॥

अहो ! भवाऽब्धौ द्वीपोऽयं, दुरापोऽवापि तन्मया ।
यद्दृष्टं भ्रमताऽद्येदं, दिष्ट्याऽऽदिजिनमन्दिरम् ॥४९॥

इत्यूचानो मुदाऽश्रूणि, मुञ्चन्नन्तरथाऽविशत् ।
दूरान्नत्वा समासेन, स्तुत्वा प्रभुमवन्दत ॥५०॥

स्वाभाविकललद्रूपं, शृङ्गारितमथाऽर्चया ।
यौवनाऽवतारमिव, प्रभुं वीक्ष्य नृपोऽवदत् ॥५१॥

जित्वाऽन्तरायकर्म, प्राप्तशिवश्रीकरग्रहणललित ! ।
पूरय मनोरथान्मे, स्वामिन् ! यत् सर्वदस्त्वमसि ॥५२॥

इति स्तुत्वा पुरश्चैत्यवृक्षस्याऽधः समेत्य सः ।
छायासु क्वाऽपि सुष्वाप, समित्रोऽपि महीपतिः ॥५३॥

ततो विद्याधराः केऽपि, दिवाऽप्यास्येन्दुसुन्दराः ।
मिथः स्निग्धोक्तिपीयूषजलकेलिप्लुताऽऽत्मकाः ॥५४॥

विमानमध्यादुत्तीर्य, बहिर्देवगृहात् स्थिताः ।
व्यलोकन्त नृपं सुप्तं, रूपेण जितमन्मथम् ॥५५॥ [युग्मम्]

ततो दध्युर्मनस्येवं, पश्येयुर्यदि नः स्त्रियः ।
ततोऽस्मासु विरज्यैता, रमेरन्नमुमेव हि ॥५६॥

तत्कुर्मोऽमुं स्त्रियं मन्त्रगर्भोद्यत्सूत्रबन्धतः ।
न स्त्रियः स्त्रियमिच्छन्ति, रन्तुं रूपवतीमपि ॥५७॥

इत्यालोच्य मिथो विद्याधरा बबन्धुरादरात् ।
पादेऽस्य भूभुजः सूत्रं, नारीरूपं गतश्च सः ॥५८॥

विद्याधरास्ततो देवमानर्चुर्नेमुरादिमम् ।
सङ्गीतमपि कृत्वा च, यथाऽऽजग्मुस्तथा ययुः ॥५९॥

राज्ञा च जयराजेन, बध्नन्तः सूत्रमादरात् ।
बहुलीभूतनिद्रेण, ज्ञाता विद्याधरा न हि ॥६०॥

ततो विद्याधरीवृन्दममन्दं रूपसम्पदा ।
स्पर्द्धाऽनुबन्धिनेपथ्यशृङ्गारितवपुर्लतम् ॥६१॥

रते रूपसहस्रं वा, बह्वीभूता रमाऽथवा ।
किं वा शचीसमूहोऽयमिति तर्कमिदं दधत् ॥६२॥

आगाच्चैत्यपुरोवृक्षमुत्ततार विमानतः ।
अपश्यच्च नृपं नारीरूपधरं ततो मिथः ॥६३॥ [त्रिभिर्विशेषकम्]

विलोक्योचुरहो ! रूपमस्या लावण्यमप्यहो ! ।
त्रैलोक्यवनितासर्गरामणीयकवर्णिकाम् ॥६४॥

मा स्म पश्यदिमां कोऽपि, विद्याधरयुवा त्विह ।
इत्येनां पुरुषीकुर्मोऽन्यथाऽस्मान्न्यक्करिष्यति ॥६५॥

ततो विद्याधरस्त्रीभिर्बद्धेऽङ्घ्रौ सूत्रकण्डके ।
भूयोऽपि नृपतिर्जज्ञे, स्वाभाविकस्वरूपभृत् ॥६६॥

अथ चैत्ये प्रविश्यैताः, समभ्यर्च्याऽम्बुजैर्जिनम् ।
स्तुत्वा भावेन वन्दित्वा, ययुः स्थानं निजं निजम् ॥६७॥

निद्रोच्छेदे समुत्तस्थौ, नृपस्ततश्च पादयोः ।
सूत्रकण्डकमालोक्य, किमेतदित्यचिन्तयत् ॥६८॥

अकस्माच्चरणाद्राजा, छोटयत् कण्डकं ततः ।
स्त्रीरूपधरमात्मानं, पश्यत्येष क्षणादपि ॥६९॥

ततो दध्यौ च स्त्रीध्यानात्, स्त्रीभूतोऽस्मि कथं न्वहम् ? ।
किमिहैवाऽथवा माया, प्राप्यं स्त्रीत्वमवाप्नुवम् ? ॥७०॥

ततो द्वितीयचरणात्कण्डकं तूदसूत्रयत् ।
पुनः स्वरूपमापन्नो, राजा विस्मयमादधौ ॥७१॥

किमिदं चित्रमत्राऽभूत्स्त्रीपुंसाऽद्भुतरूपदम् ।
नूनं कस्याऽपि दिव्यस्य, क्रीडाविजृम्भितं ह्यदः ॥७२॥

अथ प्रत्ययमुद्द्रष्टुं, मित्रस्याऽङ्घ्रौ बबन्ध सः ।
एकं सूत्रं ततो मित्रं, बभूव स्त्री घनस्तनी ॥७३॥

पुनश्चुच्छोट तत्सूत्रं, प्रसुप्तमित्रपादतः ।
पूर्वरूपधरः सोऽभूदासीत्प्रत्ययितो नृपः ॥७४॥

एकेन पुरुषी स्यात् स्त्री, स्त्री स्यादन्येन पूरुषः ।
इति कण्डकमाहात्म्यं, निश्चिकाय महीपतिः ॥७५॥

उत्थाप्य मित्रमात्मीयं, प्रतस्थेऽध्वन्यपश्रमः ।
अखण्डगमनात्प्राप, शीघ्रं राजा रमालयम् ॥७६॥

तत्राऽपि बहिरुद्याने, मनोभूवेश्मनि क्षणात् ।
नमस्कृत्य स्मरं लम्बीचक्रे स्तुतिं स्वसिद्धये ॥७७॥

अनङ्गेनाऽपि भवता, ह्यङ्गीकृतमिदं महत् ।
कार्या स्वाऽऽज्ञाभृतः सर्वेऽपीशाऽऽद्यास्त्रिदशा मया ॥७८॥

त्वदाज्ञापाशबद्धोऽहमागतोऽस्म्यत्र मन्मथ ! ।
तत्प्रसीद दृशं देहि, प्रसन्नां मयि सीदति ॥७९॥

इत्युक्त्वा यावदेकत्र, विशश्राम स भूपतिः ।
तावदादेशदानेनोद्धतां स्त्रीमशृणोदिति ॥८०॥

वाचं संवृणु हे पिक !, द्रुतमिह त्वं हंस ! खञ्जीभव,
व्याकोशं विजहीहि पङ्कज ! भज त्वं भद्र ! निद्रां मृग ! ।
वैवर्ण्यं व्रज राजचम्पक ! यतः साऽभ्येति नः प्रेयसी,
यद्वक्त्रेण कलङ्कितः प्रतिकृतिस्पर्द्धां दधानः शशी ॥८१॥

इति कर्णाऽमृतं सूक्तमाकर्ण्याऽऽनन्दिते नृपे ।
वेत्रधारी ततोऽभ्येत्य, प्रोचे सर्पत भो ! इतः ॥८२॥

यतोऽभ्येति सुता राज्ञो, नृदर्शनपराङ्मुखी ।
उद्यानं द्रष्टुमायाता, क्रीडिष्यति सखीयुता ॥८३॥

ततोऽन्यत्र गतोऽह्नाय, भूपो दध्याविय किल ।
भवेत् सा स्वप्नदृष्टेव, मन्मनः स्निग्धमत्र यत् ॥८४॥

सैवेयं वा नवेत्येवं, ज्ञास्यामि कुत ईदृशम् ? ।
यद्वा द्राक्षालताकुञ्जे, निलीयेमां विलोकये ॥८५॥

ततो राजा समित्रोऽपि, प्रारुह्य द्राक्षमण्डपम् ।
आगच्छन्तीं विलोक्यैनां, सैवेयमित्यमन्यत ॥८६॥

मनःस्थेन वनस्थेन, द्विधेनैष मनोभुवा ।
आसन्नोद्यानसुप्रापैः, पुष्पेषुभिरताड्यत ॥८७॥

ततः सा वनमालोक्य, ययावक्षुभिताऽऽशया ।
असंस्तुतमपि स्वान्तमादायैव महीपतेः ॥८८॥

चैतन्यमात्रमालम्ब्योत्ततार मण्डपान्नृपः ।
घ्नतस्तस्यैव कामस्य, प्रासादे निस्सहोऽपतत् ॥८९॥

दृष्ट्वा चन्द्रमसं श्रुत्वा, पिकीं स्पृष्टोऽथ वायुना ।
ततश्चोवाच सोद्वेगाऽपस्मारः स स्मरं प्रति ॥९०॥

चन्द्रः किं नु करोल्मुकैर्दहति मामुच्चाटयत्युच्चकै,
रावा किं नु पिकी चिकीः किमनलीभूयाऽनिलो वाति यत् ।

चूताश्चाऽङ्कुरतर्जनीभिरभितः किं तर्जयन्त्यत्र को,
नाऽऽज्ञां ते कुरुते मनस्यसि वसन् दूरेऽस्ति कस्ते स्मर !? ॥९१॥

इति राजा स्मराऽवस्थानिस्सहाऽङ्गः कथञ्चन ।
दीर्घां तमस्विनीं वेल्लत्तनुयष्टिर्निनाय सः ॥९२॥

उदियाय ततो भानुराताम्रस्तमसि क्रुधा ।
गृह्णन् वह्नेर्निजं तेजो, न्यासं वर्त्तयितुं जनम् ॥९३॥

स परिव्राजिकामेकामधिकृतां स्मराऽर्चने ।
पप्रच्छ राजदुहितुर्वृत्तान्तं निश्चयाय ताम् ॥९४॥

सा परिव्राजिका प्राह, चन्द्रचूडस्य भूपतेः ।
अनङ्गसुन्दरी नाम, पुरुषद्वेषिणी सुता ॥९५॥

वयस्यः प्राह तां कश्चित्तया परिचयोऽस्ति ते ? ।
साऽऽह बाढं यतो नित्यं, देवाऽर्चां कारयाम्यहम् ॥९६॥

राजाऽऽह कथमेतस्याः, पुंसि द्वेषोऽथ साऽब्रवीत् ।
पुराऽपि पृष्टं बहुभिः, सा नाऽऽख्यद्द्वेषकारणम् ॥९७॥

इत्याख्याय मठीं प्राप्ता, सा परिव्राजिका क्षणात् ।
राजाऽप्युपायलाभाय, बुद्धिमाराधयन्निजाम् ॥९८॥

प्रापोपायं नृपोऽह्नाय, कण्डकात् स्त्री करोम्यमुम् ।
ततश्चाऽस्यास्तपस्विन्याः, स्यादेष परिचारिका ॥९९॥

ततस्तामनुगच्छन्त्याः, स्त्रीत्वात्परिचयस्तया ।
अस्याऽपि स्यात्ततश्चित्तं, तस्या विज्ञायते खलु ॥१००॥

मित्रं प्रत्याह राजाऽथ, स्त्रीत्वकार्यथ कण्डकम् ।
त्वं तत्प्रभावतो नारीभूय याहि तपस्विनीम् ॥१०१॥

तां परिव्राजिकां स्निग्धविनयेनाऽनुरञ्जय ।
यथा राजसुतासौधे, विश्वासात्त्वां नयत्यसौ ॥१०२॥

इत्यालोच्य वयस्यस्य, बबन्ध कण्डकं पदे ।
भूत्वा च स्त्री तदैवा गात्, स परिव्राजिकामठे ॥१०३॥

तयाऽऽतिथ्यं ततश्चक्रे, स्वागतप्रश्नपूर्वकम् ।
तिष्ठ त्वमत्र निश्चिन्ता, भव शुश्रूषिका मम ॥१०४॥

एकाकिन्या ममैषाऽभूत्, सहायेति मुदं गता ।
सा परिव्राजिका तस्यै, मुहुश्चक्रेऽनुवर्त्तनाम् ॥१०५॥

सुरूपत्वाल्ललितेति, नाम्नाऽऽह्वत्तां तपस्विनी ।
एषाऽपि ललितानाम, स्वस्य ज्ञात्वोत्तरं ददौ ॥१०६॥

चक्रे च ललिता तस्यै, विनयं वपुषा गिरा ।
सा परिव्राजिकाऽत्यन्तं, तां प्रति प्रीतिभागभूत् ॥१०७॥

देवतापूजने कृत्येष्वन्येष्वपि तपस्विनी ।
चक्रे ललितया प्रीता, विनयः कं न रञ्जयेत् ? ॥१०८॥

विनयाऽऽवर्जिता साऽथ, निन्ये राजसुताऽन्तिकम् ।
ललिता देवतापूजादर्शनव्याजमीयुषीम् ॥१०९॥

दृष्ट्वा राजसुतां दूराल्ललिताऽचिन्तयत् किल ।
निर्मायैनां विधेर्न स्त्रीनिर्माणं भाव्यतः परम् ॥११०॥

स्थाने मित्रस्य संरम्भः, स्थानेऽस्या अनुपुंद्विषा ।
एतावेव मिथस्तुल्यौ, नाऽन्यो लावण्यसम्पदा ॥१११॥

ततस्तदन्तिकं गत्वा, सा परिव्राजिका स्वयम् ।
अनङ्गसुन्दरीमिष्टदेवपूजामकारयत् ॥११२॥

पप्रच्छ राजपुत्री तां, भगवति ! कुतोऽनुगा ? ।
समागादियमूचे सा, देशान्मे परिचारिका ॥११३॥

राजपुत्र्या विसृष्टा च, निजं धाम जगाम सा ।
नित्यं ललितया सार्धं, याति राजसुताऽन्तिकम् ॥११४॥

व्याजात्कुतोऽपि ललिता, निस्सृत्याऽथ मठाद्बहिः ।
सङ्केतस्थाननिष्ठाय, राज्ञे सर्वं न्यवेदयत् ॥११५॥

अथैकदा परिव्राजिकाया अपाटवादसौ ।
ललिताऽपि तयाऽऽदिष्टा, राजपुत्रीगृहं ययौ ॥११६॥

देवपूजां विधाप्यैनां, प्रस्तावं प्राप्य सा मृदु ।
वार्तारसवशं नीत्वा, स्वस्मिन्नस्नेहयच्च ताम् ॥११७॥

राजपुत्री ततस्तस्या, वाचि मृद्व्यामलीयत ।
दक्षः श्रोता सुस्निग्धेन, वक्त्राऽतिरज्यते खलु ॥११८॥

एकात्मीभावमानीय, राजपुत्रीं सहाऽऽत्मना ।
अपृच्छदन्यदैकान्ते, पुरुषद्वेषकारणम् ॥११९॥

अनाख्यान्तीं ततो राजपुत्रीं सा ललिताऽब्रवीत् ।
सखि ! तन्नाऽस्ति यत्सख्यै स्निग्धायै न निवेद्यते ॥१२०॥

त्वं तु नाऽऽख्यासि तत्सख्यं, स्वाऽभिप्रायाऽनिवेदनात् ।
कलङ्क्यसि यत्र स्यात्स्नेहो दुःखाऽनिवेदकः ॥१२१॥

इति प्रणयकोपोक्त्या, पृष्टा ललितया भृशम् ।
अनङ्गसुन्दरी स्नेहादचीकथत् कथामिति ॥१२२॥

एकदा सखि ! विन्ध्याऽद्रौ, गताऽस्मि क्रीडितुं मुदा ।
तत्राऽपश्यं सरः पद्मखण्डमण्डितमद्भुतम् ॥१२३॥

तस्य दर्शनमात्रेणोन्मनीभूयाऽपतं भुवि ।
गतजीवेव नो जाने, काऽहं ? क्वाऽस्मीत्यचेतना ॥१२४॥

अकस्मान्मूर्च्छयाऽऽश्लिष्टां, मां समीक्ष्य सखीजनः ।
किमेतदिति सम्भ्रान्तः, सिञ्चन्नीरैरवीजयत् ॥१२५॥

पयः पयो वायुर्वायुरित्युत्सुकपतत्क्रमैः ।
रुदद्भिरुच्चकैः कष्टादाश्वासिता सखीजनैः ॥१२६॥

उत्पेदेऽथ मम क्षिप्रं, जातिस्मरणमुज्ज्वलम् ।
तद्वशादहमस्मार्षं, पूर्वजन्मस्थितिं निजाम् ॥१२७॥

पुरा जन्मन्यहमासं, हंसी सरोवरेऽत्र यत् ।
ममाऽभूद्दयितो हंसः, प्रेमसर्वस्वमन्दिरम् ॥१२८॥

आधिव्याधिव्यथात्यक्तौ, कुर्वन्तौ केलिमञ्जसा ।
प्रणयरोषतोषाभ्यामावां स्वो ललितावह ॥१२९॥

अथ संसारसौख्यानि, भुञ्जानाया ममाऽभवत् ।
गर्भः शरीरचेष्टाभिर्ज्ञातपुत्रस्वरूपकः ॥१३०॥

ततोऽहं मुदिता गर्भरक्षामादधती स्फुटम् ।
सरस्तीरवृक्षनीडे, प्रसूताऽस्मि सुतत्रयम् ॥१३१॥

स्वर्गसौख्यादपि परं, सौख्यं प्रापमहं ततः ।
जाताऽस्मि चोद्धता चित्ते, दुर्द्धर्षा स्त्री सुतात्किल ॥१३२॥

मत्कान्तश्चेष्टयाऽऽख्यातपुत्रोत्पत्तिमुदाऽश्रुभाक् ।
आनीयाऽऽनीय भक्ष्याणि, ददौ मह्यं मुहुर्मुहुः ॥१३३॥

शीतवाताऽऽतपत्राणाऽम्भोजपत्रैः स भूरिभिः ।
परितो नीडमावव्रे, स्वाऽपत्यप्रीतिरीदृशी ॥१३४॥

ततोऽस्माकमपुण्येन, पर्वतेऽस्मिन् दवोऽलगत् ।
ज्वालाभिर्विहितः प्रोच्चैः, प्राकारः परितो नगम् ॥१३५॥

सोऽथ वृक्षलतापक्षिश्वापदानथ तापसान् ।
धावतो नंष्टुमप्लोषीन्निघ्नन् ज्वालाचपेटया ॥१३६॥

सर्वं हि भस्मसात्कुर्वन्नुद्यन्वृक्षदिधक्षया ।
सरांसि शोषयंस्तापाद्दावोऽगान्नः सरस्यथ ॥१३७॥

वयांस्यन्यान्यथोड्डीय, कृताऽऽक्रन्दानि कानिचित् ।
आसन्नाऽग्निज्वलत्पाथस्तडागेऽह्राय बुब्बुडुः ॥१३८॥

कानिचिन्नभसा गन्तुं, प्रवृत्तानि दवाऽग्निना ।
अभ्रंलिहशिखाऽऽश्लेषात्पातितानि भुवस्तले ॥१३९॥

कानिचिद्विविशुः पङ्के, कोटरेष्वथ कानिचित् ।
तीरात्तीरं परिभ्रेमुः, कानिचिज्जीविताऽऽशया ॥१४०॥

बभूव नश्यतां व्योम्नि, तापान्निपततां भुवि ।
वह्निना दह्यमानानां, ताराऽऽक्रन्दितमुच्चकैः ॥१४१॥

तच्छ्रुत्वाऽथ मया प्रोचे, हंस ! प्राणेश ! रक्ष माम् ।
सपुत्रां गन्तुमन्यत्र, क्लीबां प्रसवकष्टतः ॥१४२॥ [पञ्चभिः कुलकम्]

हंसोऽपि परितो वीक्ष्य, त्रटत्रटदिति स्वनैः ।
प्रज्वल्य पततो मूलाल्लतावृक्षान् दवाऽग्निना ॥१४३॥

सानूनि च गिरेश्चूर्णीभूतानि मरुता क्षणात् ।
कोष्णान्येव विधूतानि, कुकूलानीव सर्वतः ॥१४४॥

दवदाहभयाद्गन्तुं, धावतः परितो मृगान् ।
पततश्च पुनर्दावे, वह्नौ निह्नुतभूतले ॥१४५॥

हस्त्यादिश्वापदैः पिण्डीभूतैरुपर्युपर्यथ ।
विलूननलिनीनालं, प्रच्छादितं निजं सरः ॥१४६॥

जातमृत्युभयः कम्पमानाऽऽत्मा शुष्यदाननः ।
गताऽपत्यप्रियास्नेहोऽस्थादुदासीन एव सः ॥१४७॥

वैरीव हि दहन्नाऽऽगाद्दावस्तत्र सरोऽन्तिके ।
प्रिय ! त्रायस्व त्रायस्व, ममाऽपत्यानि वह्नितः ॥१४८॥

इति मयि वदन्त्यां द्राक्, प्रेरितेवाऽग्निमण्डली ।
नीडं प्रति लुलोठाऽऽराद्दहन्ती परितोऽखिलम् ॥१४९॥

ततस्तानि ममाऽपत्यान्युच्चैश्चक्रन्दुराकुलम् ।
वह्निना दह्यमानं च, वीक्ष्याऽहं नीडमात्मनः ॥१५०॥

तत्कालप्रसवेनाऽऽर्त्ताऽप्यानीयाऽऽनीय तल्लतः ।
पयश्चञ्चुपुटेनाऽहमसिञ्चं नीडमात्मना ॥१५१॥

भूयो भूयोऽपि सिञ्चन्त्या, नीडं पुत्रांश्च मे ततः ।
गत्यागतिक्लमोऽत्यर्थं, बाधामाधाच्छरीरके ॥१५२॥

इतस्ततश्च पर्यस्तजीवाऽऽच्छादितमादितः ।
बभूव सरसोऽप्यम्भोऽप्यशक्यग्रहणं मया ॥१५३॥

पुनर्हंसो मया प्रोक्तः, प्राणेश ! किमुपेक्षसे ? ।
पश्यतस्ते म्रियन्ते हा !, मत्पुत्रा दावदाहतः ॥१५४॥

इत्युक्तः सोऽप्यनुक्त्वैव, क्वाऽप्यगान्नभसा द्रुतम् ।
तत्प्रेम तच्च वात्सल्यं, तस्य मृत्युभयाद्गतम् ॥१५५॥

स्वस्य प्राणान् गृहीत्वाऽस्य, गच्छतो जीवितं कियत् ? ।
कृतघ्नः स्त्रीषु पुत्रेषु पितृषु म्रियते रटन् ॥१५६॥

धिग् धिग् तं निस्त्रपं हीनं, निर्ममत्वं सुनिर्दयम् ।
यस्तादृग्व्यसने दीनां, मामत्याक्षीत्सपुत्रिकाम् ॥१५७॥

अन्योऽपि व्यसनाद्वीरैरुद्धियेतोपकारिभिः ।
किं पुनः पुत्रभाण्डानि, लभ्यानि भूरिभाग्यतः ॥१५८॥

यतः— न स स्यात् पितृषु स्नेहो, न देवे नाऽपि सद्गुरौ ।
न मित्रे नाऽपि वित्ते च, यादृक् पुत्रेष्वकृत्रिमः ॥१५९॥

स दुरात्मा मम प्रेम्णा, मा गृह्यतां हतः शठः ।
दह्यमानान् सुतान् पश्यन्, गृहीतः कृपयाऽपि न ॥१६०॥

ततो हताऽऽशा भूयोऽपि, तद्वर्त्म प्रेक्ष्य बह्वथ ।
प्रवृत्ता पुनरानेतुं, कष्टादपि सरःपयः ॥१६१॥

सहन्ती तत्र केषाञ्चित्, शृङ्गताडनमुत्कटम् ।
केषाञ्चित् पक्षघातं च, केषाञ्चिच्चञ्चुचर्व्वणम् ॥१६२॥

कैश्चित्प्रक्षिप्यमाणाऽपि, पात्यमानाऽपि कैश्चन ।
मर्द्यमानाऽपि चाऽन्यैश्चाऽन्योऽन्यसम्मर्दनाऽर्दनात् ॥१६३॥

उपर्युपरि चाऽऽसीनैर्मज्जद्भिः प्रतितीर्षुभिः ।
स्वजीवरक्षाकृतये, प्रेरयद्भिर्मिथोर्मिभिः ॥१६४॥

सरः प्रच्छादितं मूलान्न द्रष्टुमपि चोत्सहे ।
किं पुनर्लातुमम्भस्तद्दुरापं बोधिबीजवत् ॥१६५॥

भ्रमं भ्रमं सरोऽपश्यं, ग्रहीतुं सलिलं क्वचित् ।
प्रापं चाऽन्तरमेकत्र, चञ्च्वाऽगृह्णं पयस्ततः ॥१६६॥

यावदायामि नीडे स्वे, तावत्पश्याम्युदर्चिषा ।
दह्यमानान् सुतान् बालान्, वेल्लतः क्रन्दतः क्लमात् ॥१६७॥

हा ! हताऽस्मीति करुणं, क्रन्दन्ती पुत्रवत्सला ।
तेषामुपरि क्षिप्त्वा च, नीरं द्राक्तानुदक्षिपम् ॥१६८॥

एकचञ्चुरहं नेतुमशक्ता ह्येकहेलया ।
ततो हताऽहमुत्पाद्य, पुत्रमेकं गताऽन्यतः ॥१६९॥

तत्राऽपि व्यानशे भूमिर्जङ्गालेन दवाऽग्निना ।
अक्षमा तत्र मोक्तुं तं, पुनरागां निजाऽऽलयम् ॥१७०॥

तत्राऽपश्यं सुतौ स्वीयौ, दग्धौ हतदवाऽग्निना ।
ततो दुःखश्लथाऽङ्ग्या मे, सुतश्चञ्चूधृतोऽपतत् ॥१७१॥

अन्यौ तावन्मृतौ पुत्रौ, जीवत्येकोऽयमर्भकः ।
एनं रक्षामि चेत्क्वाऽपि, माता माता तदाऽस्म्यहम् ॥१७२॥

इति विचिन्त्य निर्भीका, वात्सल्याद्दववह्नितः ।
वेगान्न्यग्भूय किञ्चिच्च, दग्धं ह्युदक्षिपं सुतम् ॥१७३॥

ततश्चोर्ध्वशिखो वह्निः, किल मोचयितुं सुतम् ।
स्फुरज्ज्वालावरत्राभिः, परितः पाशमक्षिपत् ॥१७४॥

ज्वालाभिस्ताभिरङ्गं मे, ज्वलत्कृतमितस्ततः ।
ततो भुवङ्गता क्लीबाक्षतपक्षपदा तदा ॥१७५॥

ततः सरसि तत्रैव, मध्ये त्वस्ति बकस्थलम् ।
निचितं सर्वतो नानापक्षिभिर्जीविताऽऽकुलैः ॥१७६॥

तत्र विद्याधरैरात्मवंशाऽऽदिपुरुषस्य तु ।
श्रीमदादिजिनेन्द्रस्य, प्रासादोऽस्ति कृतो महान् ॥१७७॥

मध्ये रत्नमयी मूर्त्तिर्नाभेयस्य न्यधीयत ।
आनर्चुस्तां तु गान्धर्वविद्याभृत्किन्नरेश्वराः ॥१७८॥

चञ्चूधृतसुता चाऽहं, भ्राम्यन्ती परितो नभः ।
क्रमात्क्षीणगतिस्तत्राऽऽगत्याऽपतं पुरः प्रभोः ॥१७९॥

निर्घातेन ततः पुत्रः, क्षणेन प्राप पञ्चताम् ।
अपायानां शतानि स्युर्मृत्युकारीणि सापदाम् ॥१८०॥

निर्घातेन तु तेनाऽहं, जाताऽस्मि चलिताऽऽत्मका ।
पुण्यान्मे दृष्टिरालीना, मूर्त्तावेव जिनेशितुः ॥१८१॥

पश्यन्त्या मे प्रभोर्मूर्त्तिं, वह्निदाहव्यथाप्रथा ।
निर्घाताऽऽर्त्तिश्च किञ्चित्तूपशशाम क्षणादपि ॥१८२॥

यतः— दर्शनात्तीर्थनाथानां, प्रनष्टदुष्टकर्मणाम् ।
प्राप्य मोक्षं मृतिर्न स्याद्वराकी किं पुना रुजा ? ॥१८३॥

यथा दृष्टिस्तथा चित्तं, लीनं मे प्रभुपादयोः ।
ततो नाऽज्ञासिषं पीडां, विव्यथे न सुतव्ययः ॥१८४॥

जातौ तिरश्चामुत्पन्नाऽप्यकस्मादहमात्मना ।
प्रभुप्रासादमासाद्य, विवेकोन्मेषमासदम् ॥१८५॥

दुरापेन विवेकेन, मानुषीवाहमुत्तमा ।
अदां समस्तजीवानां, मिथ्यादुष्कृतमञ्जसा ॥१८६॥

देवसाक्षिकमालोच्य, तैरश्च्यजन्मदुष्कृतम् ।
स्वामिदर्शनलाभेन, समुपार्जयमुत्तमम् ॥१८७॥

उच्चैर्गोत्रं पवित्रं च, मानुषं जन्म दुर्लभम् ।
आरूढैः प्राप्यते यत्र, मोक्षवृक्षफलं सुखम् ॥१८८॥

पुर एव स्थिता स्वामिमूर्त्तेर्द्रागायुषः क्षयात् ।
मृत्वा सुखेन राज्ञोऽस्य, पुत्री जाताऽस्म्यहं सखि ! ॥१८९॥

इति वन्ध्यगिरौ दृष्ट्वा, पूर्वाऽनुभूतमेव हि ।
तत्सरस्तज्जिनौकश्चाऽस्मार्षं पूर्वभवस्थितिम् ॥१९०॥

ततस्तत्तादृशि प्रेम्णि, हंसोऽत्याक्षीत् क्षणेन यत् ।
तन्मे सखि ! नरद्वेषश्चेतसाऽङ्गीकृतोऽधिकम् ॥१९१॥

पुमांसः पश्य पुंस्त्वं नोत्तमा अप्यधमा इव ।
कुलीनां शीलपां नारीमस्वतन्त्रां त्यजन्ति ये ॥१९२॥

श्रुत्वैतल्ललिता तस्याः, पूर्वजन्मविरागतः ।
पुरुषद्वेषजन्यं हि, कुमारीत्वमथाऽवदत् ॥१९३॥

अनङ्गसुन्दरि ! त्वां हि, किञ्चिद्वच्मि शृणोषि चेत् ? ।
सखि ! स्थातव्यमित्थं हि, कियत्कालं पतिं विना ? ॥१९४॥

तस्य यद्यपि हंसस्य, मृत्युभीतिमुपेयुषः ।
त्वय्यभूदपराधो यः, स्मर्यते जन्मकोटिषु ॥१९५॥

तथाऽपि ते नरद्वेषः, कर्तुं स्यादुचितो नहि ।
विवेको मृत्युभीभाजां, किं नु स्यात् किल देहिनाम् ? ॥१९६॥

मृत्युभीतस्त्यजत्येव, पितृमातृप्रियासुतान् ।
वज्रभीत्या त्यजन् सर्वं, मैनाकोऽब्धौ पपात यत् ॥१९७॥

सख्यं ते मयि यद्यस्ति, मन्यसे चेद्वचो मम ।
उपयच्छस्व तत्किञ्चित्कुलीनं नरपुङ्गवम् ॥१९८॥

अनङ्गसुन्दरी प्राह, किमन्यद्धनमुच्यते ? ।
न पाणिग्रहणं मे स्यादत्र जन्मनि केनचित् ॥१९९॥

तैरश्च्येऽपि हि दृष्टाभ्यां, ददे याभ्यामयं भवः ।
तावेव मोक्षदौ पादौ, नाभेयस्य गतिर्मम ॥२००॥

सकोपं ललिता प्राह, जडे ! कदाग्रहाऽसि किम् ? ।
न वेत्सि पितरौ द्विष्टवरां त्वां वीक्ष्य दुःखिनौ ॥२०१॥

त्यक्त्वा कदाग्रहं तत्त्वं, भणतः पितरौ हि यत् ।
ममाऽनुरोधतश्चाऽपि, प्रीतिर्यत्र वृणीष्व तम् ॥२०२॥

राजपुत्र्याह मे हंसजीव एव पतिर्भवेत् ।
सोऽपि क्वाऽपि नरीभूतो, भावी यत्तत्र मे रतिः ॥२०३॥

नाऽपरस्तावदिन्द्रोऽपि, पतिः स्यान्मम कश्चन ।
सखि ! सैष ग्रहो मेऽभूत्तत्कोऽपि क्वाऽपि तोषभाक् ॥२०४॥

अथ सा ललिता चित्तेऽवधार्य तत्कथाप्रथाम् ।
तदन्यवार्ताव्याक्षेपात्तच्चित्तं ह्यन्यतोऽनयत् ॥२०५॥

ततोऽनुज्ञाप्य तां राजतनयां ललिताऽगमत् ।
स्वस्थानं निशि चख्यौ च, राज्ञे व्यतिकरं तु तम् ॥२०६॥

राजा निशम्य वृत्तान्तं, मित्राऽऽख्यातं पुनः पुनः ।
राजपुत्रीं मनश्चौरीं, तद्बुद्धिं प्रशशंस सः ॥२०७॥

अपृच्छच्च धियं मित्राद्राजपुत्रीकरग्रहे ।
पर्यालोच्य स्वचित्ते स, वयस्योऽचीकथन्मतिम् ॥२०८॥

ततश्चित्रपटं चित्रं, कारयामास भूपतिः ।
तदेव हि सरस्तत्र, विन्ध्यस्याऽधो ह्यलेखयत् ॥२०९॥

ज्वालाजटालं दावाऽग्निं, परो लक्षभुजं तु किम् ? ।
दह्यमानाऽऽर्द्रवृक्षोत्थफेनरोमन्थचर्विणम् ॥२१०॥

आगच्छन्तं पयःपूरमिवाऽऽशु तत्सरः प्रति ।
इतस्ततस्ततो नश्यत्पक्षिश्वापदघस्मरम् ॥२११॥

तत्कालप्रसूतां हंसीं, त्राणायाऽऽदिशतीं प्रियम् ।
अधस्तात्पक्षतेर्न्यस्तबालाऽपत्यां रुदद्दृशम् ॥२१२॥

हंसं च दयितापुत्ररक्षायै चिन्तयाऽऽकुलम् ।
पुनः पुनः प्रियाऽऽदेशाद्गतं स्थानाऽन्तरे क्षणे ॥२१३॥

स्थानाऽन्तरं निराबाधमपश्यन्तं क्वचित्ततः ।
भ्रमं भ्रमं पुनः स्वं तन्नीडं सत्वरमागतम् ॥२१४॥

विना तत्र प्रियां पुत्रमेकं च तौ परौ सुतौ ।
दह्यमानौ दवार्चिष्मज्ज्वालाभिर्वीक्ष्य मूर्च्छितम् ॥२१५॥

पुनराश्वस्य गत्वा च, सरस्याकुलपक्षिणि ।
कष्टात् सलिलमानीय, चञ्च्वा सिञ्चन्तमात्मजौ ॥२१६॥

गतजीवौ च तौ मुक्त्वा, प्रेक्षमाणमितस्ततः ।
प्रियां च तनयं चैव, गतं बकस्थलोपरि ॥२१७॥

अर्हन्मूर्त्तेः पुरो दृष्ट्वोत्खातश्वासां प्रियां ततः ।
तज्जीविताऽऽशया नेतुं, नीरं यान्तं सरः प्रति ॥२१८॥

सकृदानीय तोयं च, सिञ्चन्तं ससुतां प्रियाम् ।
व्याघुट्याऽऽशु पुनर्यान्तं, सरस्यत्रैव वारिणे ॥२१९॥

पक्षिश्वापदसंछन्ने, सरस्यौत्सुक्यगामिनम् ।
शृङ्गिणा केनचिच्छृङ्गेणाऽऽहतं मृतमेव च ॥२२०॥

इति चित्रपटे वृत्तं, चित्रयित्वा यथास्थितम् ।
राजा तदनुसारीणि, गायनान्युदयोजयत् ॥२२१॥

द्रव्यदानादकार्षीच्च, चतुरः पृष्ठगायनान् ।
सम्पाद्य तेषां गीतानि, कलकण्ठः स्वयं नृपः ॥२२२॥

पुरे प्रववृते गातुं, द्वितीय इव तुम्बरुः ।
गीतेनाऽऽक्षिप्तचित्तश्च, पूर्लोकस्तमथाऽवृणोत् ॥२२३॥

न केवलं कृपालूनां, निष्कृपाणामपि क्षणात् ।
आर्द्रयद्धृदयं चख्यौ, वृत्तं चित्रे स हंसयोः ॥२२४॥

परित्यज्य जनः सर्वमवश्यकार्यमप्यगात् ।
तत्र गायति यत्रैष, गीतं वश्यकरं यतः ॥२२५॥

स्थाने स्थाने स गीतेन, प्रीणयन् गीतवेदिनः ।
प्रतिवेश्म बभूवाऽऽशु, वर्णनीयकलध्वनिः ॥२२६॥

सोऽहं प्रथमिकाऽपूर्वमाढ्याढ्यतरनागरैः ।
नित्यसेवोपरोधेन, वेश्मन्याकार्य गाप्यते ॥२२७॥

न पारितोषिकस्वर्णं, गृह्णात्यपि कुतोऽपि सः ।
प्रत्युतैष परेभ्यो हि, दत्ते हृष्टः स्वतोषतः ॥२२८॥

एनं श्रोतुं परित्यक्तविषया अपि बिभ्रति ।
उत्कण्ठोत्कलिकां यत्स्युरीदृशा निस्तुषा गुणाः ॥२२९॥

ललिता तु तथैवाऽगात्, परिव्राजिकया मता ।
अनङ्गसुन्दरीपार्श्वे, निगूढाऽऽत्ममनोरथा ॥२३०॥

शब्दैकरसनिर्मग्नमाधाय स पुरीजनम् ।
गन्तुमन्यत्र मिथ्यैव, निश्चक्राम पुराद्बहिः ॥२३१॥

लोकोऽपि त्यक्तसर्वस्वो, धावंस्तमनुनिर्ययौ ।
अहो ! विषयग्राहिण्यं, सार्वजन्यमिहैधते ॥२३२॥

राजाऽथ सौधमारूढो, धावन्तं वीक्ष्य पूर्जनम् ।
अपृच्छद्द्वास्थमाख्यत्स, राज्ञे तां गीतिसङ्कथाम् ॥२३३॥

मन्यमानोऽकृताऽर्थं स्वं, तद्गीत्यश्रवणान्नृपः ।
पृष्ठतः प्राहिणोद्वेगात्तमाह्वातुं स्वमन्त्रिणम् ॥२३४॥

गत्वा मन्त्र्यपि भक्त्याऽऽर्द्रैर्वचोभिः स्नपयन्नमुम् ।
प्रत्यावर्त्त्य समानिन्ये, पुनरेव पुरे क्षणात् ॥२३५॥

श्रोतुमुत्कण्ठितो राजा, सभामापूर्य राजकैः ।
आकारयज्जयराजगायनं वेत्रिपुङ्गवात् ॥२३६॥

एतदेवेहमानोयं, सज्जीभूय कृतत्वरः ।
तं चित्रपटमादाय, जगाम राज्यसंसदम् ॥२३७॥

अन्तःपुरं नृपाऽऽदेशात्, स्थितं यवनिकाऽन्तरे ।
कन्याऽन्तःपुरमप्येत्योपाविक्षदुपभूपति ॥२३८॥

यदर्थमयमारम्भो, नाऽऽयात्यद्याऽपि सा प्रिया ।
इत्यनुत्साहाच्चक्रे स, कालक्षेपं तदागमे ॥२३९॥

इतश्च ललिता दध्यौ, यद्यैनामधुनाऽप्यहम् ।
न नेष्यामि सभां राज्ञस्तन्न श्रोष्यति तां कथाम् ॥२४०॥

ततोऽपि मम मित्रस्य, न स्यात्पूर्णो मनोरथः ।
कथञ्चित्तन्नयाम्येनामनङ्गसुन्दरीं सभाम् ॥२४१॥

ऊचे च सखि ! विज्ञाऽसि, कलानां स्वयमेव हि ।
परं तथाऽपि श्रोतव्यः, संवादाय परोऽपि च ॥२४२॥

तदद्य श्रूयते कोऽपि, देशाऽन्तरादिहाऽऽगतः ।
गायनः पुरतो राज्ञः, सङ्गीतमभिनेष्यति ॥२४३॥

आगताश्च पुरैवाऽत्र, त्वज्ज्यायस्योऽपि सोदराः ।
आजूहवच्च राजा त्वां, तद्गीतिश्रवणाय यत् ॥२४४॥

तत्तत्र गम्यते येन, दुःखविस्मारको ह्ययम् ।
अलङ्कृतीरलङ्कृत्य, त्वमुत्तिष्ठ पुरो भव ॥२४५॥

यथा धर्माय श्रोतव्यं, देवताचरिताऽऽदिकम् ।
तथा मनोविनोदाय, श्रोतव्या गीतिरीतयः ॥२४६॥

ललितयेति सा प्रोक्ता, चचालाऽनङ्गसुन्दरी ।
मान्यं लोकवचो येन, नोल्लङ्घ्यं स्निहता क्वचित् ॥२४७॥

ललिताऽऽदिसखीवृन्दस्वच्छन्दाऽऽनन्दमोदिनी ।
राजपुत्री समभेत्य, राजाऽऽदिष्टा समाविशत् ॥२४८॥

जयराजनृपस्वाऽन्तचकोराऽमृतदीधितिः ।
अनङ्गसुन्दरी पट्यान्तरिता दृष्टिमाक्षिपत् ॥२४९॥

तद्दृष्ट्या ज्योस्नयेवैष, क्षीरसागरवन्मुदा ।
आश्लिष्टोऽधान्नवोल्लासिगीतिगर्जितमूर्जितम् ॥२५०॥

वेत्रयष्ट्या पृथक् स्पष्टं, दर्शयंश्चित्रचित्रितम् ।
चरित्रं हंसयोर्गीतं, तस्याऽनुसारि गायति ॥२५१॥

करुणामिश्रितैर्गीतैः, करुणेन च हंसयोः ।
चरित्रेण नृपो जज्ञे, ससभः साऽश्रुलोचनः ॥२५२॥

अनङ्गसुन्दरी पूर्वजन्मवृत्तं यथातथम् ।
दृष्ट्वा श्रुत्वा च सा प्राप, शोकप्रमोदविस्मयान् ॥२५३॥

अजानतीव ललिता, तामूचे सम्भ्रमात्सखि ! ।
यत्त्वया कथितं मेऽभूत्तत्त्वद्वृत्तं प्रगीयते ॥२५४॥

ललितां राजपुत्रीं च, भाषमाणां मिथः शनैः ।
दृष्ट्वा स गायनः प्रीतिमनिर्वाच्यां जगाम च ॥२५५॥

व्याचष्टे कोऽपि तद्गीतं, कोऽपि हंसं निनिन्द च ।
तादृग् तनयवात्सल्यं, हंस्याः सर्वोऽपि तुष्टुवे ॥२५६॥

गीताऽनुरागतः कोऽपि, हंसीकारुण्यतः परः ।
गायनस्वरमाधुर्यात्, कोऽपीति मुमुदे सभा ॥२५७॥

अनङ्गसुन्दरी त्वेषा, स्ववृत्तश्रवणादभूत् ।
मद्वृत्तान्तः कथं ज्ञातोऽमुनेति ज्ञातुमुत्सुका ॥२५८॥

गायनोऽयमिति स्वर्णं, दीयमानमपि स्वयम् ।
अगृह्णन् भूभुजा स्नेहाज्जयराजो व्यसर्ज्यत ॥२५९॥

यथास्थानं ततो राजपत्नीषु चलितास्वियम् ।
अनङ्गसुन्दरी तूर्णं, ययौ सौधमथाऽऽत्मनः ॥२६०॥

ऊचे च ललितामुत्का, गायनं तं समानय ।
यथा पृच्छामि वृत्तान्तं, सर्वं हंसगतं सखि ! ॥२६१॥

गत्वा च ललिता चख्यौ, जयराजाय भूभुजे ।
तस्या अनङ्गसुन्दर्या, अवस्थां च वचश्च तत् ॥२६२॥

सोऽपि सार्धं तयाऽऽलोच्य, किमप्यादिश्य कर्णयोः ।
व्यसृजत्तामेकां भूयः, साऽप्यगात् सौधमात्मनः ॥२६३॥

राजपुत्रीमथोचे सा, देवि ! नाऽऽयाति गायनः ।
किन्त्वाहैष यदायातु, राजपुत्रीह चेत् स्पृहा ॥२६४॥

ततश्चालक्षितैवान्यै, राजपुत्री तया सह ।
जयराजं ययौ येन, यात्यर्थी कार्यसाधकम् ॥२६५॥

तदागमनमात्रेण, जयराजो बभूव सः ।
अन्तरुन्मीलदानन्दप्लवमानेन्द्रियव्रजः ॥२६६॥

युष्माभिर्हंसयोर्वृत्तं, ज्ञातमेतत्कथं ? त्विति ।
जयराजं ललितया, पप्रच्छ राजपुत्रिका ॥२६७॥

जयराजस्ततोऽवोचच्छृणु राजसुते ! कथाम् ।
उत्तरस्यां ककुभ्यस्ति, साङ्काश्यं नाम पत्तनम् ॥२६८॥

जयराजो नृपस्तत्र, कुरुते राज्यमुत्तमम् ।
निधिभिर्धनदः कामो, रूपेणेन्द्रो नयेन च ॥२६९॥

ज्ञात्वा कुतोऽपि वृत्तान्तं, निजपूर्वभवोद्भवम् ।
राजा स्त्रीद्वेषमाबिभ्रच्चरति ब्रह्म केवलम् ॥२७०॥

यदा कदाऽपि हंसी सा, नारीभूता घटिष्यते ।
भविता सा कलत्रं मे, नाऽन्येत्यङ्गीचकार सः ॥२७१॥

ततश्च हंसर्योर्वृत्तं, लेखयित्वा पटेषु सः ।
मादृशामर्पयामास, द्रष्टुं देशाऽन्तरेषु ताम् ॥२७२॥

राजाऽऽदेशाद्भ्रमाम्येवं, ग्रामे ग्रामे पुरे पुरे ।
चित्रदर्शनाच्चेत् कोऽपि, स्मरेज्जन्माऽन्तरं निजम् ॥२७३॥

किंरूपः ? किङ्गुणः ? कीदृक्कुलः ? किम्पुरुषव्रतः ? ।
जयराजः स ते स्वामीत्यप्राक्षीत्तं नृपाऽङ्गजा ॥२७४॥

जयराजः स्वयं स्वस्य, गुणानाख्यातुमक्षमः ।
परं तदनुरोधेन, सोऽचीकथद्यथातथम् ॥२७५॥

श्रुत्वेति राजपुत्री सा, दत्त्वाऽस्मै हारमात्मनः ।
सार्धं ललितया सौधं, जगामाऽनुपलक्षिता ॥२७६॥

पूर्वजन्मप्रियं पूर्वप्रेमाऽभ्यासाद्दृशोः पुरः ।
पश्यन्ती तत्कथावार्ताविनोदेनाऽनयन्निशाम् ॥२७७॥

विभातायां विभावर्यामनङ्गसुन्दरी ततः ।
वेत्रिण्या भूभुजे सर्वं, तद्वृत्तान्तं व्यजिज्ञपत् ॥२७८॥

साङ्काश्यनगराऽधीशं, जयराजाऽभिधं नृपम् ।
अनङ्गसुन्दरी स्वेन, गत्वा तत्र वरिष्यति ॥२७९॥

श्रुत्वेति मुदितो राजा, मुख्याऽमात्यमथाऽदिशत् ।
सह गत्वा त्वया तत्र, कुमारी पर्यणाय्यताम् ॥२८०॥

हस्त्यश्वस्वर्णसामग्रीमाधायाऽथ स मन्त्रिराट् ।
पितृभ्यां स्वयमादिष्टां, पुरस्कृत्य नृपाऽऽत्मजाम् ॥२८१॥

प्रति साङ्काश्यमागन्तुमिच्छद्भिः पथिकैः श्रितः ।
चचालाऽश्वक्षुरक्षुण्णधूलिधूसरिताऽम्बरः ॥२८२॥

ततः किञ्चिदनुगम्य, वचोभिरनुकूल्य च ।
राजपुत्रीमभिष्वज्य, ललिता सा न्यवर्तत ॥२८३॥

मिलित्वा जयराजस्य, पादसूत्रविमोचनात् ।
स्वरूपीभूय स प्रोचे, वयस्यस्तं कृतस्मितः ॥२८४॥

स्वप्नदृष्टं त्वयैवैतदासाद्यतेऽपरेण न ।
पुण्यधीव्यवसायानां, योगो भोगाय तेऽभवत् ॥२८५॥

राजाऽऽह राजपुत्रीयं, योग्याऽस्यैवेति चेतसा ।
तद्गोत्रदेव्या स्वप्नोऽयं, मन्ये मे खलु दर्शितः ॥२८६॥

स्त्रीकारि कण्डकं चैतत्कार्यकारि बभूव मे ।
करिष्यति कदाऽप्येतत्कार्यं पुरुषकार्यपि ॥२८७॥

प्रतिष्ठस्व ततो मार्गे, पुरोभूयैव मन्त्रिणा ।
मन्दगामी हि तत्सार्थ, आवां तु लघुगामिनौ ॥२८८॥

इत्युक्तो जयराजोऽपि, तेन मित्रेण धीमता ।
कुमारीसैन्यमुल्लङ्घ्य, ययौ पद्भ्यां निजं पुरम् ॥२८९॥

पुरैव हि स राज्यं स्वं, स्वीचकाराऽविकारभाक् ।
अज्ञापितसमागच्छद्राजपुत्र्यागमस्ततः ॥२९०॥

किल न वेद्मि तद्राजपुत्र्यागमनमित्यथ ।
चचालाऽभिरिपुं तूर्णं, पूर्वस्यां दिशि भूपतिः ॥२९१॥

अखण्डगमनात् प्राप, पुरं शात्रवमादरात् ।
चतुरङ्गचमूचक्रात्, परिवेष्ट्य स्थितः स तत् ॥२९२॥

अनङ्गसुन्दरीसैन्यं, साङ्काश्यपुरमागतम् ।
ज्ञात्वा नृपतिवृत्तान्तं, तत्राऽगाद्यत्र भूपतिः ॥२९३॥

दत्त्वा वासमथोपान्ते, राजसैन्यस्य मन्त्रिराट् ।
आदायाऽपूर्ववस्तूनि, द्वास्थपृष्टोऽनमन्नृपम् ॥२९४॥

अजानत इवैतस्मै, जयराजाय भूभुजे ।
स्वयंवराऽऽगतां स्नेहाद्राजपुत्रीं न्यवेदयत् ॥२९५॥

राजाऽपि स्वकथाऽऽख्यानाद्राजपुत्रीकथाश्रुतेः ।
मिथो वाक्संवाद इति, पर्यणैषीन्नृपाऽऽत्मजाम् ॥२९६॥

तथैव जयलक्ष्मीं च, शत्रुनिग्रहणादसौ ।
उपयम्य समागात्स्वं, जयराजः पुरं ततः ॥२९७॥

अनङ्गसुन्दरीनाथः, सनाथः प्रियया तया ।
विलासमिव साम्राज्यं, करोत्यर्थत्रयप्रियः ॥२९८॥

कथामिति निवेद्याऽथ, कुब्जिका प्राह सस्मितम् ।
कामलेखे ! किलेदक्षाः, कृतघ्ना दम्भिनो नराः ॥२९९॥

पश्य हंसेन सा हंसी, तादृशि व्यसने क्षणात् ।
सापत्या तत्यजे तत्को विश्वासः प्रेम्णि कामिनः ? ॥३००॥

पश्य त्वं जयराजेन, मायया चित्रकारिणा ।
चक्रे राजसुता कान्ता, दम्भः पुंसु यतो जयी ॥३०१॥

कामलेखा ततः प्राह, सखि ! सत्यं ब्रवीषि हि ।
प्रत्ययः कस्य नैषोऽभूत्, पुंसां दम्भपटीयसाम् ? ॥३०२॥

परं सखि ! पुमांसोऽमी, तावद्दम्भविजृम्भिणः ।
यावद्बुद्धिविलासोऽत्र, नाऽबलानां प्रगल्भते ॥३०३॥

श्रुतः किं नु त्वया राजा, रत्नाऽङ्गदः सुधीरपि ।
मूर्ध्ना ह्युपानहौ सौधे, वाहितो रत्नमालया ॥३०४॥

सम्भ्रमात् कुब्जिका प्राह, सखि ! नाऽसौ मया श्रुतः ।
कथय तत्कथां येनाऽद्याऽपि रात्रिर्गरीयसी ॥३०५॥

जयराजकथा समाप्ता ॥

रत्नमालाकथा

कामलेखा समारेभे, रत्नमाला कथामिमाम् ।
अस्ति श्रीपर्वतो नाम, गिरिर्भूमुकुटोपमः ॥१॥

तत्राऽभूत् कीरयुग्मं यत्, प्रेमशृङ्खलितं मिथः ।
भुङ्क्ते शेते प्रयात्येति, सदैवाऽऽनन्दमेदुरम् ॥२॥

मन्थरप्रेमलीलानि, दिनानि समुपेयुषी ।
अन्यदा सुषुवे पुत्रं, शुकी निःशोकमेव हि ॥३॥

वर्द्धमाने सुते तस्मिन्, स्वपित्रोः स्नेहलालनात् ।
स्नेहपर्शुः कदाऽप्यासीत्, कलहः शुकयोर्मिथः ॥४॥

उच्चावचवचांस्युक्त्वा, प्रश्लथप्रेमबन्धना ।
शुक्याहाऽतःपरं नाऽहं, भार्या ते त्वं न मे पतिः ॥५॥

ततः प्रोचे शुकः पुत्रं, मदीयं मे समर्पय ।
शुकी प्राहाऽङ्गजं स्वं हि, म्रियमाणाऽपि नाऽर्पये ॥६॥

शुकोऽवोचद्ग्रहीष्यामि, बलादपि निजं सुतम् ।
किं न वेत्सि पितुः पुत्रो मातुः पुत्रीत्यमूं स्मृतिम् ? ॥७॥

शुक्यूचे तर्हि गच्छावः, श्रीवल्लभाऽभिधे पुरे ।
तत्र रत्नाऽङ्गदो राजा, यद्वक्ता तत्करिष्यते ॥८॥

इति निश्चित्य कीरा सा, पुत्रमादाय यत्नतः ।
पुरोगेण शुकेनाऽथ, ययौ श्रीवल्लभे पुरे ॥९॥

रत्नसिंहासनं शोणं, शक्रप्रतापपुञ्जवत् ।
आक्रम्याऽऽसेदुषो राज्ञोऽकस्मात्पुरः शुकोऽपतत् ॥१०॥

कुतः शुकोऽयमायासीदिति मोदिनि भूपतौ ।
चञ्चूगृहीतपुत्रा सा, ततश्चाऽगाच्छुकप्रिया ॥११॥

राजा रत्नाऽङ्गदो दृष्ट्वा, सापत्यं कीरयुग्मकम् ।
कौतुकादग्रहस्ताभ्यां, कीरद्वन्द्वमथाऽग्रहीत् ॥१२॥

निःश्वस्य कीरिकाऽऽचख्यौ, राज्ञे वृत्तान्तमात्मनः ।
ममाऽङ्गजं कथं नाथ !, याचतेऽयं शुको बलात् ? ॥१३॥

शुकः प्रोवाच भो राजन् ! अहं बीजी किलाऽस्य तत् ।
याचयामि सुतं स्वं तु, ततः कोऽत्र ममाऽनयः ? ॥१४॥

राजाऽथ चिन्तयामास, शुकद्वन्द्वमिदं मिथः ।
विरक्तं व्यलीके क्वाऽपि, स्नेहो निर्वाहमेति न ॥१५॥

त्यजन् कीरीं शुकः पुत्रं, स्वेनैवाऽऽदातुमिच्छति ।
अनन्यशरणा कीरी, तं नाऽर्पयितुमीहते ॥१६॥

पुरुषत्वाच्छुकः सैष, वर्त्तिष्यते यथातथा ।
एकाऽपत्या वराकीयं, भविष्यति कथं शुकी ? ॥१७॥

तच्छुक्यै तनयोऽवश्यं, समर्प्य इति निश्चयः ।
स्त्रीत्वात्तु दैन्यपात्रां स, शुक्यां सार्द्रो नृपोऽवदत् ॥१८॥

शुक्याः पुत्रो भवेदेष, येनाऽनन्यगतिर्ह्यसौ ।
ततश्च स शुकः प्रोचे, वेत्सि नीतिं न किं नृप !? ॥१९॥

नीतिसारस्ततो मन्त्री, प्रोचे राजानमादरात् ।
नाथाऽयं निर्णयो देयो न स्वामिना स्वयं खलु ॥२०॥

प्रष्टव्याः किन्तु ते वृद्धा, नीतिशास्त्रविदो हि ये ।
सत्कीर्तिर्वाऽपकीर्तिर्वा, पञ्चभिः सह सह्यते ॥२१॥

राजाऽमात्यवचो न्याय्यमभिनन्द्य ततः स्वयम् ।
हस्तन्यस्तशुकद्वन्द्वो धर्माऽधिकरणं ययौ ॥२२॥

तत्र चाऽधिकृतान् दत्तगौरवान् सचिवान् स्वयम् ।
पप्रच्छाऽपत्यवादं तं, पक्षपाती शुकस्त्रियाम् ॥२३॥

नीतिशास्त्राण्यथाऽऽनीय, विलोक्याऽपत्यनिर्णयम् ।
ऊचुर्नाथ ! पितुः पुत्रो मातुर्भवति पुत्रिका ॥२४॥

इति श्रुत्वा नृपो नीतिं, परतन्त्रोऽवदच्छुकीम् ।
त्वं शुकायाऽर्पयाऽपत्यं, नीतिदृष्टमिदं शुकि ! ॥२५॥

रोदयन्तीक्षकं नारीवर्गं सा रुदती स्वयम् ।
उवाच भूपमेतत्ते, सम्मतं नृपसत्तम !? ॥२६॥

राजाऽऽह न शास्त्रदृष्टमन्यथाकर्तुमीश्महे ।
शुकी प्राह त्वदादेशादर्पितोऽयं सुतो मया ॥२७॥

किन्तु लेखय पत्रेषु, किलेदृक्षं विधिं नृप ! ।
यदवश्यं पितुः पुत्रो नाऽन्यस्य कस्यचित्ततः ॥२८॥

लेखितेषु नृपेणाऽऽशु, विध्यक्षरेषु सा शुकी ।
स्नेहादालिङ्ग्य चाऽऽघ्राय, मूर्ध्नि पुत्रमदोऽवदत् ॥२९॥

गर्भक्लेशसहैवाऽस्मि, न लभ्यं ते सुखं मया ।
तथाऽपि शरदां लक्षं, जीव पुत्र ! मदाशिषः ॥३०॥

एतावदेव सम्भाव्यं, जीवितव्यं ममाऽपि हि ।
विना पुत्रं प्रियं चाऽपि, मानिनीनां न जीवितम् ॥३१॥

इत्युक्त्वाऽश्रूणि मुक्त्वा च, मुहुरालिङ्ग्य वक्षसा ।
त्यक्त्वा तत्र सुतं बालमुड्डीयाऽगात्क्वचिच्छुकी ॥३२॥

शुकः स्वपुत्रमादाय, कानने क्वाऽपि जग्मिवान् ।
हताऽपत्यां शुकीं शोचन्, ययौ स्वं वेश्म पूर्जनः ॥३३॥

इतश्च कीरिका पुत्रवियोगान्मर्तुमिच्छती ।
महोद्यानस्थिते क्वाऽपि, श्रीनाभेयजिनाऽऽलये ॥३४॥

दृष्ट्वा मूर्त्तिं प्रभोरुद्यद्रोमाऽङ्कुराऽङ्गदन्तुरा ।
अन्तश्च भावनाच्छिन्नकर्मकुञ्जसमाशया ॥३५॥

त्रिश्च प्रदक्षिणीकृत्य, जिनं तदनु साऽग्रतः ।
प्रणम्य त्रिजगन्नाथं, नाऽतिदूरे ह्युपाविशत् ॥३६॥ [त्रिभिर्विशेषकम्]

ततो देवाऽर्चकं भक्त्या, शुकी प्रोचे यदत्र भोः ! ।
द्वारोर्ध्वदेहलीदेशे, श्लोकमेकं लिख स्फुटम् ॥३७॥

रत्नाऽङ्गदनृपाऽऽदेशात्, समर्प्य नन्दनं शुकी ।
अमृताऽनशनं कृत्वा, नाभेयस्य पुरोऽत्र तु ॥३८॥

लेखयित्वा ह्यमुं श्लोकं, कृत्वा साऽनशनं परम् ।
त्रिभिश्च वासरैः प्रापदायुषः प्रान्तमन्यदा ॥३९॥

तीर्थकृन्मूर्तेः पुरतः कृताऽनशनभावतः ।
शुकीजीवः सुता जज्ञे, नीतिसारस्य मन्त्रिणः ॥४०॥

क्रमात् प्रवर्धमानाऽभून्मूर्त्तिभूतेव किं शची ? ।
रत्नमालेति तस्याश्च, पितृभ्यां विदधेऽभिधा ॥४१॥

सा क्रमाद्यौवनं यूनां, चित्तमोहनमासदत् ।
नानाक्रीडाभिरानन्दात्, सखीभिः क्रीडति स्वयम् ॥४२॥

रत्नमालाऽन्यदोद्यानपरिपाट्या जगाम तत् ।
उद्यानं यत्र चक्रे सा, जिनाऽग्रेऽनशनं शुकी ॥४३॥

उद्यानदर्शनात्किञ्चिदुन्मनीभावमन्वभूत् ।
दृष्ट्वा च देवचैत्यं तत्, हृष्टाऽन्तः प्रविवेश सा ॥४४॥

आलोक्याऽऽद्यार्हतो मूर्त्तिमुच्छृङ्खलमनर्गलाम् ।
आनन्दाऽमृतमग्नेव, रत्नमाला बभूव सा ॥४५॥

आनाय्य साऽथ दासीभ्यः, पूजामष्टविधां ततः ।
शुचिवस्त्रा स्वयं भूत्वा, साऽऽनर्चाऽऽदिजिनं मुदा ॥४६॥

ततश्च पुरतो भूत्वा, यावद्वन्दितुमाददे ।
वस्त्राऽन्तमग्रपाणिभ्यां, तावच्छ्लोकं ददर्श सा ॥४७॥

श्लोकं निरुप्य सा जातिस्मरणं प्राप तत्क्षणात् ।
अज्ञासीच्च शुकीपुत्रवृत्तं स्वं पूर्वजन्मजम् ॥४८॥

अमर्षं दधती राज्ञि, स्मृतपुत्राऽर्पणात् क्षणात् ।
यथाविधि नमस्कृत्य, देवानात्मगृहं ययौ ॥४९॥

सा बुद्ध्या वीक्ष्यमाणाऽस्थान्नित्यं तद्गतमानसा ।
रत्नाऽङ्गदनृपे पुत्रदुःखप्रतिकृतिक्रियाम् ॥५०॥

तिर्यग्जन्म परित्यज्य, प्राप्यैव जन्म मानुषम् ।
उच्चैर्गोत्राऽमात्यपुत्री, शशंसाऽनशनं निजम् ॥५१॥

नीतिसारगृहे राज्ञो वडवाः कतिचित् किल ।
मन्त्रिजात्याऽश्वसंयोगादन्तर्वन्त्योऽभवन्क्रमात् ॥५२॥

रत्नमालाऽपि विज्ञाय, निजाऽश्वयोगगर्भिणीः ।
राज्ञस्ता वडवाश्चित्ते, मुमुदे बुद्धिशालिनी ॥५३॥

क्रमेण ताः प्रसूताश्च, सुलक्षणान् किशोरकान् ।
स्थानपालस्ततो गत्वाऽऽचख्यौ राज्ञेऽश्वजन्म तत् ॥५४॥

हृष्टो राजा ददौ तस्मै, पारितोषिकमात्मना ।
तदैव चाऽप्यथाऽऽदिक्षदानयाऽश्वाः सहाऽर्भकैः ॥५५॥

स गत्वा वडवा यावद्गृह्णाति सकिशोरकाः ।
रत्नमाला ततोऽभ्येत्य, न्यवारयत् किशोरकान् ॥५६॥

स्थानपालः पुनर्गत्वा, महीशाय व्यजिज्ञपत् ।
किशोरकाणां व्याषेधं, स्वामिन् ! मन्त्रिसुता व्यधात् ॥५७॥

कथमित्यथ विज्ञातुं, बृहत्पुरुषमादिशत् ।
गत्वाऽमात्यसुतां पृच्छ, किं दधासि किशोरकान् ? ॥५८॥

एत्याऽमात्यसुतां सोऽथाऽप्राक्षीद्व्याषेधकारणम् ।
साऽप्यूचे स्युः पितुः पुत्रा, इति राजा न वेत्ति किम् ? ॥५९॥

मदीयाऽश्वस्य संयोगादेते जाता किशोरकाः ।
इति सम्बन्धबन्धेन, धृता ह्येते मया खलु ॥६०॥

बृहत्पुमानथो राज्ञे, व्यजिज्ञपद्यथातथम् ।
तच्छ्रुत्वा नृपतिर्दध्रेऽमर्षकोपौ स्वचेतसि ॥६१॥

वसन्तसमये प्राप्तेऽन्यदोद्यानं समीयिवान् ।
राजा रत्नाऽङ्गदोऽपश्यद्रत्नमालां पुराऽऽगताम् ॥६२॥

अमात्यस्य सुता सेयमिति ज्ञात्वा महीपतिः ।
स्मृत्वा चाऽश्वनिषेधं तं, तस्यामनुशयं दधौ ॥६३॥

कृत्वा केलिं वरोद्याने, सौधेऽगान्नृपतिस्ततः ।
अभाणीन्मन्त्रिणं देहि, मह्यं त्वं तनयां निजाम् ॥६४॥

सर्वमेतत्त्वदीयं तद्गृहाण रोचतेऽत्र यत् ।
इत्युक्तो मन्त्रिणा भूपो रत्नमालामुपायत ॥६५॥

तस्यामेव तमस्विन्यां, गत्वा रहसि भूपतिः ।
क्षुद्रभावात् समादिक्षद्रत्नमालामिति स्फुटम् ॥६६॥

यावत्ते तनयो न स्यात्तावत् स्थेयं पितुर्गृहे ।
पुत्रे जाते पुनः शीघ्रमागच्छेर्मम सद्मनि ॥६७॥

मयाऽसि परिणीतैव, नाऽसि स्पृष्टाऽपि पाणिना ।
रन्तव्यो न परः कोऽपि, पुत्रो जन्यः स्वकौशलात् ॥६८॥

क्षुद्रादेशमिति श्रुत्वा, राजानं प्राह धीमती ।
राजाऽऽदेशः प्रमाणं मे, विशेषः श्रूयतामसौ ॥६९॥

यथाऽऽदिष्टस्त्वया स्वामिंस्तथा जन्यः सुतो मया ।
वाह्यश्च शिरसा त्वं हि, ध्रुवमुपानहौ निजे ॥७०॥

इति प्रतिज्ञामाधाय, भूमिमाहत्य पाणिना ।
ययौ मन्त्रिसुता वेश्म, पैतृकं मानिनीवरा ॥७१॥

चिन्तया जग्रसे साऽथोपविश्य रहसि क्षणम् ।
यथाकार्यं तथाकार्यमालोच्य चेतसा ततः ॥७२॥

गत्वाऽऽख्यन्नृपतेर्वाचं, क्षुद्राऽऽदेशं हि मन्त्रिणे ।
मन्त्री प्रोवाच वत्से तत्, किं कर्तव्यं त्वयाऽधुना ? ॥७३॥

रत्नमाला ततः प्रोचे, नैतन्मे तात ! दुष्करम् ।
परं कूटप्रयोगोऽत्र, कार्यसिद्धौ प्रगल्भते ॥७४॥

स च लज्जाकरः स्त्रीणां, कुलीनानां प्रवादकृत् ।
यदपकीर्त्तिकृल्लोके, तन्न कार्यं विवेकिभिः ॥७५॥

अथ च भूभुजा क्षुद्राऽऽदेशोऽयं प्रददे मम ।
मया चोरीकृतः सम्यगविचार्यैव चेतसा ॥७६॥

गजनिमीलिकां कृत्वा, स्थीयते वा ततोऽपि मे ।
एवमेव हतं जन्म, रण्डाया इव दुःसहम् ॥७७॥

यदादिशति तातो मे, तत् कुर्वेऽतः परं खलु ।
स्त्रीणां स्वेच्छापरावृत्तिः, स्वकुलेन्दोर्हि लाञ्छनम् ॥७८॥

ततोऽमात्योऽवदद्वत्से !, युक्तेमर्थं प्रकुर्वताम् ।
नहि कूटप्रयोगोऽपि, स्यादपवादकारणम् ॥७९॥

स्त्रीणां चेच्छीलरक्षाऽभूत्तत्प्रवादाद्भवेन्न भीः ।
सतीत्वचन्द्रिकायां हि, मज्जन्त्यकीर्तितारकाः ॥८०॥

तद्वत्सा स्वप्रतिज्ञातं, विदधातु त्वराऽञ्चिता ।
यथातथाऽपि राज्ञोऽस्य, कार्या ह्याज्ञा सुते ! त्वया ॥८१॥

रत्नमाला ततः प्रोचे, तात ! कारय सत्वरम् ।
याम्यायां दिशि जैनेन्द्रं, देववेश्म समुन्नतम् ॥८२॥

पुरेऽत्र देवगेहेषु, सङ्गीतं याः प्रकुर्वते ।
तासां मध्यादथैकैका, कलानिष्ठामुपेयुषी ॥८३॥

आकृष्य द्रव्यदानेन, नवेऽत्र देववेश्मनि ।
सङ्गीतस्य विधानाय, विधेया पण्यकामिनी ॥८४॥ [युग्मम्]

परितो देवगेहं च, निष्पाद्यं पुरमुत्तमम् ।
मद्योग्यं सौधमेकं च, तत्र कारय विस्तृतम् ॥८५॥

ताश्च पण्याङ्गनास्तत्र, वास्तव्याः स्युर्यथा सदा ।
तथा तासां स्थितिः कार्या, मासपाटकसूत्रणात् ॥८६॥

तथैव कारितं सर्वं, मन्त्रिणा तन्निदेशतः ।
यो ह्यत्यर्थं व्ययत्यर्थं, तत्कार्यं लघु सिद्ध्यति ॥८७॥

ततश्च मन्त्रिपुत्री सा, रङ्गाचार्यादधीतिनी ।
गीते नृत्तेऽथ वीणायां, मृदङ्गे तालवंशयोः ॥८८॥

यथावद्दत्तसङ्केतदासीभिर्मृदुवाणिभिः ।
चित्ताऽनुवृत्तिशीलाभिर्मनोज्ञात्रीभिरञ्चिता ॥८९॥

गत्वा सा पुरसौधानि, यथायोग्यं विभज्य च ।
पण्यस्त्रीभ्योऽर्पयामास, रत्नमाला स्वयं ततः ॥९०॥

ददावलङ्कृतीस्ताभ्यो विस्फूर्जद्रत्नदन्तुराः ।
अन्यथाऽपि प्रसादेन, यथोचितमदाद्बहु ॥९१॥

ततो गुणनिकां कृत्वा, यथासम्पाठमादरात् ।
अतिक्रान्तत्रियामाऽऽद्यप्रहरेऽगाज्जिनौकसि ॥९२॥

नमस्कृत्य जिनाधीशं, पिधाय द्वारमादिमम् ।
प्रारेभे रत्नमालाऽथ, स्त्रीसङ्गीतं पुरोऽर्हतः ॥९३॥

एवं च नित्यशोऽभ्येत्याऽनुकलं नृत्यति स्वयम् ।
पुरसौधे वसत्यस्मिन्, दासीभिरुपसेविता ॥९४॥

अथैकदा नृपो रात्रौ, निद्राया अर्पितक्षणः ।
सङ्गीतध्वनिना तेन, समेत्योत्थापितोऽद्भुतम् ॥९५॥

आगतश्च बहिर्वेगान्निशम्य निभृतं ध्वनिम् ।
बभूवोत्कण्ठितः श्रोतुं, सङ्गीताऽमृतमात्मना ॥९६॥

सन्त्यज्य यामिकदृशं, सौधादुत्तीर्य खड्गभृत् ।
अभिगीतध्वनिं गच्छन्, प्राप तज्जैनमन्दिरम् ॥९७॥

विद्युदुत्क्षेपकरणादारुह्य वप्रभूमिकाम् ।
अपश्यन्मृदु सङ्गीतं, विस्मयस्तिमितेक्षणः ॥९८॥

मध्यतोऽवतरणीयमिति विस्मृत्य भूपतिः ।
तस्थौ तत्रैव वप्राऽग्रे, सङ्गीतेन वशीकृतः ॥९९॥

सङ्गीतं केवलं स्त्रीणां, तत्प्रेक्ष्याऽभून्महीपतिः ।
चक्षुःश्रोत्रोपनीतोद्यदानन्दस्नातमानसः ॥१००॥

सङ्गीतं शृण्वतस्तस्य, या चित्तैकाग्रताऽभवत् ।
तत्त्वध्याने भवेत्सा चेन्नूनं मुक्तिवरो भवेत् ॥१०१॥

कृत्वा पुरस्ताद्दैवस्य, सङ्गीतं विहितं क्षणम् ।
नमस्कृत्य प्रभोर्मूर्तिं, स्त्रीवृन्दं क्वचिदप्यगात् ॥१०२॥

शृण्वन्नस्मि तथैवैतत्, किलाऽहमिति मानसः ।
गीताऽनुरणनभ्रान्तिविश्रान्तश्रवणोऽस्ति सः ॥१०३॥

क्षणं स्थित्वा ततो ज्ञातसङ्गीतविरतिक्षणः ।
ययुः क्वैता हि सङ्गीतयोषितोऽत्रेत्यचिन्तयत् ॥१०४॥

मध्येभवनमुत्तीर्य, राजा रत्नाऽङ्गदस्ततः ।
स्फूर्जन्मणिकृतोद्द्योतं, प्रैक्षिष्ट तं जिनालयम् ॥१०५॥

अकारि रम्यं केनेदं, मन्दिरं श्रीजिनेशतुः ? ।
अमन्दाऽऽनन्दसङ्गीतकोविदाः का इमाः स्त्रियः ? ॥१०६॥

रूपेणाऽनेन सङ्गीतेनाऽनेन निश्चयादिमाः ।
भवन्ति नैव मानुष्यः, किन्त्विमा देवयोनयः ॥१०७॥

हहा !! मे पुरतोऽप्येता, जग्मुः सङ्गीतयोषितः ।
एकोऽस्थामहमेवाऽत्र, गीतमोहितमानसः ॥१०८॥

भवतु चेत्पुनर्भूयोऽप्यागच्छेयुरिमा इह ।
ततो द्रक्ष्याम्यहं श्वोऽपीत्यालोच्य सौधमागमत् ॥१०९॥

तत्सङ्गीतं स्त्रियस्ताश्च, ध्यायन्नेव महीपतिः ।
तत्यजे निद्रया रात्रौ, दिवा च राज्यचिन्तया ॥११०॥

राज्ञः प्रेक्ष्य स्मराऽवस्थामस्तमेत्य स्वयं रविः ।
कामिकार्यसहायिन्या, रात्रेरवसरं ददौ ॥१११॥

निशास्त्रीराज्यमेतर्हि, नाऽत्र प्रतिभटो भवेत् ।
समयज्ञस्तमो मन्त्री, व्यानशे भुवनोदरम् ॥११२॥

लावण्यं मे स्वभावेन, न स्त्रीभ्योऽपहृतं मया ।
इति विष्णुपदस्पर्शान्निःशङ्कः प्रोदगाच्छशी ॥११३॥

शरीराऽपाटवव्याजाद्विसृज्याऽऽशु सभाजनम् ।
आदाय कृत्रिमां निद्रां, पल्यङ्केऽशेत भूपतिः ॥११४॥

यथास्थानं गते लोके, निद्राभाज्यङ्गरक्षके ।
उत्थाय शनकै राजा, सौधादवातरद्भुवि ॥११५॥

आशूत्पाटितपादाभ्यां, गच्छन्नुत्सुकमानसः ।
तथैव पिहितं द्वारमालोक्य वप्रमासदत् ॥११६॥

तथैव च पुरो नाभिसूनोः सङ्गीतकं मृदु ।
कुर्वत् स्त्रीवृन्दमद्राक्षीदश्रौषीच्च नृपो मुदा ॥११७॥

शनैरुत्तीर्य वप्राऽग्रात्, स्तम्भच्छायाऽतिरोहितः ।
अपश्यत् रत्नमालां तां, नृत्यन्तीमुर्वशीमिव ॥११८॥

अभूच्च नृपतेस्तस्यामनुरागोऽतिदुस्सहः ।
तादृग्रूपं कला सा च, कस्य नोन्मादकारणम् ? ॥११९॥

यदर्थमयमारम्भः, कथं सोऽद्याऽपि भूपतिः ? ।
नाऽऽयातीत्यभितो रत्नमाला स्वां दृष्टिमक्षिपत् ॥१२०॥

दक्षया वक्रया भूयः, प्रेषिताऽऽगतया दृशा ।
महीशो रत्नमालायै, हस्ते धृत्वा समार्प्यत ॥१२१॥

दृष्टश्च नरपो रत्नमाला प्रारम्भमात्मनः ।
सार्थकं मानयामास, स्वां बुद्धिं प्रशशंस च ॥१२२॥

विसृज्य च तदैवैषा, प्रेक्षणीयकमुत्सुका ।
चचाल सा सखीहस्तन्यस्तस्वकरपङ्कजा ॥१२३॥

नाऽतिदूरस्थितस्तस्यामाहिताऽक्षोऽनुरागतः ।
तदङ्गरागसौरभ्यादिष्टमार्गो ययौ नृपः ॥१२४॥

तामनुप्रविवेशैष, तत्सौधे रत्नराजिनि ।
वेश्ययैव तया सौधप्रतिपत्त्याऽन्वरज्यत ॥१२५॥

रजनीविरतौ राजा, तत्सौधात्सौधमात्मनः ।
वेगादागत्य सुष्वाप, पल्यङ्के पूर्ववत् किल ॥१२६॥

एवं च नित्यमागत्य, सङ्गीतं वीक्ष्य भूपतिः ।
एकाकी रत्नमालायाः, सौधे शेतेऽनुरागतः ॥१२७॥

रत्नमाला च राजाऽसौ, यद्भाषते निशिस्थितः ।
साऽभिज्ञानं हि तत्सर्वं, लिखति स्म दिने दिने ॥१२८॥

मां मुक्त्वा जिनचैत्येऽस्मिन्नाऽऽगन्तव्यं पुनर्गृहे ।
दासीः सङ्केत्य सा त्वैवं, रत्नमाला ययौ जिनम् ॥१२९॥

सुखाऽऽसननरान् देवगृहाद्बहिर्विमुच्य सा ।
प्रविश्याऽऽरब्धसङ्गीताऽरज्यत स्वयमेव च ॥१३०॥

परिपूर्णकला चैकं, परं च पुरतोऽर्हतः ।
रञ्जनीयो नृपश्चेति, रङ्गकारणसन्ततिः ॥१३१॥

तथैव च नृपोऽभ्येत्य, कृताऽङ्गरागविभ्रमः ।
संवीतदिव्यनेपथ्यस्तस्थौ स्तम्भतिरोहितः ॥१३२॥

सङ्गीतविरतौ जग्मुः, स्त्रियस्ताः पार्श्वगायिकाः ।
यद्रत्नमालया पूर्वमादिष्टा गमनेऽभवत् ॥१३३॥

रत्नमाला विलम्बाय, प्रविश्याऽन्तर्जिनौकसः ।
नताऽङ्गी ववन्देदेवान्, भावादिव कृतस्तवा ॥१३४॥

बहिर्निःसृत्य भूपेन, चचालाऽनुगताऽथ सा ।
मायया ऽह्वत् स्वदासीश्च, ताभ्यो लेभे न तूत्तरम् ॥१३५॥

कृत्रिमं कोपमाधाय, दासीश्चुक्रोश कर्कशा ।
कोऽधुनोपानहौ मे हि, ग्रहीष्यतीत्यदोऽवदत् ॥१३६॥

आरुरोह क्षणादेषा, सुखासनं कृतग्रहा ।
मुमोचोपानहौ स्थूले, दृढभारे पदाद्भुवि ॥१३७॥

उपानद्ग्राहकाऽभावादिव सा नोत्सुकायते ।
तौ प्रतिस्कन्धिकौ भाराच्चेलतुः सञ्ज्ञितौ तया ॥१३८॥

राजाऽथ चिन्तयामास, नाऽस्या दासीजनोऽस्ति तत् ।
गृह्णाम्येते स्वयं येन, पश्यन्नास्ते न कोऽपि माम् ॥१३९॥

अथ नेमे ग्रहीष्यामि, तदा लास्यति कश्चन ।
अन्यच्च ज्ञापितं न स्यात्, प्रेमाऽस्याः पुरतो निजम् ॥१४०॥

विचिन्त्यैवं नृपस्तस्या, जगृहे ते उपानहौ ।
दधावे तामनुक्षिप्रं, येन स्नेहः किलेदृशः ॥१४१॥

व्यावृत्तवदना सा च, रत्नमाला समीक्ष्य तम् ।
गृहीतोपानहं भूपं, मुमुदेऽन्तर्मनः सुधीः ॥१४२॥

एकेन पाणिना वोढुमशक्नुवन्नुपानहौ ।
एकैकेन किलैकैकां, पाणिनोवाह तां पृथक् ॥१४३॥

तथाऽप्यशक्नुवन् वोढुं, मूर्ध्ना प्रोवाहते उभे ।
स्त्रीवशाः किं न कुर्वन्ति ?, ह्यकृत्यं कृत्यवत् किल ॥१४४॥

आभुग्नकन्धरो भारान्मन्दं मन्दं महीपतिः ।
अगादनुपदं तूर्णं, जातपूर्णाऽनुरागतः ॥१४५॥

सौधद्वारमथोपेतामुत्तरन्तीं सुखाऽऽसनात् ।
रत्नमालामसौ वीक्ष्य, ते मुमोच पदोरधः ॥१४६॥

ससम्भ्रममुवाचैषा, रत्नमाला महीपतिम् ।
भवद्भिः किमिदं चक्रे ?, कर्म दासोचितं हहा !! ॥१४७॥

किं न दास्यो मदीया हि, गत्वाऽऽनेष्यन्नुपानहौ ।
प्रत्यवायो ममैषोऽभूदनौचित्यविधापनात् ॥१४८॥

अनुशोच्येति कृतकं, रत्नमालाऽविशद्गृहे ।
राजाऽनुरागपाशेनाऽऽकृष्टान्तःकरणोऽनु च ॥१४९॥

रत्नमाला प्रविश्याऽथ, तौ सुखाऽऽसनवाहकौ ।
विसृज्य शब्दयामास, स्वं दासीजनमुच्चकैः ॥१५०॥

पूर्वमेव गतोऽन्यत्र, नाऽभूद्दासीजनोऽत्र सः ।
क्वेमा रण्डा गताः सर्वा ?, गृहं त्यक्त्वेति साऽवदत् ॥१५१॥

एतावत्यां निशीथिन्यां, कष्टं कृत्वाऽनुभूय च ।
आगताऽस्मि जिनगृहान्नैवाऽस्ति कोऽपि वेश्मनि ॥१५२॥

नृत्यश्रान्तानि मेऽङ्गानि, कः संवाहयिताऽधुना ? ।
रूक्षत्वात् कठिनौ पादौ, कस्तलहस्तयिष्यति ? ॥१५३॥

इति वदन्ती सा स्नानशालायामगमद्द्रुतम् ।
चकारोपक्रमं स्नाने, यावत्तावन्नृपः स्वयम् ॥१५४॥

आगत्य स्नपयामास, रत्नमालामसौ मुदा ।
अनुरक्तः परित्यक्तव्रीडः किं किं करोति न ? ॥१५५॥

शय्यामन्वागतायाश्च, तस्या रत्नाऽङ्गदः पदौ ।
क्षालयित्वा घृतेनैषोऽभ्याञ्जीत पदाऽन्तिके स्थितः ॥१५६॥

आययौ च क्षणान्निद्रा, तस्या जातेष्टपूरणात् ।
तस्थौ तथैव राजाऽथ, तत्पादौ तलहस्तयन् ॥१५७॥

जागरित्वा ततो भूपं, तथास्थितमुवाच सा ।
धिग् निद्राजगराया मे, प्रमादोऽभूत् कियानयम् ? ॥१५८॥

एकं चाऽनुचितं ह्येतद्यत्पादम्रक्षणं प्रियात् ।
तत्राऽपि निद्राऽभिष्वङ्गो ममाऽभूदपराधकृत् ॥१५९॥

एत विश्राम्यत क्षिप्रं, पल्यङ्केऽत्र प्रसीदत ।
इति धृत्वा स्वहस्तेन, सा तत्र तमसूषुपत् ॥१६०॥

अतिवाह्य निशां स्नेहाद्राजाऽगाद्गेहमात्मनः ।
स्वस्य गर्भं परिज्ञाय, ययौ साऽपि पितुर्गृहम् ॥१६१॥

पित्रे साऽचीकथद्वृत्तं, राजसङ्गमजं निजम् ।
यथोक्ता नृपवाचश्च, पत्रन्यस्ता अदर्शयत् ॥१६२॥

सन्तुष्टः सोऽपि पत्राणि, न्यासीकृत्य मुमोच तु ।
वर्द्धमानं क्रमाद्गर्भं, रत्नमालाऽप्युवाह सा ॥१६३॥

ततश्च स द्वितीयेऽह्नि, तथैव जिनसद्मनि ।
नृपस्तदनुरागेण, ययौ तत्र द्रुतं द्रुतम् ॥१६४॥

नाऽश्रौषीत्तत्र सङ्गीतं, नाऽपश्यत्तत्र तां प्रियाम् ।
किन्तु देवगृहं शून्यं, वीक्ष्याऽभूच्छून्य एव सः ॥१६५॥

वीक्ष्यमाणः क्षणं मार्गं, तस्थौ तत्र कियन्नृपः ।
ज्ञात्वाऽथ ज्यायसीं रात्रिं, राजा तत्सौधमागमत् ॥१६६॥

तथाऽपि पिहितद्वारमारुह्याऽन्तः प्रविश्य च ।
ऐक्षिष्ट परितो लोकं, किन्त्वद्राक्षीन्न किञ्चन ॥१६७॥

यथास्थानमुपेत्याऽथ, रत्नमालां व्यलोकयत् ।
चन्द्रिकामिव दर्शे तां, ददर्श क्वाऽपि तत्र न ॥१६८॥

क्वैषाऽगात्सह दासीभिरननुज्ञाप्य मामपि ।
इति स्नेहात्स तत्रैव, तस्थौ स्थानममत्वतः ॥१६९॥

तथैव चोषसि प्राप्ते, राजाऽगादात्मनो गृहम् ।
उपविश्य सभायां स, नीतिसारमदोऽवदत् ॥१७०॥

मन्त्रिन् ! केनेदमद्वैतं, विदधे जिनमन्दिरम् ? ।
तत्राऽभून्नर्तकी या च, सा ययौ क्व कथं ननु ? ॥१७१॥

मन्त्र्यूचे नाथ ! देवौकः, कारितं त्वत्प्रसादतः ।
स्वपित्रोः श्रेयसे स्वात्मद्रव्यैरेतन्मया खलु ॥१७२॥

या चाऽत्र नर्त्तकी ह्यासीत्सा तु वैदेशिकी प्रभो ! ।
कुतोऽप्यागत्य तत्राऽभून्नर्त्तकी द्रव्यलोभतः ॥१७३॥

ततश्चाऽद्यौष्ट्रिकाः केचिदागत्याऽस्यै किमप्यथ ।
निवेद्य प्रसाद्य तोषात्तामनैषुः पुनः क्वचित् ॥१७४॥

मह्यं किं न त्वया मन्त्रिन् ! विज्ञप्तस्तद्गतिस्तदा ।
इति ब्रुवन्नृपोऽप्याश्वं, प्राहिणोत्तामनुद्रुतम् ॥१७५॥

भ्रमं भ्रमं चतुर्दिक्षु, तेऽप्यागुः सादिनः पुनः ।
तद्वियोगान्नृपोऽङ्गेषु, प्राप तापं मनःक्लमात् ॥१७६॥

विना तामक्षमः स्थातुं, तद्रूपमलिखत्पटे ।
सम्पश्यन् स चित्रपटं, दिवसानत्यवाहयत् ॥१७७॥

इतश्च रत्नमाला सा, समये सुषुवे सुतम् ।
अदाच्च तस्य बालस्य, नाम क्षेमङ्करस्त्विति ॥१७८॥

लाल्यमानो बभूवैष, बालकः क्रमशो महान् ।
नीतिसारस्ततोऽवादीद्रत्नमालां सुतां निजाम् ॥१७९॥

वत्से ! त्वं नृपतेः क्षुद्रादेशं यथोक्तमेव हि ।
अकृथास्तत्सुतं लात्वा, चलेदानीं नृपं प्रति ॥१८०॥

ततः सा मितशृङ्गारा, समारुह्य सुखाऽऽसनम् ।
अङ्के निवेश्य पुत्रं स्वं, प्रतस्थे नृपतिं प्रति ॥१८१॥

नीतिसारोऽपि भूयांसि, तानि पत्राणि सादरम् ।
आरोप्य वाहने निन्ये, राजसंसदि बुद्धिमान् ॥१८२॥

अग्रे भूत्वा ततो भूपं, नीतिसारो व्यजिज्ञपत् ।
नाथ ! त्वत्तनयोऽभ्येतीति दिष्ट्या वर्द्धसेऽधुना ॥१८३॥

कुतः कथं सुतो मेऽभून्मन्त्रिन्निति ससम्भ्रमम् ।
राज्ञोक्ते मन्त्रिराट् तत्राऽनाययत् ससुतां सुताम् ॥१८४॥

अकथयन्नृपायैवं, राजन्नेषा तव प्रिया ।
अयं च ते सुतः सम्यक्, स्मर त्वं नाऽन्यथा ह्यदः ॥१८५॥

चिन्तयन्नपि नाऽस्मार्षीद्रत्नाऽङ्गदनृपोऽथ ताम् ।
रत्नमालां व्यलोकिष्ट, दृशा कूणितया मुहुः ॥१८६॥

नाऽज्ञासीद्रत्नमालां तां, नर्त्तकीत्वे ह्यसम्भवात् ।
अन्यं व्यतिकरं कस्याश्चिदपि नाऽस्मरत् स्त्रियाः ॥१८७॥

उवाच च नृपो मन्त्रिन्न मे स्मरति किञ्चन ।
अजानंश्च कथङ्कारं, स्वीकुर्वे ससुतामिमाम् ॥१८८॥

रत्नमाला तु नीरङ्गीप्रच्छादितवराऽऽनना ।
नाऽतिदूरे स्थिता पुत्रं, दर्शयन्ती पुरोऽभवत् ॥१८९॥

स्वाऽनुरूपं सुतं प्रेक्ष्य, सम्बन्धमस्मरंश्च सः ।
राजा सन्देहमापन्नश्चिन्तासन्तानभागभूत् ॥१९०॥

ततः सन्देहमुच्छेत्तुं, नीतिसारः स मन्त्रिराट् ।
आनाय्य दर्शयामास, तानि पत्राणि भूभुजे ॥१९१॥

राजा ददर्श तेष्वेवं, प्रारभ्य प्रथमं दिनम् ।
प्रश्नोत्तरकथां वार्त्तां, श्लोकं गाथां प्रहेलिकाम् ॥१९२॥

यद्दिनोक्तं यथोक्तं च, साभिज्ञानं तथैव तत् ।
वाचयित्वा ततो राजा, खेदविस्मयमासदत् ॥१९३॥

कथं सा मन्त्रिपुत्रीयं, नर्त्तकीदम्भमीयुषी ।
नवोढत्वे प्रतिज्ञातं, यन्मत्तस्तदचीकरत् ॥१९४॥

सङ्ग्रामेषु द्विषः कष्टात्, खड्गाखड्गियुधा जिताः ।
मया हि सार्वभौमेन, दोर्दर्पोत्सर्पदात्मना ॥१९५॥

अनया तु स्त्रिया बुद्धिसम्पन्नमायया क्षणात् ।
अनायासेन धीमत्या, तावानेष जितोऽस्मि धिक् ॥१९६॥

अथवा विषयी को हि, कामिनीभिर्जितो नहि ।
यतस्ताः शस्त्रसर्वस्वं, विजिगीषोर्मनोभुवः ॥१९७॥

एताभिर्विजितः पूर्वं, मिथ्यावाग्भिर्नरस्ततः ।
अन्यैः कुव्यसनैः सौख्यात्, स्त्रीरतो जीयते खलु ॥१९८॥

न मातुर्न पितुर्नैव भ्रातुर्न स्वजनस्य च ।
न गुरूणां करोत्याज्ञां, नरः स्त्रीव्यसनेरितः ॥१९९॥

अपि तु कृत्रिमप्रेमपूर्णचूर्णवशीकृतः ।
स्त्रीणामाज्ञां वहत्येष, स्त्रीजितः शिरसा स्वयम् ॥२००॥

वेत्ति कृत्यमकृत्यं वा, नहि स्त्रीवशगो नरः ।
पराभूतिं परन्त्वेति, जनादसदृशादपि ॥२०१॥

तस्य धर्मरतिर्नेष्टा, कुलाचारेऽप्यनादरः ।
तस्य लज्जाभये न स्तः स्त्रीवशो यो हि मानवः ॥२०२॥

विप्रतार्य नरं प्रेम्णा, स्वदासं कुर्वते स्त्रियः ।
तदाज्ञां कुरुते सोऽपि, स्वाऽपराधभयादिव ॥२०३॥

अन्यत्र मानमिच्छन्ति, गुरुभ्योऽपि नराः परम् ।
योषिद्भ्यस्तु सहन्त्येते, दुर्वचोघातलाघवम् ॥२०४॥

या मायामन्दिरं या च, याचतेऽन्यं रता परे ।
लोहनौरिव संसाराऽम्भोधौ या मज्जयत्यहो ! ॥२०५॥

विरक्तिहेतौ तस्यां हि, सुरागो मे कियानभूत् ।
येनाऽऽत्तस्नेहमोहेन, वाहितस्तदुपानहौ ॥२०६॥

तदलं मेऽनया येन, पराभूतोऽस्म्यहं यया ।
अथवैषैव मे हेतुर्भवं प्रति विरक्तये ॥२०७॥

यद्यहं स्नेहललितो नाऽस्यां स्यां न पराभवः ।
तदा स्यात्तन्निजे राज्ये, मग्नो यायामधो भुवि ॥२०८॥

इत्यालोच्य दृढं राजा, स्वमनोमन्त्रिणा सह ।
रत्नमालासुतायाऽदाद्राज्यमादात् स्वयं व्रतम् ॥२०९॥

इति रत्नमालाकथा समाप्ता ॥

दुष्यन्त-शकुन्तलाकथा

इतीत्थं कुब्जिके ! राजा, यथाऽयं रत्नमालया ।
वशीकृत्योपानहौ स्वे, वाहितः प्रेममोहितः ॥१॥

तथाऽन्याऽपि सुबुद्धिः स्त्री, प्रेम्णा वा स्त्रीगुणेन वा ।
विनयेन वशं नीत्वा, छन्देन नर्त्तयेत्प्रियम् ॥२॥

एषा तु नौ सखी मुग्धा, क्लीबा वक्तुमुपप्रियम् ।
लीलयैव पराभूता, कान्तेनाऽस्मृतिमीयुषा ॥३॥

कुब्जिका प्राह किं कार्यं, कामलेखेऽधुना सखि !? ।
एनां प्रियसखीं द्रष्टुं, ताम्यन्तीं येन नोत्सहे ॥४॥

दूरस्थो योऽशृणोदेतल्लक्ष्मीबुद्धिर्नृपोऽथ सः ।
उपेत्य तत्सखीयुग्मं, पप्रच्छ तत्र कारणम् ॥५॥

अत्यर्थं वार्यमाणाऽपि, किमेषा युवयोः सखी ।
विच्छाययति वक्त्राऽब्जं, कवोष्णै रोदनाऽश्रुभिः ॥६॥

कामलेखाऽऽह कोऽन्यस्त्वां, विनाऽन्यदुःखदुःखितः ।
भूयो भूयः स्वयं पृच्छेत्, पराऽऽर्त्तिं सात्त्विकोत्तम ! ॥७॥

प्रच्छकश्चिन्तयत्येवं, यन्मयाऽप्रच्छि चेदयम् ।
तन्ममैव हि कर्त्ताऽसौ, स्वपरित्राणयाचनाम् ॥८॥

इति तुच्छस्वभावत्वात्, परत्राणे गताऽऽदरः ।
परोपकारतो जन्म, करोति सफलं नहि ॥९॥

ततश्चाऽऽख्यायते तुभ्यं, दृश्यसे येन वत्सलः ।
इयं हि नः सखी प्राप्तगर्भा कान्तेन भर्त्सिता ॥१०॥

यदयं हि न मे गर्भो दुःशीले ! दुष्पतिव्रते ! ।
याहि निस्सर मद्गेहादित्येनां निरवासयत् ॥११॥

आययौ च पितुर्वेश्म, रोदनोच्छूनलोचना ।
ज्ञात्वा पित्राऽपि जामातुरुक्तिं निर्वासिता ह्यसौ ॥१२॥

किं करोतु वराकीयं, सुशीलाऽपि प्रियोज्झिता ।
अभीष्टा भर्त्तुरेव स्त्री, गौरवं लभतेऽन्यतः ॥१३॥

नरकेऽपि गतिर्नाऽस्ति, यस्य जीवस्य स स्फुटम् ।
सर्वदुःखनिधौ स्त्रीत्वे, दुष्कर्मभिर्नियोज्यते ॥१४॥

स्वेच्छया वर्तते चेत् स्त्री, दुःशीला सुनयाऽपि सा ।
दीना पराभवं याति, तत्सत्यमबला खलु ॥१५॥

राजाऽऽह च तदत्राऽसौ, कान्तोऽस्या नाऽपराध्यति ।
तस्य विस्मृतिरेतस्यामपराधविधायिका ॥१६॥

तदभिज्ञानपूर्वाभिरुक्तिभिर्मण्डनैरथ ।
तद्विस्मृतिसपत्नीयमुत्पाद्या स्मृतिरेव हि ॥१७॥

स्मृत्वा विज्ञाततत्त्वोऽपि, चेदेनां नाऽभिमन्यते ।
तदाऽस्य दौष्ट्यमेवाऽस्ति, सत्पुमानेव सोऽन्यथा ॥१८॥

हेतोः कुतोऽपि येन स्यात्, कृतस्वार्थस्य विस्मृतिः ।
दुष्यन्तस्येव शापेन, विस्मृता हि शकुन्तला ॥१९॥

कामलेखा ततः प्राह, त्वं दुष्यन्तकथामिमाम् ।
कथय प्रथयाऽत्यर्थं, विनोदं मत्सखीं प्रति ॥२०॥

राजाऽऽह कौतुकं चेद्वः, श्रूयतामवधानतः ।
अस्तीह भारते क्षेत्रे, साकेतं नाम पत्तनम् ॥२१॥

भारतीस्पर्द्धया लक्ष्मीर्यत्र प्रतिगृहं स्थिता ।
यं ब्राह्मी सगुणं चक्रे, श्रीराश्लिष्यति तं खलु ॥२२॥

तत्राऽभूत्प्रतिसामन्तप्रणत्युन्नतविक्रमः ।
दुष्यन्तो नाम भूमीशो वासाऽगारं रिपुश्रियाम् ॥२३॥

चललक्षभिदाऽभ्यासाऽङ्गदार्ढ्यक्षुत्तृषाजये ।
रथाधिरूढो राजाऽसौ, चचाल मृगयां प्रति ॥२४॥

प्रतापेनाऽऽदित्य इव, रथाऽऽरूढो व्रजन्नसौ ।
मृगमेकं ददर्शाऽऽराद्दुष्यन्तस्तापसाऽऽश्रमात् ॥२५॥

तमनु मुक्तवल्गाऽश्वोऽब्धौ नौरिवेष्टवायुना ।
दूरेऽभूद्यत्पुरः पृष्टे, दवयंस्तद्रथो ययौ ॥२६॥

रथनिर्घातमाकर्ण्य, मृगः प्रैक्षिष्ट सम्भ्रमात् ।
तृणानि सोऽर्द्धजग्ध्वानि, त्यक्त्वाऽधावीद्रथाऽग्रतः ॥२७॥

अहं चैतौ रथाऽश्वौ वा, वेगवन्ताविती क्षितुम् ।
प्रतिकार इवेभस्य, दधावे पुरतो मृगः ॥२८॥

एकस्यैव मृगस्याऽस्य, कियत्येषा गतिर्हि नौ ।
इतीव तौ रथहयावन्वेणं द्रुतमीयतुः ॥२९॥

यथा मार्गं पुरो गच्छन्, पादैर्जातेक्षणैरिव ।
ग्रीवाभङ्गाद्रथं पश्यन्, याति भूमौ स खेऽपि च ॥३०॥

स्वदृग्रश्मिवरत्राभ्यां, बद्धाभ्यामेणवर्ष्मणि ।
आकृष्टाविव शीघ्रं तौ, रथाऽश्वौ प्रापतुर्मृगम् ॥३१॥

दुष्यन्तनृपतिर्बाणमाकर्णाऽन्तं प्रपूर्य सः ।
प्राप्तलक्ष्यपदं ह्येणं, प्रति यावद्विमोक्ष्यति ॥३२॥

चलिताः समिदादाने, कण्वशिष्यास्तपस्विनः ।
मा मेति वाचमूचाना, द्राग् मृगस्याऽन्तराऽभवन् ॥३३॥

राजाऽपि तापसान् वीक्ष्य, मृगाऽङ्गरक्षकानिव ।
सञ्जहार त्रपान्यञ्चदास्यो बाणं क्रुधा सह ॥३४॥

लज्जासज्जं स्वयं भूपमूचुस्ते तापसा मृदु ।
महीश ! नाऽयमाचारस्त्वादृशां सुनयस्पृशाम् ॥३५॥

त्वद्भुनुर्दर्प्पकण्डूलदोर्दण्डानां महीभुजाम् ।
शरीराज्जीवमाक्रष्टुं, व्यापारयति सायकान् ॥३६॥

ईदृशे कान्दिशीकेऽस्मिन्नशस्त्रे दीनचक्षुषि ।
आरण्यके मृगे मूलादकृताऽऽगसि मा कुपः ॥३७॥

अयं च क्रीडाहरिणो बालर्षीणामितस्ततः ।
परिभ्राम्यद्विशेषेण, पोषणीयो भवादृशाम् ॥३८॥

चललक्ष्यकृतव्याजोऽप्येतान्मा त्वं वधीर्मृगान् ।
अचलं शिवसौख्यं यद्धिंसा लुम्पति देहिनाम् ॥३९॥

एतदध्यवसायेन, कल्मषं यदुपार्जितम् ।
दृष्ट्वाऽस्मदाश्रमं तस्मै, राजन् ! देहि जलाऽञ्जलिम् ॥४०॥

तपस्यन्त्यृषयो यत्राऽधीयते यत्र चाऽऽगमः ।
तत्र श्रद्धालुरागच्छेद्यथा मुच्येत पाप्मना ॥४१॥

तद्गच्छताऽऽश्रमं यूयं, वयं यामः समित्कृते ।
तुभ्यमाश्रमगुरवे, कर्त्ताऽऽतिथ्यं मुनेः सुता ॥४२॥

इत्यूचिवांसो मुनयः, प्रणतास्तेन भूभुजा ।
प्रययुर्यत्र यातव्यमीक्षमाणा भुवस्तलम् ॥४३॥

राजाऽपि सोऽथ दुष्यन्तो मुक्त्वा रथमुपाश्रमम् ।
समित्रः प्राविशद्वृक्षान्, वीक्ष्यमाणः फलेग्रहीन् ॥४४॥

मुनिकुमारकांस्तल्लात्कुम्भकैराहृताऽम्भसः ।
सम्यक् सपरिकरान् स्पर्द्धाबन्धं सिञ्चतस्तरून् ॥४५॥

सार्धं बालर्षिभिः कीरान्, पठतः क्रीडतोऽपि च ।
मुनीनां पुरतः स्वैरं, विश्वासाल्लालतो मृगान् ॥४६॥

मुन्याश्रममिति प्रेक्ष्य, हर्षाऽश्रुधौतकल्मषः ।
द्राक्षाकुञ्जे प्रविश्याऽथ, विशश्राम महीपतिः ॥४७॥

श्रुत्वाऽथ दक्षिणेनैष, मिथः संलपनं स्त्रियोः ।
किमेते वक्ष्यतोऽत्रेति, सावधानोऽभवत्क्षणम् ॥४८॥

ततः प्रियंवदा प्राह, किञ्चिद्वेत्सि प्रियङ्करि !? ।
साह किं तत् ? परा प्रोचे, न चेज्जानासि तच्छृणु ॥४९॥

गते कुलपतौ कण्वे, प्रभासक्षेत्रमात्मना ।
वरः कोऽपि कुलीनो मे, पुत्र्यै सम्पद्यतामिति ॥५०॥

तपःशक्त्या जगत्सर्वमन्यथाकर्त्तुमीश्वरः ।
आतिथेयीं जिघृक्षुः स, दुर्वासा वनमाययौ ॥५१॥

आगत्य स स्थितः कण्ववेश्मनः प्राङ्गणे क्षणम् ।
आतिथ्येऽधिकृता पित्रा, नाऽपश्यत्तं शकुन्तला ॥५२॥

क्षणं स्थित्वा स दुर्वासा, न दृष्टोऽस्म्यनयाऽप्यहम् ।
शपाम्येनां दुरात्मानमवलेपदुराशयाम् ॥५३॥

प्रभावस्तपसो मेऽस्ति, चेत्तत्स्वरूपगर्विते ! ।
प्रेम्णा स्वीकृत्य पूर्वं त्वां, विस्मृत्य त्यजतु प्रियः ॥५४॥

इत्युक्त्वा व्याघुटन् सोऽथ, शुश्रुवे ददृशे मया ।
धावित्वा चाऽहमेतस्य, पादयोः पतिताऽवदम् ॥५५॥

व्यग्रा व्यापारभारेण, नाऽद्राक्षीत्त्वामियं मुने ! ।
नाऽवज्ञया न गर्वेणेत्यर्थे त्वच्छपथो मम ॥५६॥

तत्प्रसीद पुनर्देहि, तपस्विन्यै ह्यनुग्रहम् ।
दृष्टः कोपः प्रभूणां हि, प्रणामाऽन्तः परं न यत् ॥५७॥

इति मृदूक्तिभिः प्रोक्तः, शान्तीभूय मुनिः स हि ।
ददावनुग्रहं शापनिवर्त्तनाय शक्तितः ॥५८॥

पतिप्रदत्ताऽभिज्ञानाऽङ्गुलीयकस्य दर्शनात् ।
स्मरिष्यति पतिर्भूयः, कार्यो नैवाऽत्र संशयः ॥५९॥

आतिथेय्या प्रसाद्याऽसौ, द्राक् शकुन्तलया नतः ।
ततोऽदादाशिषं तस्यै, तनयोत्पत्तिलग्निकाम् ॥६०॥

ततः प्रियङ्करी प्राह, नैतद्युक्तं तपस्यताम् ।
यदज्ञानप्रमुग्धानां, शापदानं निरागसाम् ॥६१॥

शापे चाऽनुग्रहे चैव, सम्भाव्यते तपःक्षयः ।
तपःक्षये व्रती न स्यात्को नमस्येद्व्रतिब्रुवम् ? ॥६२॥

कृताऽपराधेऽपि जने, क्षान्तिः शस्या तपस्विनाम् ।
व्रतजीवितमेषां यत्तल्लोपे लोपितं व्रतम् ॥६३॥

विना क्षान्तिं न प्रमाणं, ज्ञानध्यानतपांस्यपि ।
विनाऽप्येतैः क्षमा ह्येका, वेत्रिणी तत्त्वदर्शने ॥६४॥

प्रभुत्वं सम्पदा सार्धमारोग्यं सौस्थ्यलीलया ।
गार्हस्थ्यं पुत्रसन्तत्या, ह्यैहिकं तपसः फलम् ॥६५॥

धातुसंशोषणादन्तःकरणेन्द्रिययन्त्रणात् ।
दृष्ट्वाऽऽत्मानं शिवं गच्छेदामुष्मिकं तपःफलम् ॥६६॥

आमुष्मिकं परित्यज्य, स मुनिस्तपसः फलम् ।
शापाऽनुग्रहतोषेषु, मुधा व्ययति सत्तपः ॥६७॥

इत्युक्त्वा तत्सखीद्वन्द्वं, जगामेतस्ततो भ्रमत् ।
राजा च तत्र सुष्वाप, स्फाटिकाऽश्मशिलातले ॥६८॥

अथ शकुन्तलां ताभ्यां, सखीभ्यां सह जग्मुषीम् ।
दूरतस्तरुसेकाय, महीनाथो ददर्श ताम् ॥६९॥

जाताऽनुरागस्तस्यां च, चिन्तयामास भूपतिः ।
अहो ! चित्रं मनो मेऽस्यां, तपस्विन्यां किमुत्सुकम् ? ॥७०॥

अथवा यन्मनो मेऽस्यां, समभूदभिलाषुकम् ।
तदियं खलु योग्या स्यात्, क्षत्रियाणां परिग्रहे ॥७१॥

दृश्यतेऽस्याश्च वेषोऽयं, तपस्विजनतोचितः ।
लिङ्गिन्यां च सतां नेष्टा, प्रवृत्तिर्वचसामिति ॥७२॥

इति चिन्तयति क्ष्मापे, सिञ्चन्ती परितस्तरून् ।
साऽऽगादुपनृपस्थानलतावृक्षान् सखीयुता ॥७३॥

अथैकस्मिन् लतामूले, पयस्कुम्भो व्यलोट्यत ।
तन्निर्घातलताकम्पाद्भृङ्गो द्रागुदडीयत ॥७४॥

इतस्ततः परिभ्राम्यन्नलिरेष कृतभ्रमः ।
दृशोः पद्मधिया हास्याद्दत्तकुन्दधियाऽधरे ॥७५॥

पाणिना ताड्यमानोऽपि, समुत्थायाऽविशत् पुनः ।
भृङ्गः शकुन्तलाऽङ्गानि प्रेयानिव मुदाऽस्पृशत् ॥७६॥

प्रशशंस नृपो भृङ्गं, शकुन्तलाऽङ्गसङ्गमात् ।
तत्त्वाऽऽलोचनमूढं स्वं, निनिन्द मदनाऽऽतुरः ॥७७॥

ततः शकुन्तला मौग्ध्याल्लताकुञ्जे प्रविश्य सा ।
दृष्ट्वा भूपं साऽनुरागा, वक्रदृग्भ्यां व्यलोकत ॥७८॥

पुनर्निवृत्य साऽऽचख्यौ, सखीभ्यां जातवेपथुः ।
सख्यौ तत्रैत्य दृष्ट्वा तावेतौ जहसतुर्मिथः ॥७९॥

राजा च तत्कटाक्षेण, प्रहतः प्राणहारिणा ।
दुस्सहं दाहमासाद्य, सद्यो हृद्यमथाऽपठत् ॥८०॥

दृशा दाहाऽऽम्नायं नियतमनुभूय स्वयमसौ,
गिरीशोपाध्यायाऽऽदिषु निवहमाद्यं परिहरन् ।
सुमध्यामध्याऽस्य श्रमभुवमिवाऽनङ्गसुभटः,
कटाक्षाऽऽग्नेयाऽस्त्राण्यभिकिरति यूनश्च दहति ॥८१॥

एषा तपस्विपुत्रीति, सन्देहेन मनोऽत्र मे ।
विकारीति च नैश्चित्यान्नृपोऽर्द्धवैशसं ययौ ॥८२॥

मित्रेण तत्सखीं राजाऽप्यपृच्छदेतदन्वयम् ।
चख्यौ प्रियंवदा राज्ञो वयस्याय यथातथम् ॥८३॥

विश्वामित्रमुनिः पूर्वं, तपस्यन् दुष्करं तपः ।
ददृशे क्वाऽपि शक्रेण, विस्मयाऽऽपन्नचेतसा ॥८४॥

अचिन्तयच्च स हरिर्यत्स्वेन तपसाऽन्वयम् ।
मामुत्थाप्य बलात् स्वर्गसाम्राज्यं स ग्रहीष्यति ॥८५॥

परिपूर्णं तपस्तादृग्, यावदेष करोति न ।
तावत्सोपक्रमं कञ्चित्तपोविघ्ने दधाम्यहम् ॥८६॥

अमोघं कामबाणं हि, कामिन्यो देहिनं प्रति ।
ता एव तन्मनःक्षोभसंरम्भायाऽऽदिशाम्यहम् ॥८७॥

आसन्नामूचिवानिन्द्रः, सम्भावनेन मेनकाम् ।
विश्वामित्रमुनेः क्षोभमाधातुं त्वमसि क्षमा ॥८८॥

मेनका त्वाह साऽवज्ञं, कियदेतन्मम प्रभो !? ।
मम कटाक्षविक्षेपैः, स्मराऽऽर्त्तः को भवेन्नहि ? ॥८९॥

क्षोभप्रतिभुवं रूपमादायाऽहमिहैव हि ।
तत्तपोग्रन्थिमुद्ग्रथ्य, लयसर्वस्वमाहरेः ॥९०॥

इत्युक्त्वा सा ततः स्वर्गादुत्ततार भुवस्तले ।
यत्राऽऽस्ते स मुनिस्तत्र, गत्वाऽऽधात्क्षोभडम्बरम् ॥९१॥

प्रवेश्य वचनं तत्त्वघातकं मुनिकर्णयोः ।
वशीकृत्य मनोऽक्षाणि, यन्त्रणादुदमोचयत् ॥९२॥

तानि चोच्छृङ्खलीभावं, कालदासाद्य दुर्ग्रहात् ।
स्वस्वग्राह्यरसाऽऽस्वादाऽर्पणोत्सुक्यमुपाययुः ॥९३॥

दृशाऽदर्श्यत तद्रूपं, कर्णेनश्राव्यताऽथ गीः ।
घ्राणेनाऽऽर्घ्यत सौरभ्यं, विश्वामित्राऽऽत्मनो मुहुः ॥९४॥

तद्रूपाऽऽदिप्रहृष्टस्तदात्मा त्यक्त्वाऽऽत्मवीक्षणम् ।
लौल्यात्तां प्रति वक्रोक्तिं, वक्तुं जिह्वामथाऽऽदिशत् ॥९५॥

अमृतश्राविणी वाणी, मुनेरेतां हि मेनकाम् ।
सन्तोष्य स्पर्शनाऽक्षस्य, चक्रे सौख्यं रतात्किल ॥९६॥

यथाप्रतिज्ञाते पूर्णे, क्रमाद्गर्भं हि मेनका ।
बभार सुषुवे चाऽथ, सुखादेनां शकुन्तलाम् ॥९७॥

जातमात्रामिमां त्यक्त्वा, स्वर्ययौ सा च मेनका ।
कण्वेन मुनिना प्राप्ता, पुत्री चेयं व्यवर्द्धयत ॥९८॥

तदेषा मानिता पुत्री, मुनेरस्याऽतिवल्लभा ।
तिर्यञ्चोऽपि मुनीनां यत्, संरक्ष्याः किं पुनः स्त्रियः ? ॥९९॥

इत्युक्त्वा विरता साऽथ, राजा ज्ञात्वा तदन्वयम् ।
निश्चित्योपयन्तुं योग्यां, शकुन्तलां व्यलोकयत् ॥१००॥

मिथः सम्मिलनाद्दृष्ट्योर्मनसी मिलिते तयोः ।
तज्जप्रेमद्विजेनाऽथ, तत्पाणी मिलितौ मिथः ॥१०१॥

प्रेमरम्यं नृपः स्थित्वा, कियत् तत्रैव भीतिमान् ।
सम्भाव्याऽऽयातसैन्यस्योपद्रुतिं ध्रुवमाश्रमे ॥१०२॥

यामः स्वपुरं यद्भूयान्, कालोऽभूदागतस्य मे ।
इत्युक्ते भूभुजा प्राह, सास्रं साऽपि शकुन्तला ॥१०३॥

कुतोऽप्यागत्य गान्धर्वविवाहादुपगम्य च ।
चलिता मां परित्यज्य, यूयं तत्किमिदं वचः ? ॥१०४॥

ज्ञास्यन्ति मुनयश्चेन्मां, दैवादापन्नस[ा]त्त्विकाम् ।
तेभ्यस्तन्मयिका किं स्याद्वाच्यमुत्तरमादिश ? ॥१०५॥

राजाऽऽह सुभ्रु ! मा भैषीर्दुष्यन्तं मां विदन्त्यमी ।
मुनयस्तदमीभ्यस्त्वं, नामाऽऽख्यायाः, स्फुटोक्तिभिः ॥१०६॥

अन्यच्च मुद्रिकामेनां, मामकीनां गृहाण यत् ।
अभिज्ञानं भवेदेषा, दैवाद्विस्मरणस्मृतौ ॥१०७॥

उक्त्वेति प्रेमसारं तामनुकूल्य शकुन्तलाम् ।
समर्प्य मुद्रिकां राजा, ससैन्योऽपि पुरं ययौ ॥१०८॥

इतश्च सोऽपि कण्वर्षिः, प्रभासादागतो गृहान् ।
सख्या शकुन्तलाकान्तः, कर्णे विज्ञप्यतोचितः ॥१०९॥

अभ्यनन्ददसौ हर्षप्रकर्षाद्धूतमस्तकः ।
यदभूत्पाणिगृहीती, दुष्यन्तस्य शकुन्तला ॥११०॥

गृहीत्वा वक्षसा स्नेहात्, कण्वर्षिस्तां शकुन्तलाम् ।
वत्से ! पुत्रवती भूया, इत्याशिषमदान्मुदा ॥१११॥

मुन्याशिषैव तद्गर्भो निर्विघ्नं ववृधे क्रमात् ।
तापस्यो नित्यशो गर्भरक्षायत्नं व्यधुः स्वयम् ॥११२॥

दिनानां कियतामन्ते, पर्यालोच्यर्षिभिः सह ।
दत्त्वाऽऽशिषं तथा शिक्षां, कुलस्त्रीविहितां मुनिः ॥११३॥

मनःसन्तोषजननीं, जननीमिव तापसीम् ।
समर्प्य दुष्यन्तगृहे, शकुन्तलां व्यसर्जयत् ॥११४॥

दत्ताऽऽशिषं मुहुः कण्वमुनिं ससर्वतापसम् ।
साऽश्रुः प्रणम्य स्नेहात् साऽऽश्लिष्य दूरान्यवर्तयत् ॥११५॥

वर्द्धयित्रीं ततो वृद्धां, तापसीं तापसीयुताम् ।
मातृस्नेहात् प्रणम्यैषा, गृह्णाति स्म तदाशिषम् ॥११६॥

आलिङ्ग्य च सखीवर्गमश्रुनिर्मग्नतारका ।
चिरैकस्थानाऽपराधं, क्षमयित्वा न्यवर्तयत् ॥११७॥

वीक्ष्यमाणा मुहुः पश्चात्, स्वस्थानं ममतावशात् ।
सिञ्चन्ती साऽश्रुभिर्मार्गं, चचालाऽथ शकुन्तला ॥११८॥

तापस्या मुनिभिर्द्विजैर्यान्ती तद्भर्तृपत्तनम् ।
ददर्श दक्षिणेनैषा, स्वच्छाम्बुविपुलं सरः ॥११९॥

मार्गसञ्चलनात् खिन्नसर्वाऽङ्गी जलवाञ्छया ।
सापत्न्यं स्वाऽऽस्यलक्ष्म्याऽब्जश्रियः कर्तुं ययौ सरः ॥१२०॥

पादप्रक्षालनव्याजाद्ददती सा जलाऽञ्जलिम् ।
तच्छ्रमाय ततो भूत्वा, शुचिः किञ्चित्पयः पपौ ॥१२१॥

पादौ प्रक्षालयन्त्याश्च, तस्यास्तदङ्गुलीयकम् ।
श्लथत्वादङ्गुलेः पार्श्वात्, पपाताऽन्तर्जलं क्वचित् ॥१२२॥

शकुन्तला त्वनभ्यासान्नाऽज्ञासीत्पतदम्बुनि ।
तत्किन्त्वस्मारयित्वाऽपि, चचाल पुरतोऽध्वनि ॥१२३॥

प्राप्ता च क्रमशः सैषा, स्वभर्त्तुर्नगराद्बहिः ।
विश्रम्याऽत्र क्षणं तन्वी, तत्पुरं प्रविवेश च ॥१२४॥

आगत्याऽभिमुखीवाऽथ, किं वाच्यः पतिरित्यसौ ।
लज्जास्नेहादिवाऽऽश्लिष्यत्प्रविशन्तीं शकुन्तलाम् ॥१२५॥

तापसाश्च पुरो भूत्वा, फलहस्ता महीपतिम् ।
ददृशुः स्वर्गतः शक्रमवतीर्णमिवाऽवनौ ॥१२६॥

आसन्नीभूय राज्ञे ते, फलोपायनमार्पयन् ।
उर्ध्वीकृत्य भुजं सव्यं, सम्भूयैवाऽऽशिषं ददुः ॥१२७॥

अचीकथंश्च कण्वर्षेराशिषं शुभकारिणीम् ।
राजन् ! वाचिकमप्यस्ति, गुरोस्त्वयीति तेऽवदन् ॥१२८॥

किमादिशन्ति गुरवोऽनुग्रहाय ममाऽधुना ।
एषोऽस्मि साधुशुश्रूषुस्तद्ब्रूत गुरुवाचिकम् ॥१२९॥

ततः प्राह तपस्व्येकस्त्वया ह्याश्रममीयुषा ।
गान्धर्वेण विवाहेन, परिणीता शकुन्तला ॥१३०॥

अन्तर्वत्नी बभूवैषा, ततः कण्वर्षिणाऽधुना ।
प्रेषिताऽस्ति गृहद्वारे, गृहाणैनां स्वगेहिनीम् ॥१३१॥

तत्र प्रसूयमानायास्तस्याः स्याद्विघ्नसम्भवः ।
पुण्यवद्गर्भधारिण्यः, स्त्रियो रक्ष्या हि यत्नतः ॥१३२॥

विस्मयाऽऽतङ्कसम्फुल्लपक्ष्मव्याप्तविलोचनः ।
औत्सुक्यात्प्राह भूपालः, का सा ननु शकुन्तला ? ॥१३३॥

न कदाऽपि मया काचित्, परिणीता मुनेः सुता ।
कतरा गर्भवार्ता तु, यत्तस्या दर्शनं न मे ॥१३४॥

अविचार्यैव युष्माभिरादिष्टमेतदीदृशम् ।
क्वाऽऽश्रमे सा मुनेः पुत्री, क्वाऽभ्यमित्र्यस्त्वहं सदा ॥१३५॥

मुनिराह सदा राजन् !, व्यापारव्याकुलोऽसि यत् ।
स्मरति तत् कियत्तेऽत्र, मा त्वेनां नृप ! विस्मर ॥१३६॥

शरणं यत्त्वमेवाऽस्या, नाऽन्यः स्थानमतः परम् ।
त्वत्तः सञ्जातगर्भाया, निवासः कोऽस्मदाश्रमे ? ॥१३७॥

मुने ! वेत्सि कथं गर्भो ममाऽयमिति भूभुजा ।
प्रोक्ते स तापसः क्रुद्धः, प्रोचे वदति गर्भिणी ॥१३८॥

स्मारं स्मारं स्वयं राजन् !, नाऽऽदत्स्व मुनिपुत्रिकाम् ।
मान्यस्त्रीवद्विडम्ब्यैनामपि त्यक्तुं मतिं कृथाः ॥१३९॥

सदा स्त्रीव्यसनाऽन्धानां, मतिः स्मृतिपराङ्मुखी ।
परं त्वमसि विज्ञानामग्रणीर्नीतिकारकः ॥१४०॥

अवश्यं नैव कर्त्ताऽस्मि, कदाऽप्येतस्य कर्मणः ।
इति निश्चित्य चित्तेन, साऽवष्टम्भं नृपोऽवदत् ॥१४१॥

ऋषे ! सम्यग्न विज्ञाय, समायातोऽसि मत्पुरे ।
सोऽन्यः कोऽपि गवेष्यस्ते, यः स्वीकृत्य स्त्रियं त्यजेत् ॥१४२॥

न दृष्टा नाऽपि च प्रोक्ता, न सङ्गेन विडम्बिता ।
इत्यर्थे निश्चयं मत्वा, भूयो याहि त्वमाश्रमम् ॥१४३॥

मुनिः प्राह क्रुधा ताम्रस्त्वां विद्मो वयमुत्तमम् ।
वर्णाश्रमगुरुं वर्णसङ्करोपप्लवाऽपहम् ॥१४४॥

न जानीमः स्वयं नित्यस्त्रीव्यसनादुराशयम् ।
अविचारज्ञमासक्तमन्याये विरतं नयात् ॥१४५॥

अत एव तवाऽन्यायात्, प्रारम्भा व्यवसायिनाम् ।
वृक्षा बाह्याऽऽश्रमाणां च, न फलन्ति यथा पुरा ॥१४६॥

आस्तामन्यत्किलाऽन्यायस्थानं किं स्यादिदं क्वचित् ? ।
कुलीनानां प्रशान्तानां, स्त्रीणां स्वीकारनिह्नवः ॥१४७॥

मा त्वं वृथा कृथाः कोपमस्मासु सत्यवादिषु ।
न सोढारो वयं कोपमपवादप्रदस्य ते ॥१४८॥

इत्युक्ते भूभुजा क्रुद्धः, तापसः प्राह साहसात् ।
अरे ! दुष्यन्त ! वेत्सि त्वमपवादं किलाऽधुना ? ॥१४९॥

न तदा ज्ञातवान् किं त्वं, कुलस्त्रीग्रहमीदृशम् ? ।
पूर्वं या स्वीकृता स्नेहात्, सा हठात् स्वीकरिष्यते ॥१५०॥

धर्माऽधिकरणाऽमात्याः, प्रोचुराचारकोविदाः ।
राजन् ! मा सहसैवैनां, मुनिपुत्रीं निराकृथाः ॥१५१॥

भवेत्सा विस्मृता कालादानाय्याऽत्रोपलक्षय ।
पृच्छाऽभिज्ञानमप्येनां, विवाहस्मारकं किल ॥१५२॥

ओमित्युक्ते नृपेणाऽथ, मुनिरेनामजूहवत् ।
सार्धं वृद्धतपस्विन्या, प्रविवेश शकुन्तला ॥१५३॥

नीरङ्गीच्छन्नवक्त्राऽग्रां, लज्जाऽऽच्छादितवक्तृताम् ।
समीक्ष्य विस्मृतिग्रस्तो राजा तां द्राग् निराकरोत् ॥१५४॥

शकुन्तला ततो दध्यौ, का गतिर्मेऽधुना हहा !!? ।
रहस्यूढाऽस्मि येनाऽहमुक्तिस्तस्येयमीदृशी ॥१५५॥

न मामन्यायिनीं मत्वा, नेष्यन्ति मुनयो गृहान् ।
नाऽस्ति मे स्थानमन्यत्र, किं करोमि ? क्व यामि च ? ॥१५६॥

राजा पर्षदि चैतस्यां, नैवाऽहं वक्तुमुत्सहे ।
न विना वचनान्मन्ये, प्रत्येष्यति महीपतिः ॥१५७॥

इति चिन्तयन्त्यां तस्यामूचुस्ते मन्त्रिणस्ततः ।
शुभे ! किमस्त्यभिज्ञानं, सम्बन्धप्रत्ययाय नः? ॥१५८॥

शकुन्तलाऽऽह राजैव, प्रत्ययः किं परेण मे ? ।
किं न जानाति भूपोऽयं ?, योऽधुना वक्त्यनीदृशम् ॥१५९॥

राजाऽऽह मुग्धे ! नैवाऽऽहमद्राक्षं त्वां कदाऽपि हि ।
सम्बन्धसन्धिबन्धाय, ततो मत्प्रत्ययः कथम् ? ॥१६०॥

तापसः प्राह मुग्धोऽयमारण्यकाऽङ्गनाजनः ।
सतीत्वादृजुभावाच्च, नाऽनृतं वक्ति भूपते ! ॥१६१॥

राजाऽऽह न मुने ! वेत्सि, स्त्रीणां चरितमद्भुतम् ।
मायाकौटिल्यपाण्डित्यात्, तत्किं यत् कुर्वते न ताः ? ॥१६२॥

सत्यं वेत्स्यनुभूतत्वात्, स्त्रीवृत्तं किं तु तन्मयि ।
चेद्भवेन्नृप ! नेदृक् स्यादुक्तिप्रत्युक्तिविप्लवः ॥१६३॥

इत्युक्त्वा सा रुरोदोच्चै, रोदयन्ती सतां मनः ।
तथाऽप्यकरुणो राजा, नाऽस्मार्षीन्नाऽभ्यमन्यत ॥१६४॥

धर्माऽधिकारिणः प्रोचुर्मुग्धे ! किं रुदितेन ते ? ।
कथय त्वमभिज्ञानं, येन प्रत्येति भूपतिः ॥१६५॥

शकुन्तलाऽऽह वीक्ष्येऽहं, सत्यमस्य महीपतेः ।
अभिज्ञानाऽक्षरपत्रैर्मन्तव्यमिति सर्वगम् ॥१६६॥

सविमर्शं नृपो दध्यौ, साऽवष्टम्भं वदत्यसौ ।
अभिज्ञानाऽर्पणादेव, स्वीकृता किमियं भवेत् ? ॥१६७॥

अस्तु पश्याम्यभिज्ञानं, विवादघ्नं स्फुटस्मृति ।
इति स्वेनैव राजा तामभिज्ञानमवादयत् ॥१६८॥

तापसेन ततः प्रोक्ता, नीतिमाह महीपतिः ।
पुत्रि ! पूरय सङ्केतमिति साऽथ शकुन्तला ॥१६९॥

किलाऽङ्गुलीयकं राज्ञस्तथैवाऽस्ति ममाऽङ्गुलौ ।
इति स्मृत्वा नृपं वीक्ष्याऽदर्शयत् साऽङ्गुलीं निजाम् ॥१७०॥

किमिदं दर्शयत्येषेत्यादरात् सर्वसंसदि ।
पश्यन्त्यां सा स्वयं शून्यां, ततोऽद्राक्षीन्निजाऽङ्गुलीम् ॥१७१॥

हताऽहं मातरेवं हा !, क्व ययौ मेऽङ्गुलीयकम् ? ।
इति प्रलपन्ती साऽथ, प्रैक्षिष्टेतस्ततो भुवम् ॥१७२॥

अपजह्रेऽथ केनाऽपि, पतितं वा स्वयं भुवि ।
न वेद्मि क्व गतं राज्ञा, स्वेनाऽर्पिताऽङ्गुलीयकम् ॥१७३॥

सत्यवच्च नृपः प्रोचे, मुने ! पश्यत सत्यताम् ।
अरण्यवासमुग्धानां, तापसीनां व्रतस्पृशाम् ॥१७४॥

अहो ! धाष्ट्र्यमहो ! धाष्ट्र्यमेतस्या आश्रमौकसः ।
असत्यमपि या सत्यीकृत्य प्रलपति स्फुटम् ॥१७५॥

मायय्यैव भवन्तोऽपि, पाखण्डिव्रतधारिणः ।
एनां मायाविनीं कृत्वा, विश्वं विप्लावयन्ति ये ॥१७६॥

तापसः प्राह संरुद्धक्रोधबन्धोऽपराधतः ।
राजन् ! नहि वयं विद्मश्चेष्टितं योषितामिदम् ॥१७७॥

किन्त्वहं गुरुणाऽभ्यर्थ्य, प्रेषितोऽर्पयितुं तव ।
गृहाण त्यज वाऽप्येनां, त्वमीशोऽस्या ह्यतः परम् ॥१७८॥

इत्युक्त्वा स मुनिस्तूर्णं, चचाल स्वाऽऽश्रमं प्रति ।
शकुन्तलां ततः पृष्ठमन्वायान्तीं क्रुधाऽवदत् ॥१७९॥

हते ! दुरात्मके ! दुष्टे !, पापिष्ठे ! कुलपांसने ! ।
दुःशीले ! मानुमामागाः, श्रयस्व पतिमात्मनः ॥१८०॥

स्थित्वा दिनानि तावन्ति, वयं कलङ्कितास्त्वया ।
अधुनैत्य विधाताऽसि, कलङ्कस्याऽपि चूलिकाम् ॥१८१॥

इत्युदीर्य मुनिस्तूर्णं, त्यक्त्वा तां मन्दगामिनीम् ।
आश्रमप्राऽङ्गलं मार्गमाश्रियत् सपरिच्छदः ॥१८२॥

गते मुनौ नृपस्याऽग्रे, तस्थुषी सा शकुन्तला ।
दुष्यन्तेन निषिद्धाऽथ, रुदती भुवमाह च ॥१८३॥

पृथ्वि ! दुरात्मना पत्या, त्यक्ता मुक्ताऽत्र चर्षिभिः ।
नाऽन्यो मे शरणं तत्त्वं, द्विधा भव विशामि यत् ॥१८४॥

इति तस्यां वदन्त्यां च, द्विधा जाता पुरो मही ।
ज्योतिषा केनचित्तूर्णं, क्वाऽपि नीता शकुन्तला ॥१८५॥

अहो ! आश्चर्यमाश्चर्यमिति वाचि सभाजने ।
ययावुत्थाय राजाऽथाऽन्यत्र सञ्जातविस्मयः ॥१८६॥

अन्यदा धीवरः कोऽपि, राज्ञस्तदङ्गुलीयकम् ।
विक्रेतुं स्वर्णवणिजां, दर्शयामास दूरतः ॥१८७॥

स्वेनोत्थाय वणिक् तस्य, हस्तादादाय तत्तदा ।
वीक्ष्यमाणोऽक्षराण्यत्र, दुष्यन्तस्येत्यवेक्ष्यत ॥१८८॥

राज्ञोऽङ्गुलीयकं ह्येतदिति व्याघुट्य सोऽर्पयन् ।
ददृशे नगराऽध्यक्षैः, किमेतदिति वादिभिः ॥१८९॥

पुराऽध्यक्षा वणिग्घस्तात्तदादायोपलक्ष्य च ।
महीशमुद्रिकाचौरस्त्वमित्येनमबन्धयन् ॥१९०॥

क्षिप्त्वा चतुष्पथे बद्धं, तं राज्ञे ते व्यजिज्ञपन् ।
अमुञ्चंश्च पुरो रत्नरम्यं तदङ्गुलीयकम् ॥१९१॥

दृष्ट्वा तदुपलक्ष्याऽथ, राजाऽस्मार्षीदिदं किल ।
यन्मया मुनिपुत्र्यै हि, सङ्केतायाऽर्पितं पुरा ॥१९२॥

कथं च प्रियाया हस्ताच्च्युत्वा कैवर्तमासदत् ? ।
विनाऽनेन मया नोपलक्षिता हा ! शकुन्तला ॥१९३॥

क्व तानि प्रथमप्रेमचाटुवाक्यानि तां प्रति ? ।
शत्रुं प्रत्यप्यवाच्यानि, क्व चेदानीं वचांसि मे ? ॥१९४॥

मया तदुक्तं येन स्याद्भूयो दर्शनमेव न ।
अत एव वचः शान्तं, वक्तव्यमिति शत्रुषु ॥१९५॥

धिग्मां दुर्जनमज्ञानां, कृतघ्नं निस्त्रपं शठम् ।
स्वीकृत्य चाटुभिः कान्तां, दुर्वाक्यैर्योऽधुनाऽत्यजत् ॥१९६॥

पश्यन्ती मयि तत्प्रेम, मनसिकृत्य मामिह ।
आगताऽपि प्रिया हा ! धिक्, पराभूता मया कियत् ॥१९७॥

मम पराभवेनैषा, प्रविवेश महीतलम् ।
दिव्येन ज्योतिषा तेन, सा भविष्यति रक्षिता ॥१९८॥

ततः कैवर्त्तमाकार्य, दुष्यन्तो दुःखमीयिवान् ।
पप्रच्छ मुद्रिकारत्नशुद्धिं क्वेदं त्वयेक्षितम् ? ॥१९९॥

कम्पमानवपुः प्राह, दासो नाथ ! पुराद्बहिः ।
तडागे जालपतितं, दृष्ट्वैतदानयं त्विह ॥२००॥

तस्येति वचनं श्रुत्वा, सम्यग्विज्ञाय चेतसि ।
नाऽत्राऽपराधोऽस्याऽस्तीति, बन्धादमोचयन्नृपः ॥२०१॥

ततः शकुन्तलासङ्गवियोगादरतिं गतः ।
सर्वत्राऽपीक्षयामास, परं न प्राप तां प्रियाम् ॥२०२॥

कालेन तत्र कण्वर्षेराश्रमे भूपतिर्गतः ।
युद्ध्यमानं मृगेन्द्रेण, द्रक्ष्यति स्वसुतं प्रियम् ॥२०३॥

ज्ञास्यत्येष मदीयोऽयं, सुत ईदृग् पराक्रमः ।
ततो दृष्ट्वा प्रियां तत्र, परमां मुदमेष्यति ॥२०४॥

इति दुष्यन्तराजस्य, विस्मृताऽपि शकुन्तला ।
मुद्राऽभिज्ञानदृष्टान्ताद्भूयोऽभूत् प्रेमभाजनम् ॥२०५॥

तथेयं त्वत्सखी किञ्चित्सङ्केतं वचनं च वा ।
निवेद्य वेद्यचतुरा, पतिं प्रत्याययेन्न किम् ? ॥२०६॥

कुब्जिकाऽऽह महाभाग !, प्राञ्जलेयं सखी हि नौ ।
न वेत्ति वाच्यकर्तव्यज्ञातव्यानि पतिं प्रति ॥२०७॥

इत्यन्तरेऽभ्युदितोऽर्को जगतां पश्यतोहरः ।
अन्धकारपटं व्योम्नो यो जहार करैर्निजैः ॥२०८॥

ततश्च बुद्धिसन्धानस्तस्य भूपस्य मन्त्रिराट् ।
रुदत्याश्च स्त्रियस्तस्याः, पिता सोऽत्र समाययौ ॥२०९॥

मदीयोऽयं महामन्त्री, बुद्धिसन्धान इत्यसौ ।
राजा तमुपलक्ष्येति, दूरीभूय ययौ गृहान् ॥२१०॥

अचिन्तयच्च यन्मन्त्री, समागात्तत्र कानने ।
तन्मन्ये रुदती स्त्रीयं, तत्पुत्री स्यात्सखीवृता ॥२११॥

या मया परिणीताऽऽसीत्, सैवैषा न परा भवेत् ।
गर्भसन्देहकष्टेन, मया निर्वासिता गृहात् ॥२१२॥

तत्किमेषा बहिर्मर्त्तुमुपागात्तत्पिता पुनः ।
प्रतिपाद्य गृहं नेता, स्वां पुत्रीं गुर्विणीमपि ॥२१३॥

अन्यदीयो मदीयो वा, तस्या गर्भोऽभवत् किल ।
तदेतज्ज्ञायते सम्यग्, न विना ज्ञानिना खलु ॥२१४॥

इति चिन्तयन्तं क्ष्मापमासीनं संसदि स्वयम् ।
आगत्योद्यानपालस्तु, बद्धाऽञ्जलिर्व्यजिज्ञपत् ॥२१५॥

राजन् ! ब्रह्माण्डभाण्डाऽन्तर्वर्त्तिवस्तुनिवेदनात् ।
आराध्यः कानने कश्चिदेको ज्ञानी समाययौ ॥२१६॥

राजाऽथ गर्भसन्देहविच्छेदायाऽऽशु जग्मिवान् ।
यथाविधि नमस्कृत्य, शुद्धभूमावुपाविशत् ॥२१७॥

चक्रे ज्ञानी च संसारदावानलघनाऽऽवलीम् ।
सद्धर्मदेशनां मोहमातङ्गच्छेदसिंहिकाम् ॥२१८॥

विज्ञायाऽवसरं राजा, सन्देहं मनसि व्यधात् ।
ज्ञानी चाऽऽख्यत् सती राजन् !, मन्त्रिपुत्री तव प्रिया ॥२१९॥

ज्ञानिवाचं निशम्येति, राजा चित्तेऽकरोदिति ।
तां सतीं धिगहं मूढः, पराभूवं निरागसम् ॥२२०॥

अन्यच्चाऽद्याऽपि मग्नोऽस्मि, विषयाऽशुचिकर्दमे ।
सङ्गृह्णामि नवनवां, विष्ठाभस्त्रां नितम्बिनीम् ॥२२१॥

न पुनर्भवकुक्षेत्रे, बहुजन्माऽऽलवालके ।
पापानां बद्धमूलानां, छेदिनीं शमसम्पदम् ॥२२२॥

इति स्वेनैव वैराग्यसूर्यध्वस्ततमोगुणः ।
लक्ष्मीबुद्धिनृपस्त्यक्त्वा, राज्यं व्रतमुपाददे ॥२२३॥

परीषहचमूधाटीं, सहमानः सुचेतसा ।
मुनिः सोऽपालयत्सम्यग्, दीक्षां शुद्धां जिनेशितुः ॥२२४॥

स मृत्वा चाऽऽयुषः प्रान्ते, देवोऽभूदच्युते ततः ।
सम्पूर्णाऽऽयुस्ततश्च्युत्वा, जातस्त्वमसि भूपते ! ॥२२५॥

त्वया पूर्वभवे दानं, सम्यग् श्रद्धानपूर्वकम् ।
तपःसंयमपात्रेभ्यो ददे तेनाऽसि राज्यभाक् ॥२२६॥

या च सा भवता साध्वी, भार्या सतीत्वशालिनी ।
जातगर्भा निष्ठुरेण, निर्वासिताऽऽत्मनो गृहात् ॥२२७॥

तस्मात्कर्मपरीणामवशाद्देशाऽन्तरं भवान् ।
एकाकी क्षुत्पिपासाऽऽर्त्तो बभ्राम कर्मसञ्चयात् ॥२२८॥

इत्याकर्ण्य गुरूणां स, वाचमाचान्तकल्मषाम् ।
जग्राहाऽभिग्रहं राजा, गुरुभ्यः पुरतः क्षमी ॥२२९॥

सम्यग् स्वरूपमज्ञात्वा, न मया कमपि प्रति ।
रोषितव्यमिति प्रोच्चैर्वाचं प्रोदुच्चरन्नृपः ॥२३०॥

पुनः प्रणम्य पप्रच्छ, स गुरून् विहिताऽञ्जलिः ।
ममाऽऽत्मा लप्स्यते मोक्षं न वेति वदत प्रभो ! ॥२३१॥

ज्ञात्वा ज्ञानेन तेऽप्यूचुरजापुत्र ! महीपते ! ।
चन्द्रप्रभजिनेन्द्रस्य, तीर्थे त्वं सेत्स्यसि ध्रुवम् ॥२३२॥

स च चन्द्रप्रभस्वामी, पुर्यामत्र भविष्यति ।
इक्ष्वाकुवंशसम्भूतो राजा तीर्थकृदष्टमः ॥२३३॥

त्वमेतस्मिन् भवे स्वाऽऽयुः, प्रपाल्य स्वर्गमेष्यसि ।
भूत्वा मर्त्यः पुनर्भावी, तस्याऽऽद्यगणभृद्भवान् ॥२३४॥

श्रुत्वेति मुमुदे राजा, तथेति गुरुजल्पितम् ।
अभिस्तुत्य सुभक्त्या च, प्रणम्य विससर्ज तान् ॥२३५॥

ततः परं बभूवैष, धर्मकर्मरतिः सदा ।
चकार तीर्थयात्राभिर्जिनधर्मप्रभावनाम् ॥२३६॥

रत्नस्वर्णमयान्याशु, स बिम्बान्यर्हतां मुदा ।
प्रत्यष्ठापयदाचारविदुरो विधिपूर्वकम् ॥२३७॥

यस्मादज्ञानता क्वाऽपि, संसारेऽत्र न जायते ।
प्राणिनां तच्छ्रुतं तेन, चक्रेऽभ्यस्तं स्वनामवत् ॥२३८॥

दयापुरस्सरं धर्मं, श्रद्धां सम्यक्त्वलालिताम् ।
पूजां जिनेन्द्रपादाऽब्जसपर्यापक्षपातिनीम् ॥२३९॥

भक्तिं सुविधिसाधुभ्योऽनुरागं जिनशासने ।
साधर्म्मिकेभ्यो वात्सल्यं, पौषधाऽऽदौ व्रतक्रियाम् ॥२४०॥

आत्मनश्च गृहस्थानामन्येषां चाऽभिनन्दयन् ।
अजापुत्रः स राजर्षी, भूय राज्यं करोत्यथ ॥२४१॥ त्रिभिर्विशेषकम् ॥

क्रमेण व्रतसम्प्राप्तेः, प्राप्य स्वर्गसुखानि सः ।
चन्द्रप्रभजिनेन्द्रस्य, तीर्थे लब्धा शिवश्रियम् ॥२४२॥

इति श्रीदेवेन्द्राऽऽचार्यविरचिते श्रीचन्द्रप्रभस्वामीचरिते पूर्ववंश्यप्रस्तावनापरिच्छेदः प्रथमः समाप्तः ॥ ग्रन्थाऽग्रम् ३१६२ ॥

॥ इति प्रथमः परिच्छेदः ॥

પૂ. ગણિવર્યશ્રી દ્વારા સર્જિત - સંપાદિત સાહિત્ય

લિખિત :

સિદ્ધાંતોના ધનુર્ધારી ..... અપ્રાપ્ય
નહિ જોઇએ, ૨૬૦૦ની રાષ્ટ્રીય ઉજવણી ..... અપ્રાપ્ય
૬ માસથી અધિક ઉપવાસ જૈન શાસનને માન્ય ખરાં ? ..... અપ્રાપ્ય
૨૬૦૦નું ઝેરીલું આક્રમણ ..... અપ્રાપ્ય
મારી બાર પ્રતિજ્ઞાઓ (ત્રણ આવૃત્તિ)
(શ્રાવકના ૧૨ વ્રતની ટૂંકી અને સરળ સમજ) ..... રૂ. ૧૦/-
હાંકી કાઢો, ગિરનાર રોપ-વેને ..... અપ્રાપ્ય
સીમંધર સ્વામીની ભાવયાત્રા (ત્રણ આવૃત્તિ) ..... રૂ. ૧૦/-
ભાવાચાર્ય વંદના (બે આવૃત્તિ) ..... રૂ. ૫/-
જપો નામ, સૂરિરામ ..... રૂ. ૬૦/-
શ્રદ્ધાંજલિ ..... સાદર...
સમેતશિખરની ભાવયાત્રા ..... અપ્રાપ્ય
નૂતન અરિહંત વંદનાવલી ..... રૂ. ૫/-
પૂર્વ પુરુષોની અંતિમ આરાધના ..... સાદર...
કેટલાંક પૂર્વજન્મો ભાગ-૧-૨-૩-૪-૫-૬ ..... સાદર...
અષ્ટાપદતીર્થની ભાવયાત્રા-સચિત્ર (બે આવૃત્તિ) ..... રૂ. ૫૦/-

પ્રાચીન ગ્રંથ + નૂતન ટીકા :

આત્મનિંદાદ્વાત્રિંશિકા + તત્વરૂચિ ટીકા + અન્વય + શબ્દાર્થ + ભાવાર્થ
રત્નાકરપઞ્ચવિંશતિકા + મઙ્ગલમાલા ટીકા + અન્વય + શબ્દાર્થ + ભાવાર્થ
સમ્યક્ત્વરહસ્યપ્રકરણમ્ + બોધિપતાકા ટીકા + સટીકગૂર્જરાનુવાદ
સુમતિસમ્ભવમહાકાવ્યમ્ + મોક્ષમઞ્જરી ટીકા + સટીકગૂર્જરાનુવાદ

અનુવાદિત :

તપા-ખરતર ભેદ

સંપાદિત :

સ્તુતિનંદિની
ગાયું, માનતુંગ સૂરિએ... ..... અપ્રાપ્ય
ધન્યચરિત્રમ્ (ગદ્ય) પ્રત
કાદમ્બરી - ૧ અને ૨ (સંસ્કૃત વોલ્યુમ)
શોભન સ્તુતિ (અન્વય-અનુવાદ સાથે) ..... અપ્રાપ્ય
શોભનસ્તુતિ-વૃત્તિમાલા ખંડ-૧ અને ૨ (૫ ટીકા + ૧ અવચૂરિ સહિત)
પ્રબોધચિન્તામણિ: ..... અપ્રાપ્ય
પાર્શ્વનાથચરિત્રમ્ (પૂ. હેમવિજયગણિકૃત)
ચન્દ્રપ્રભચરિત્રમ્ - ૧ અને ૨
કુમારપાળ રાજાના રાસનું રહસ્ય

પ્રાપ્ય પુસ્તકો / ગ્રંથો પૂ. સાધુ-સાધ્વીજી ભગવંતોને તેમજ જ્ઞાનભંડારને ભેટ આપવામાં આવે છે. જેમને ખપ હોય તેમણે એક P.C. કુસુમ-અમૃત ટ્રસ્ટ, વાપીના સરનામે લખી પુસ્તક મંગાવી લેવા.

પ્રાચીન ગ્રંથ + નૂતન ટીકા + સટીક અનુવાદવાળા ગ્રંથો







संपादित साहित्य


प्रबोधचिन्तामणिः

पार्श्वनाथचरित्रम्


शोभन
स्तुति


कादम्बरी
१


कादम्बरी
२


स्तुति
नंदिनी
- मुनि हितवर्धनविजय


शोभनस्तुति
वृत्तिमाला
प्रथमः खण्डः


शोभनस्तुति
वृत्तिमाला
द्वितीयः खण्डः

तपा-खरतर भेद


કવિ ઋષભદાસ મંત્રી રચિત
કુમારપાળ રાજાના
રાસનું રહસ્ય





Tejas Printers
AHMEDABAD M. 98253 47620